Sri:

Srimathe Ramanujayanama:




# Kriyasagaram

**Volume** – 11

śrī pāncarātra agame

## BRIHADBRAMHA SAMHITA

(Grantham & Sanskrit)

# बृहद्ब्रह्म संहिता

( ग्रन्थम् & देवनागरि )

śrīḥ
śrīmate rāmānujāya namaḥ



# Kriyasagaram

## **Volume** – 11

śrī pāncarātra agame

# BRIHADBRAMHA SAMHITA

(Grantham & Sanskrit)

# बृहद्ब्रह्म संहिता

( ग्रन्थम् & देवनागरि )

ஸ்ரீ பாஞ்சராத்ர ஆகமம்
ஸ்ரீ ப்ருஹத்ப்ரும்ம ஸம்ஹிதை

By:
**Sri Pancharatra Agama Vidvan**
Therazhundur K.Sriraman Battacharyar,
**Sri Pancharatra Agama Samrakshana Sabha,**
CG1-214,  East Adayavalanjan St,
Srirangam, Trichy - 620-006.
97917-02035
sriramanbattachar@gmail.com
www.kriyasagaram.in




ஸ்ரீ பகவத் ராமாநுஜரின் 1000மாவது திருநக்ஷத்ர வைபவத்தையொட்டி ஈரோடு பரிமளம் மஹால் திருமணமண்டபத்தில் 3-2-2014 முதல் 15-2-2014 வரை நடந்த 108 குண்ட மஹாசுதர்சந வைபவத்தில் பற்பல மஹான்கள் முன்னிலையில் வெளியிடப்பட்டது

ஸ்ரீமதேராமானுஜாய நம:

# ஸ்ரீபாஞ்சராத்ரே ப்ருஹத்ப்ரும்ம ஸம்ஹிதா.

முன்னுரை

ச்ரிய:பதிக்கு வேதத்திலிருக்குமிருப்பு தேவதாந்தர, ததநுகுணாசரண, ததாராதந, ததந்தர்யாமி, பரமாத்மஸ்வரூபாதி ப்ரதிபாதன பரமாயுமிருக் கையாலே கூளத்தோடும்.பிலாப்பிசினோடும் கூடி ஒன்றாய்க்கிடக்கும் கன்னல்கோலாயிற்று.அங்ஙனன்றிக்கே **ஸ்ரீபாஞ்சராத்ர ப்ரதிபாதனத்தாலே** அந்த ச்ரிய:பதிக்கு உண்டான இருப்பு ஏலாலவங்காதி திவ்யபரிமள த்ரவ்யமிளிதமாய், ஸுவர்ண பாத்ரஸ்தமான கன்னல் ரஸம் போலாயிற்று என்று பிள்ளைலோகம் ஜீயர் ஸ்ரீவைஷ்ணவ ஸமயாசார நிஷ்கர்ஷத்தில் அருளிச் செய்தபடி.

மஹோபனிஷதம் என்றும், பகவச்சாஸ்த்ரம் என்றும் பற்பல பெயர்களில் விளங்கும் ஸ்ரீ பாஞ்சராத்ர ஆகமம் அஷ்டோத்தரஸஹஸ்ராணி அஷ்டோத்தரசதாநி ச. என்கிறபடி பற்பல ஸம்ஹிதைகளை உள்ளடக்கிய வேதமூலம். அவ்வாறான ஸம்ஹிதைகளில் மிகவும் தொன்மையானதும், ப்ரபன்னர்கள் அறிந்து கடைபிடிக்கவேண்டிய அபிகமனம், உபாதானம், இஜ்யா, ஸ்வாத்யாயம், யோகம் அதன் மூலமான மோக்ஷமார்க்கத்தை அருதியிட்டுச் சொன்னதொரு ஸம்ஹிதைகளில் இதுவும் ஒன்று.

எவ்வாறு பாத்மஸம்ஹிதையானது ஞாந- யோக- க்ரியா- சர்யாபாதங்கள் என்று 4 பாகங்களாகக் கூறப்பட்டுள்ளதோ அதைப் போலவே இந்த ஸம்ஹிதையும் 4 பாகங்களாகப் பிரிக்கப் பட்டுள்ளது ஆனால் அவை ஒவ்வொன்றும் பற்பல அரிய பொக்கிஷமான விஷயங்களைக் கொண்டதாக உள்ளது.

**முதல்பாகத்தில்** 13 அத்யாயங்கள் உள்ளன. இந்த ஸம்ஹிதை பகவானுக்கும் ப்ரும்மாவிற்கும் நடந்த ப்ரஸ்நோத்தரமாகவே காணப்படுகிறது. அதில் ஸ்ரீ ஸுதர்ஸனபகவானுடைய தத்வவிஷயம் அதிநுட்பமானது. பத்ரீநாராயணபகவான் த்யானமும் அவ்விடத்தின் வர்ணனைகளும் கற்பனைக்கெட்டாத ஒன்று. அதைப் போலவே ப்ரபன்னர்களுக்கும் ஸ்ரீவைஷணவர்களுக்கும் முக்யமான தாப, புண்ட்ர ஸம்ஸ்காரங்கள், அது இல்லாதவர்க்கு ஸ்ரீவைஷ்ணவத்வம் கிடையாது என்பதான விஷயங்கள் தத்வமானதொன்று. மந்த்ர ஸம்ஸ்காரம் என்கிறபோது அஷ்டாக்ஷர மந்த்ரத்தின் ஏற்றமும், அந்த மந்த்ர ஜப முறைகளையும் கூறுகிறார். அதைப்போலவே த்வயமந்த்ரத்தின் விளக்கமும், அதன் ஸ்ரேஷ்ட்டத்தையும் கூறிவிளக்குவதும் சிறப்பு. புருஷகாரபூதையான பெரியபிராட்டியார் (மஹாலக்ஷ்மி) ஆவிர்ப்பாவ விஷயம் அவருக்குச் செய்யும் திருவாறாதனம், நவராத்ரி உத்ஸவ விபரங்கள் அதைச் செய்யாமால் இருந்தால் வரும் பின் விளைவுகள் என்கிற முறைகளை விளக்குகிறார். மேலும் ஸ்ரீஸூக்த ஆறாதன

விதியையும் அதன் பலன்களும் கூறுவது மிக்க சிறப்பானதொரு விஷயம். அடுத்து பகவதாறாதனத்தில் புருஷஸூக்த ஆறாதன முறைகள் அந்த ஸூக்தத்தில் உபசார முறைகளையும் கூறி 12 திருமண்காப்பு வைபவமும் கூறுகிறார் அத்தோடு இந்த புஸ்தகத்தை யார் ஒருவர் எழுதி தானமாக அளிக்கிறார்களோ அவர்களே பரமைகாந்திகள் என்றும் கூறி முதல் பாகத்தைத் தலைக்கட்டியருள்கிறார்.

**இரண்டாம் பாகத்தில்**

முதல் அத்யாயத்தில் ப்ரபன்னலக்ஷணம் கூறிய பிறகு அடுத்ததாக அந்த விஷ்ணுவின் ஸ்வரூப வர்ணனைகளையும் அவனை அடையும் முறைகளையும் 2ம் அத்யாயத்தில் விவரிக்கிறார். 3ம் அத்யாயத்தில் அதலம் விதலம் போன்ற பாதாலாதி லோகங்களையும், அதன் நீள அகலங்களையும் தெரிவிக்கிறார். அதில் வஸிக்கிறவர்களின் ஸுகபோகங்களையும் கூறுகிறார்.

4ம் அத்யாயத்தில் பூலோகவர்ணனையும், ஜம்பூத்வீபத்தின் முக்யத்வமும் அவர்கள் எதிர்காலத்தில் தண்ணீரையும் காற்றையும் எப்படி மாசுபடுத்துவார்கள் என்பதனையும்கூறி ப்ருந்தாவன க்ஷேத்ரத்தின் வைபவங்கள் சிறப்புகளைச் சொல்கிறார். அந்த ப்ருந்தாவனத்திலே ராதிகாவும் க்ருஷ்ணனும் கூடியிருக்கும்விதம், அவர்களது த்யானம், மந்த்ரங்கள்,

कृषिर्भुवाचकश्शब्दो णश्चाऽऽनंददायकः।

सदानंदसमावेशः कृष्ण इत्यभिधीयते।

**க்ரு**ஷிர்புவாசகஶ்ஶப்தோ **ண**ஶ்சாSSநந்ததாயகஃ।

ஸதாநந்தஸமாவேஶஃ க்ருஷ்ண இத்யபிதீயதே।6ம் அத்யாயே-53

அவர்களை ஆறாதிக்கும் விதம் முதலியவை. அதிலும் ராதிகாவின் த்யானம் இன்றும் ஶ்ரீரங்கம் சந்த்ர புஷ்கரிணிக்கரையில் ஸேவைஸாதிக்கும் ராதாக்ருஷ்ணனையே குறிப்பதாக உள்ளது. லோகநிரூபணம் என்னும் 7ம் அத்யாயத்தில் சதுர்புஜராம த்யானமும் ஶ்ரீராமாயணத்தின் சுருக்கமாக 'ஶ்ரீராமச்சரணம் மம' என்று முடியும் ச்லோகங்கள், மற்றும்

श्रीरङ्गाख्यपरंधाम मम मानिनि भूतले।

वैकुण्ठवैभवंसर्वं मया तत्र नियोजितम्।

ஶ்ரீரங்காக்யபரம்தாம மம மாநிநிபூதலே।

வைகுண்டவைபவம்ஸர்வம் மயா தத்ர நியோஜிதம்।7-अध्याये- 59

திருவரங்கம் என்பது என்னுடைய கோயில் அதில் நான் உகந்து வீற்றிருக்கிறேன். அதிலும் பரமபதத்தில் என்னென்ன வைபவங்கள் உண்டோ அவையனைத்தையும் அங்கு கண்டு மகிழலாமென்று பகவான் தானே திருவாய்மலர்ந்தருள்கிறார். ஸ்ரீராமானுஜர் அவதார விஷயம் பற்றிய குறிப்பும் காணப்படுவது விசேஷமாகும். இன்னும் பல விஷயங்களைக் கொண்டுள்ளது இரண்டாம் பாகம்.

**3ம்பாகத்தில்** முதல் 2அத்யாயங்களில் கோலோக வர்ணனம் புவர்லோகாதிகளின் வர்ணனையும் அதில் வீற்றிருக்கிற எம்பெருமான் தர்ம ஞான வைராக்யாதிகளால் எப்படி ரத்னஸிம்மாஸனத்தில் வீற்றிருக்கிறான் அவனே ராமனாகவும் க்ருஷ்ணனாகவும் இருக்கும் விதம், ஹனுமானின் ப்ரபாவங்களேல்லாம் சொல்லி முடிக்கிறார். 2ம் முறையாக ப்ருந்தாவன வைபவங்களையும் வ்யூஹாதிகள் வர்ணனம் எல்லாம் கூறி அவரவர் நாயகிகளையும் தெரிவிக்கிறார். 3, 4, 5 அத்யாயங்களில் ஸம்ஸாரதாபம் தீர்ந்து ப்ரபன்னனாநவன் எவ்வாறு அர்ச்சிராதி மார்க்கத்திற்கு அழைத்துச் செல்லப்படுகிறான். அவன் செல்லும் வழியில் அவனுக்கு நடக்கும் உபசாரங்கள் என்ன? நம்மாழ்வார் அருளிச்செய்த **சூழ்விசும்பணிமுகில்** பாசுரம் இதைக் கொண்டுதான் அருளியிருப்பாரோ என்றும் எண்ணத்தே தான்றுகிறது. அதிலும் கௌஷீதகி உபனிஷத்தின் ஸாரங்கள் 'சதம் மாலாஹஸ்தா:' என்றெல்லாம் வரக்கூடிய உபநிஷத் பாஷ்யங்களுக்கெல்லாம் முன்னோடி இந்த ஸம்ஹிதை தான் என்றால் அது மிகையாகாது. அவ்வளவு வைபம். மேலும் கலியன் அருளிச்செய்த திருவெழுக்கூற்றிருக்கை வ்யாக்யானத்தில் வரும் பற்பல ப்ரமாணங்கள் இதிலிருந்து கையாளப்பட்டிருக்கலாம்.

प्रणवंरथमारुह्य बुद्धिसारथिनाधृतम्।

मनःप्रग्रहवान् धीरो याति विष्णोःपरंपदम्।३-३९

ப்ரணவம்ரத²மாருஹ்ய பு³த்³தி⁴ஸாரதி²ஞத்⁴ருதம்|

மன: ப்ரக்³ரஹவான் தீ⁴ரோ யாதி விஷ்ணே:பரம்பத³ம்| 3-39

பூர்வாசார்யர்கள் அருளிய அர்ச்சிராதிமார்க்கத்தின் முன்னோடி இதுதான்.

शतशो रत्नदण्डोद्यतातपत्र लसत्कराः.....।

घण्टादुंदुभिनिर्ह्रादैः पूरयंत्यो दिशोदश॥ ॥....

त्रयोदशसहस्राणि रूपयौवनमण्डिताः।४---२०॥

ஶதஸோ² ரத்னத³ண்டோ³த்³யதாதபத்ரலஸத்கரா: |

**க⁴ண்டாது³ந்து³பி⁴னிர்ஹ்ராதை³: பூரயந்த்யோ தி³சோ த³ ஶ||....**
என்கிற ச்லோகங்கள் கண்கூடு.

**த்ரயோத³ஶஸஹஸ்ராணி ரூபயௌவனமண்டி³தா:| 4---20....**

அந்த பரமபதமும் பஞ்சஸம்ஸ்காரம்செய்துகொண்டு நாராயணனே நமக்கேபறை தருவான் என்றிருக்கிற ப்ரபன்னர்களுக்கே கிடைக்கும் என்பதையும் கூறுகிறார்.

**तदा तापादिकं कृत्वा ब्रह्मास्मीति विचिंत्यताम्।६-६०**

**ததா³ தாபாதி³கம் க்ருத்வா ப்³ரஹ்மாஸ்மீதி விசிந்த்யதாம்| 6-60**

என்று கூறி ப்ரும்மாவிற்கும் பகவானுக்கும் நடந்த ஸம்வாதங்கள் இத்துடன் முடிகின்றது.

7ம் அத்யாயத்தில் ஒவ்வொரு மனிதனும் கடைபிடிக்க வேண்டிய நித்யவிதிகள் பற்றி மஹர்ஷிகள் ப்ரும்மாவிடம் கேட்க அவரும் **ஆன்னிக மார்க்கத்தை** விளக்கமாகக் கூறுகிறார். இதிலிருந்தும் நம் பெரியவர்கள் பற்பல சான்றுகளையெடுத்துக் கையாண்டிருக்கிறார்கள். உதாரணத்திற்கு பல்துலக்கும் குச்சி எப்படி, எந்தமரங்களிலிருந்து எடுக்கவேண்டும், அதை எடுக்கும் போது சொல்லடே வண்டிய ச்லோகம் என்ன?

आयुर्बलं यशोवर्चः प्रजाः पशु वसूनि च.

ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते. 7-116

ஆயுர்ப³லம் யஸோ²வர்ச: ப்ரஜா:பஶு²வஸூ⁹னி ச.

ப்³ரஹ்மப்ரஜ்ஞாம் ச மேதா⁴ம் ச த்வம் நோ தே³ஹி வனஸ்பதே. 7-116

என்பதையெல்லாம் விளக்கும் ஸம்ஹிதை இதுவே. துளஸியின் பெருமை அந்த செடியில்லாத க்ருஹத்தின் கீழ்மை போன்ற பற்பலவிஷயங்கள் விளக்கும் ஸம்ஹிதை இதுவே. இதில் திருமண் காப்பின் அவச்யகத்வமும், **சிவப்பு ஸ்ரீசூர்ணம் திருப்பாற்கடலில் மஹாலக்ஷ்மியுடன் தோன்றிய வரலாறும் ஸ்ரீசூர்ணத்தின் தயாரிப்பு முறைகளும்,** அதை தாயாருக்கு

**इदंद्रव्यं मयादेवी प्रीत्यानिष्पादितं तव।**

**स्वीकुरुष्व महामाये विष्णुपत्नी नमोस्तु ते।**

இதம் த்ரவ்யம் மயாதேவீ ப்ரீத்யாநிஷ்பாதிதம்தவ।

ஸ்வீகுருஷ்வமஹாமாயே விஷ்ணுபத்நீ நமோஸ்து தே।

என்கிற மந்த்ரத்தைச் சொல்லி ஸமர்ப்பித்து அதை நாம் தரித்தால் வரும் நன்மைகளும் பெண்கள் அனுதிநமும் நெற்றியில் தரித்துக் கொண்டால் மஹாலக்ஷ்மி அந்த இல்லத்தில் நித்யவாஸம் செய்வாள் என்றும் கூறுகிறார்.

பத்ராஸனன் என்கிற மஹாராஜனுக்கும் ஈச்வரனுக்கும் நடக்கும் விவாதங்கள், அவன் மூலமாக பரதத்வம் யார் என்கிற கேள்வியும் ஈச்வரன்செய்யும் உபதேசங்களும் மிகவிசேஷமானதொன்று. இனி பகவதாராதனக்ரமமும், பூதசுத்தி விஷயங்களும் கூறிமுடிக்கிறார்.

**<u>4ம்பாகத்தில்</u>**

திருவாறாதனத்தின் விளக்கங்களும், மநஸ்சுத்தி ஏற்படும் விதம் மற்றும் பற்பல சுத்திகள் எப்படி பகவன் நாமஸ்மரணத்தால் ஏற்படும் என்றேல்லாம் விளக்குகிறார். ஆதாரசக்த்யாதிகளின் த்யானங்கள் மிகவிசேஷம். முத்ராவிதகள், கேசவாதிமூர்த்திகளின் பத்னிகள் மற்றும்பல. அடுத்து அக்னிகார்யவிதிமுறைகள், குண்டங்கள் அமைக்கும் விதம், அவற்றின் பலன்கள், பரிதி, பரிஸ்தரண, பரிஷேசன முறைகள், பூர்ணாஹுதிக்கான விசேஷ மந்த்ரமும் கூறுகிறார்.

பித்ருயக்ஞத்தின் விதிமுறைகள் அவற்றில் பித்ரு-பிதாமஹ ப்ரபிதாமஹர்கள் வாஸுதேவாதி மூர்திகளின் அம்சபூதங்கள் என்றும், அதனால் வாயஸ பிண்டம் தேவையில்லை என்கிற விஷயம் கவனிக்கத்தக்கது.

5ம் அத்யாயத்தில் ஏகாதசீ மஹாத்மியமும், அதன் நியமங்களும் கூறி பற்பல ஏகாதசியின் மஹத்வமும் கூறுகிறார். 6ம் அத்யாயத்தில் பகவானின் தத்வவிஷயங்களை விளக்கமாக அருளிச் செய்கிறார். பக்தியின் ஸ்வரூபமும் அந்த ப்ரபன்னர்கள் பின்பற்றும் முறைகளையும் விளக்குகிறார்.

8, 9, 10 அத்யாயங்களில் கௌதமமஹர்ஷிக்கும்- ருத்ரனுக்கும்-மஹராஜா பத்ரனுக்கும் **பரப்ரும்மம் யார்?** என்கிற ப்ரும்மவிசார விஷயமாகவும் விஷிஷ்டாத்வைதத்தின் பற்பலகோட்பாடுகள், வேதாந்தவிஷயங்கள் காணப்படுகிறது. அதிலும் ருத்ரன் தன்வாக்கினாலேயே ப்ரும்மம் என்பது நானல்ல என்னையும் ப்ரும்மாவையும் இந்த்ராதிகளையும் படைத்துக் காத்து அழிக்கும் ப்ரம்மம் ஒன்று இருக்கிறது. அதுவே லோகத்தை ஸம்ரக்ஷிக்கும் **ப்ருஹத்ப்ரம்மம்**. அவர் தான் ஸ்ரீயப்பதியான ஸ்ரீமன்நாராயணன். அவருக்கு நாங்களெல்லாம் உபகரணங்கள். ஆதலால் என்னை ப்ரம்மமென்று நினைத்து ப்ரமிக்காதே. அஞ்ஞானத்தை விட்டு வெளிப்படுவாயாக. ஸ்ரீமன்நாராயணனையே உபாஸிப்பாயாக. அவனது அனுக்ரஹம் சிந்தையினால் சொல்லினால் செய்கையால் தான் கிடைக்கும். அதிலும் எந்த ஒரு நற்பலனும் ஸ்ரீமன்நாராயணன் திருவருளால் தால் கிடைக்குமே தவிர வேறொரு உபாயமில்லை. என்றெல்லாம் பற்பல நல்லுபதேசங்களைச் செய்கிறார் பரமேச்வரன்.

कर्मिणां दान यज्ञाश्च स्वाध्यायो योग एव च।

हरिंविना न सिध्यंति कांयान्यपि मुनीश्वराः।

तस्यैव शरणे भूत्वा हित्वाऽन्यत्साधनांतरम्।

கர்மிணும் தாந யஜ்ஞாஸ்ச ஸ்வாத்யாயோ யோக ஏவ ச।

ஹரிம்விநா ந ஸித்த்யந்தி கார்யாந்யபி முநீஸ்வராஃ।

தஸ்யைவ ஶரணேபூத்வா ஹித்வாऽந்யத்ஸாதநாந்தரம்।4-10-60

இதனால் தான் இந்த ஸம்ஹிதைக்கு **'ப்ருஹத்ப்ரும்மஸம்ஹிதை'** என்கிற காரணப்பெயர் ஏற்பட்டதாகப் பெரியோர்கள் பணிப்பர். இவ்வாறு பற்பல ஸத்விஷயங்களும் உபதேசங்களும் நிறைந்த இந்த ஸம்ஹிதை நம்பெருமாள் பெரியபிராட்டியார் திருவருளால் தான் வெளிவருகிறது. அதிலும் **க்ரந்தாக்ஷரத்தில்** முதன் முதலாக வெளிவரும் ஸம்ஹிதையும் இதுவாகத்தான் இருக்கும் என்பது அடியேன் எண்ணம். இவ்வாறு அடியேனைப் பணியாண்டு கொண்டு இந்த ஸ்ரீகோசத்தை வெளிக்கொணர்ந்த **பெரியபெருமாள் பெரியபிராட்டியார் திருவடிகளிலும், எம்மனா என் குலதெய்வமே என்கிறபடி திருவுக்கும் திருவாகியசெல்வன் ஆமருவியப்பன் செங்கமலத்தாயார் திருவடிகளிலும் ஆழ்வார் எம்பெருமானார் ஜீயர்** திருவடிகளிலும் தெண்டனிட்டு க்ருதக்ஞதையை தெரிவித்துக் கொள்கிறேன்.

இதன் மூலக்ரந்தம் தெலுகுப்ரதி 1909ம் வருடம் வெளிவந்திருக்கிறது. தேவனாகரி(ஸம்ஸ்க்ருத)பாஷையில் வெளிவந்திருப்பதாகக் கூறுகிறார்கள். எவ்வளவு இருந்தாலும் ப்ரணவாகாரவிமானத்தினுட்பொருளான அக்ஷரமும், ஸ்ரீ ஆளவந்தார் உகந்தருளிய **க்ரந்தாக்ஷரத்தில் முதல்முதலாக** இந்த ஸம்ஹிதை வெளிவருவது பெரியோர்கள், பகவானின் திருவருளே. இந்த மூலக்ரந்தமான தெலுகு ப்ரதியை அடியேனுக்கு அளித்து உதவிய பத்ராசலம் ஸ்ரீ.உ.வே ஸ்தலசாயி ஸ்வாமிக்கும், மன்னார்குடி ஸ்ரீ.உ.வே ப்ரஸந்நா தீக்ஷதர் ஸ்வாமிக்கும் மிக்க நன்றியைத் தெரிவித்துக் கொள்கிறேன்.

**இந்த புஸ்தகம் நல்லமுறையில் வெளிவர பொருளுதவியும் புருஷகாரமும் செய்த கோவில் பட்டி ஸ்ரீ லக்ஷ்மீ நாராயணன் அறக்கட்டளை நிர்வாஹகர் ஸ்ரீமான் ராஜாராமன் அவர்கள் குடும்பத்தினருக்கும், ஸ்ரீமான் கோவிந்தராஜன் குடும்பத்தினருக்கும் பகவத் பாகவதாசார்ய அனுக்ரஹம்**

**பெற்று பூவுலகில் மிகுந்த சீரும் சிறப்புமாய் நல்வாழ்வு வாழ எம்பெருமானை ப்ரார்த்திக்கிறேன்.**

யதக்ஷரபதப்ரஷ்டம் மாத்ராஹீநம் து யத்பவேத்।
தத்ஸர்வம் க்ஷம்யதாம்தேவ நாராயண நமோஸ்து தே।

லோகாஸ்ஸமஸ்தாஸ்ஸுகிநோ பவந்து।

**தாஸன்**

**<u>தேரழந்தூர்</u>**
**<u>க. ஸ்ரீராமன் பட்டாச்சார்யார்,</u>**
**<u>20 -10 -13</u>**

# Index


| Bhagam | Page No |
|---|---|
| १) प्रथमो पादः | 1 |
| २) द्वितीयो पादः | 156 |
| ३) त्रितीयो पादः | 247 |
| ४) चतुर्थः पादः | 395 |

श्रीः

श्रीमतेरामानुजाय नमः

# श्री बृहद्ब्रह्मसंहितायां प्रथमेपादः

## प्रथमोऽध्यायः

## सम्प्रदाय प्रवृत्तिकथनम्

ज्ञानानन्दस्वरूपाय कल्याणगुणराशये।

प्रपन्नपारिजाताय  सिंधुजापतये नमः।

एकदा मन्दरद्रोण्यामासीनःकमलासनः।

द्वयमावर्तयन्मौनी वैष्णवं रूपमुद्वहन्।

दिदृक्षवो महाभागा मुनयो नारदादयः।

आगत्याः परमा भक्त्यागायन्तो यज्ञपूरुषम्।

साष्टाङ्गं प्रणितापत्याथ संबद्ध करसम्पुटाः।

विविशिस्वोचिते देशे प्रसन्नाभर्तुराज्ञया।

ऋषय ऊचुः-

नमः कमलवासाय ज्येष्ठायानिष्ट नाशिने।

पितामहाय शुद्धाय प्रणत ज्ञानदायिने।5

संशयं नो महाभाग पृच्छामो यदिमन्यसे।

कोऽन्योस्ति संशयच्छेत्ता त्वत्तोऽत्राश्चर्य रूपतः।

त्वं कर्ता सर्वलोकानां किं जपन्निह तिष्ठसि।

किमिदंधार्यतेरूपं किमिदंमौनमाश्रितम्।

बृह्मोवाच-

श्रृण्वन्तु पुत्रा वचनं मदीयं गोप्यं परंभूतहितं च सत्यम्।

कर्ता न चाहं जगतो भवन्तो विमोहितादुस्तरमाजया हि।

जिज्ञास्यमद्योद्भवनाशहेतु ब्रह्माऽद्वितीयं पुरुषाभिधानम्।

बृहद्गुणैकायनमादिभूतमादित्यवर्णं तमसःपरस्तात्।

योऽनन्तशक्तिर्बलपौरुषाढ्याः सर्वाश्रयास्स्वाश्रित कामधेनुः।

यस्यांशभूता हि वयं भवन्तः प्रवर्तयामःखलु लोकयात्राम्।10

यश्चेशितानोऽखिलविक्रियाणा मन्तर्गतोनाधिगतो विकारैः।

अप्रच्युतानन्दसुखाऽवबोध स्स्वाधारभूतस्सकलावधिश्च।

न यत्र कालो न समोऽस्यकश्चित्सर्वात्मभूतश्चिदचिच्छरीरः।

अचिन्त्यलीलः करुणैकशीलः श्रीलालिताङ्घ्रि र्मम योनिभूतः।

इयत्तया यस्य गुणान्विभूतिः नामानिरूपाणि च चेष्टितानि।

मनोवचोभ्यामधिगन्तुमीशिरे नाद्यापि सिद्धा मुनयोस्मदाद्याः।

यच्छक्तयोः विश्वमिदं सृजन्ति रक्षन्ति निघ्नन्ति विसर्जनेषु।

तन्नामरूपाकृतिभिस्स्वयं यो विभिध्यचास्ते हि महाविभूतौ।

श्रिया च भूम्या ननु नीळया च समग्रमाराधित पादपद्मः।

ऐश्वर्य विद्यायतशौर्य सौभग प्रागल्भ्य कारुण्यद्या निकेतः।15

विचित्रदिव्याऽमित भूषणायुधो विचित्रदिव्याऽमित वाहनान्वितः।

विचित्रनित्यामितकेळिकेतनो विमुक्तनित्याश्रित पादपल्लवः।

प्रधानकालोज्ज्वल सत्त्वबोध विभिन्नरूपाचिदनन्य संश्रयः।

नित्यादिभेदोक्त चिदेकसंश्रयस्स्वाधारभूतोऽद्वय शब्द वेद्यः।

योऽसौत्रितीयः परतन्त्रयोर्ध्वयोः स्वतन्त्रसर्वज्ञचिदेकविग्रहः।

आत्मा च शेषी च सदैकरूपो निरूप्यते येन समस्तरूपम्।

योऽसौ चतुर्विंशतिभिः कलाभिः प्राधानिकीभिर्विरचय्य देहिन्।

समूह्यतानाशुनि विश्वदेवो वैराजनंज्ञः पुरुषो बभूव।

तस्याहमासं जठराब्दकेशादानन्दमूर्तेरखिलस्य हेतोः।

तस्याबिधानं प्रजपन्निहास्मि तदर्थसन्धानपरो मुनीन्द्राः।20

मनोरथान्नु सन्धानं जपात्कोटिगुणं फलम्।

प्रयच्छति महाभागा निरर्थादिति निश्चयः।

न दानैर्नतपोभिश्च न स्वाध्यायैर्नचेष्टिभिः।

अनुसंधानतः पुम्सां यथात्मा परितुष्यति।

कायिकं वाचिकं पापं जपादेव विनश्यति।

तस्यैवार्थानुसन्धानं मांतरं हरतेतमः।

बहिर्दीपप्रदानेन बाह्यस्य तमसःक्षयः।

मन्दिरस्तेनदीपेन हीयतेह्यन्तरंतमः।

नात्रकालविचारोस्ति होमतर्पणमार्जनम्।

न्यासमुद्रान् देवाश्च विनियोगो न संस्तवः।25

दासवेषश्चसंस्कारो मुख्यस्सिद्धान्तवर्त्मनि।

अपेक्षितो मुमुक्षूणामनुसन्धान सिद्धये।

यथा जलसमुद्धारे गुणःकूपादपेक्षितः।

तथाऽर्थभावनंसूत्रं परमात्मार्थ संगमे।

अनुसन्धान सिद्ध्यर्थं दानवेषो मयादृतः।

द्विपरार्धावसानायोरपि मन्येक्षणं मम।

संस्कृतोहं समुत्पाद्य विष्णुना प्रभविष्णुना।

अधीतवेदोपि पुरा मन्त्रराजार्थसिद्धये।

असंस्कृताय दातव्यं नैव सिद्धार्थसाधनम्।

द्वयाख्यंस्ममहाभागा भगवाननुशास्ति माम्। 30

स देवोयमुपाहूय सद्योनाभिसमुद्भवम्।

उपादिदेश वेदान्मे सहसैव दयानिधिः।

ज्ञानराशिस्स्मृतो वेदोविदज्ञान इति स्फुटम्।

तत्र त्याज्यानि ग्राह्याणि ज्ञानानि निवसन्ति च।

प्रत्यक्षाणि घटादीनि बोधयत्यनुपूर्वशः।

पिताजातस्य बालस्य व्यवहार प्रसिद्धये।

अनित्यानि घटादीनि बोधयत्यानु पूर्वशः।

संबन्धमात्मनश्चापि तथा संबन्धिनो जनान्।

क्रीडनं धावनं वाक्यं रसगन्ध विवेचनम्।

शास्त्राऽध्ययनसत्कर्म चातुर्यांशास्त्रधारणम्। 35

पितैवोपदिशत्येनं ज्ञानाज्ञाने तथा ततः।

वेदेन बोधितामह्यं प्रवृत्तिः परमात्मना।

संगोप्य परमं धर्ममात्मानं येनयांति हि।

नियोजितोऽहं तपसि प्रभुणा विश्वसर्जने।

तेनैव दृष्टवानीशमात्मस्थमति पर्यटन्।

विज्ञाय तत्प्रसादेन बन्धनं विश्वकर्मणि।

प्रभुं विज्ञापयां चक्रे कथं मे निष्कृतिर्भवेत्।

मामुवाच चिरंचिन्त्य वत्स! भीतिमुपा कुरु।

मत्प्राप्तौ दर्शयिष्यामि विज्ञानं किमपिस्फुटम्।

एष तेऽवसरस्साधो मदाज्ञापालनस्य हि। 40

बीजे वटमिवात्मस्थं विश्वं पश्य चराचरम्।

तावद्वेदोदितं कर्मह्यकामस्त्वं समाचर।

कर्तृभावं परित्यज्य कर्तारं मामनुस्मर।

स्वीयत्वेनापि संबन्धं मा कृथाः पद्मसम्भव।

ज्ञानेनानेन संलिप्तो न भविष्यसि कर्हिचित्।

मत्प्राप्तये वदिष्यामि पारमैकान्त्यलक्षणम्।

धर्मं धर्मविदांश्रेष्ठ त्वं समाधत्स्व सांप्रतम्।

इत्युक्त्वाऽन्तर्दधे विष्णुः सृष्टवांस्त्वन्मुखानहम्।

चिंतामकरवं भूयस्तदाज्ञापालने रतः।

स्मरणादेव संप्राप्तो वैकुण्ठाद्रमया सह।45

पीतवासश्चतुर्बाहुः श्रीवत्सहृदयोहरिः।

धृतातपत्रव्यजनो दिव्यवैकुण्ठपार्षदैः।

जयशब्दैर्नमश्शब्दैः विष्वक्सेनादिभिर्नुतः।

तदाहं प्रणतस्तस्मै कृतातिथ्याय विष्णवे।

विज्ञापयामास वचो बद्धाञ्जलिपुरस्सरः।

भवत्संप्राप्तये देव पारमैकान्त्य लक्षणम्।

देहि मे दयया धर्मं त्वयैव प्रतिबोदितम्।

इति श्रुत्वा रमां वीक्ष्य विहस्य च परस्परम्।

तूष्णिं बभूवतुस्तत्र दम्पती पितरौ प्रभू।

अपृच्छमादिपुरुषौ विश्वयोनीसनातनौ।50

वचःश्रुत्वा जहसधुर्ममैव सांप्रतं च किम्।

श्री नारायण उवाच-

उपादिशमिदं पूर्वं रमां कमलसम्भव।

तदाहं तेऽभिदास्यामि रहस्यं तु गृहाण तत्।

एकदा शेषपर्यङ्के निविष्ठो रमयाऽनया।

सहस्रफ़णमाणिक्य द्युतिविद्योतितच्छदे।

श्रीवत्सं कौस्तुभंमालामवलोक्यतनौ मम।

साऽभिलाषस्मेरमुख स्पंदिताधरमुज्जगौ।

श्रीरुवाच-

जगन्नाथ ममस्वामिन् सर्वकल्याण भाजन।।!

कटाक्षनिर्मिताशेष विश्वलील नमोस्तु ते।

विश्वंबर घनश्याम नित्यानन्दैकविग्रह।55

सर्वाधार विशेषस्ते तनौ यूयं प्रकाशते।

श्रीवत्सादिः कुतस्सोयं नास्ति तत्वत्रयात्परम्।

त्यवैकदेशे त्रिगुणा प्रकृतिः पुरुषैस्सह।

सेवते पादलीलायां वैराजवपुषं हरिम्।

पाताळतलमारभ्य सत्यांत कृतविग्रहम्।

तत्रैकेपादमूलं ते तामसाः क्रूरबुद्धयः।

जीवाः प्रकृतिसंबद्धा बिलेषु निवसंति च।

कर्मणस्तारतम्येन दुष्कृतस्य शुभस्य च।

शुभस्य तारतम्येन नाभेरूर्ध्वमुपासते।

केचित्परिजनास्तत्र भूषणायुध वाहनाः।60

भोग्यभोगोपकरणा जीवानां च परस्परम्।

अन्तर्यामित्वमैवेषामात्माभोक्ता च भोजकः।

बहिर्यामिणमप्येके सेवंते कृतिनो नराः।

एवं कर्ममयेलोके प्रकृत्या कर्मणासह।

आत्मानं संश्रितास्सर्वे त्वां न जानंति केचन।

एके तु ज्ञानिनस्तत्वत्रय याथात्म्य वेदिनः।

चेतना एव जानंति कृपया ये त्वयेक्षिताः।

तरुशैलनदीभूमि लोकधातूत्तरा नराः।

भोग्यभोक्तृ विभागेन संस्थिता मायिकेपदे।

गतागतं लभंते ते नानादुःखौघभाजनाः।65

मायातो न निवर्तंते कर्मश्रृङ्खलयान्विताः।

अहंकारविमूढाश्च विषयासक्तमानसाः।

आमूलकारणं जीवास्संचरंति समावृताः।

ये तु मायाविनिर्मुक्ते वैष्णवे परमेपदे।

निर्गुणेकालनिर्लिप्ते सदैकाकारसुंदरे।

ज्ञानानंदमये साक्षाद्दिव्ये नित्यामयोज्झिते।

अवितर्क्य मनुग्राह्ये मतिहीने निरंजने।

हेयातीते सदाभासे स्वप्रकाशे महोदये।

निरावरणेकेनित्ये नित्यशुद्धनिरंतरे।

लोकातीते महालोके निर्मुक्तपत्तरंगके।70

मोक्षैकनिलये शुद्धसत्वद्रव्यमयो हरेः।

प्राकृताः केचिदायांति विविधूत मनोमलाः।

किंकृतं सुकृतं त्वेतैर्येतु देवेहसंस्थिताः।

एतेषां सुकृतं ब्रूहि दययापुरुषोत्तम।

श्रीवत्सं वनमालां च कौस्तुभो मकुटस्तथा।

श्रीवत्सकौस्तुभौ नित्यं हृत्कण्ठनिलयौ स्थितौ।

को विशेषोऽनयापार्श्वे प्रभारूपेण वर्तते।

शरीरे ते महाराज तिष्ठन्तिह्यनपायिनः।

अहं च भगवन्नाथ हृदयैकनिकेतना।

यथा जातास्मि भगवन्नेतन्मह्यं समादिश।75

इति श्री पांचरात्रे बृहद्ब्रह्मसम्हितायां

प्रथमपादे ब्रह्मनारदसंवादे **<u>सम्प्रदाय प्रवृत्तिकथनं</u>** नाम प्रथमोऽध्यायः।

# अथ द्वितीयोऽध्यायः

## सुदर्शन गीता-(तप्तचक्रांकित महत्ववर्णनं)

श्रीनारायण उवाच-

देव्याऽनयाहं प्रणयात् प्रसादितो विवित्सया सात्वत दिव्यमूर्तिः।

अप्राकृतानां त्रिविधां विसृष्टिं प्रावोचमव्याजमलं निबोध।

अप्राकृतमपि द्वेधा चेतनाचेतनं विधे।

चेतनं नित्यमुक्तेति द्विविधं परिकीर्तितम्।

भूमिशैलतरूद्यानवापिका कमलाकराः।

अचेतनमिदं दिव्यं भूषणास्तरणादिकम्।

अप्राकृतमपिद्रव्यं शुद्धसत्वाभिदं च यत्।

चेतनद्रव्ययोगेन नानात्वं प्रतिपद्यते।

अचेतनस्यातिशयाद चेतनमिहोच्यते।

भोगोपकरणंतद्धि समं वै नित्यमुक्तयोः। 5

अनन्तोगरुडो विष्वक्सेनो नित्याःप्रकीर्तिताः।

मायासंबंधरहिता विरुद्धाचरणोज्झिताः।

एकरूपास्सदादेवी परिचर्यापरायणाः।

आवयोः पुरतोह्येते प्रसादामृतकाङ्क्षिणः।

यथाहं च तथैवेते मदीया नित्यकिंकराः।

कदापि ज्ञानसंकोचोनैतेषां ननु विद्यते।

संप्राप्य प्रकृतेर्योगं ज्ञानसंकोचमाश्रिताः।

मायापकारिणाबद्धा भूत्वामत्कृपया पुनः।

संप्राप्याचार्यं शरणमुपायमवगत्य च।

मदाज्ञाकारिणो भूत्वा ह्यजीवं प्राकृतं तनुम्। 10

हित्वा मुक्ता ये भवन्ति द्विविधास्ते प्रकीर्तिताः।

केवलास्सेवकाश्चेति केवलास्तनु वर्जिताः।

सेवका द्विविधाज्ञेयाः किंकरारूप सेवकाः।

कैङ्कर्यं गन्धमाल्यादि मार्जनालेप वर्तनम्।

पक्ष्मपाता सहप्रेम वीक्षणं रूपसेवनम्।

एवं मुक्ता महादेवी मम लोके विशन्ति हि।

शैलप्रासादहर्म्याणि सभा सोपानभूमयः।

मणिमण्डप कासार हंससारस पक्षिणः।

सिह्मासनायुधस्थान यान भूषणमूर्तयः।

नित्या मुक्ताःकेवलाश्च जीवा एव न संशयः।

सर्वेऽसंकुचितज्ञाना सर्वे सर्वार्थकारिणः।

सर्वे समानसंभोगाश्रयन्तः परमं पदम्।

स्वाभिलाषाणुसारेण मत्प्रसादेन भूयसा।

भक्त्यामल्लोकमायान्ति भूत्वा सेवानुरूपिणः।

कर्मिणां नागतिश्चात्र नानादेवैक सेविनाम्।

योगिनामपि नैवास्ति नानासिद्ध्यपिकाङ्क्षिणाम्।

मामेवशरणंयाता सर्वभावेन सिंधुजे।

अतीता दुस्तरं मायां केवलास्सेवका हि वा।

बहवो मत्पदं प्राप्तास्सेवका स्सेवया मम।

गमनागमनैर्मुक्ताः केवलास्तु भवन्ति हि।20

यूयं विशेषस्सर्वे शितनौ मे तर्कितस्त्वया।

उत्सहेत महं वक्तुं नैव प्राणप्रियेपि हि।

रहस्यानां रहस्यं च सारात्सारतरं शुभम्।

आत्मा मे जायते तस्य यस्यैतत्प्रवदाम्यहम्।

नित्यंकौस्तुभसामीप्ये दृश्यतेयत्प्रभाद्वयम्।

भक्तौ मे मां समाराध्य प्रभारूपेण संस्थितौ।

नाहं वक्तुमलंचात्र विस्तरेण वरानने।

निबद्धौ धर्मपाशेन दुस्तरेण मयैव हि।

प्रणिपत्य ततो देवी मामुवाच दयान्विता।

त्वमेव भवपान्थानां विश्रामसुरवल्लरी।25

भवदावानलज्वाला संतापा कुलतात्मनाम्।

त्वमेव करुणासिन्धो निर्वापणसुधासरित्।

अज्ञानतिमिरांधानां त्वमेवपरमां जनम्।

मायाव्याळगृहीतानां विषवैद्यस्त्वमेव हि।

गोविन्दसुंदरापाङ्ग पूर्णचंद्राननद्युते।

देहि मे परमंज्ञानं यदि ते प्रीतिभाजनम्।

तदाहं प्रेमसंबद्धः संन्नद्धस्सयक्षये।

विवक्षुरात्मसू धर्मं प्रियै प्रीतिमानसः।

भक्ताभ्यां शङ्खचक्राभ्यां याचितोऽहं पुरा प्रिये।

आवां विना न वक्तव्यं धर्मं भागवतं प्रभो। 30

तच्छ्रुत्वाऽहमदां ताभ्यां वरं सर्वोपकारकम्।

भवद्वारंप्रभवतु नराणां परमं पदम्।

तस्मात्संकल्पसिध्यर्थं कमले भुजमूलयोः।

संधारय महाभाग !शङ्खचक्रे सनातने।

श्रीरुवाच

देवदेव दयासिंधो वद मे विस्तरादिदम्।

किमर्थं च कदा ब्रह्मन् चक्राद्यैरभि याचितः।

श्री नारायण उवाच

पूर्वकल्पे महामायेत्वया संप्रार्थितो यद !

जीवानां देहदानाय स्वशक्त्याऽकरवं जगत्।

संपन्नेषु सपालेषु लोकेषु परमेश्वरी।

स्वकर्म फलभोगाय समसज्जंतु भूयशः।35

मुक्तिद्वारमुखं तेषां पिनद्धमजया हरेः।

न ते पश्यंति विभ्रांताः संसारध्वान्तवर्त्मनि।

पराङ्मुखा भगवतो विषयास्वाद लंपटाः।

तान्विलोक्य महात्मानः चक्रशङ्खादि हेतयः।

कृतवन्तस्तपश्चर्यां जपन्तो मामतन्द्रिताः।

नित्यत्वात्तेन कांक्षंत इहामुत्रार्थ संपदम्।

तथापि करुणाविष्टाः परदुःखेन कातराः।

साधवो दीनहृदया निसर्गात्तु भवन्ति हि।

शुद्ध सत्वात्मकाश्शान्ताः स्वानन्दावृत मानसाः।

एकेन वपुषा विष्णोः पादपद्मोप सेविनः।40

इतरेनैव वपुषा कुर्वंतिस्म परम् तपः।

अति दीर्घेणकालेन प्रसन्नोऽहं समागतः

श्रीभगवानुवाच

किमर्थमिह तप्यद्वे हेतया ममवल्लभाः।

अष्टाक्षर महाविद्यामुपासीना जितेंद्रियाः।

नित्यानां नावशेषं हि प्राप्यं भोग्यं मनागपि।

सत्यं संकल्पकामत्वात् उच्यतामवशेषितम्।

हेतय ऊचुः-

जय लक्ष्मीपतेदेव सर्वकारणकारण।

नित्यानंद निजाकार नास्माकमवशेषितम्।

सदैकरूपास्ते पादपद्मैकरस सेविनः।

तथाह जीवान् संलक्ष्यमुह्यमोमाययावृतान्।45

निस्तारं नैव पश्यामोदुस्तराद्भववारिधेः।

वयं कर्तुंसमर्थान् स्मः सर्वंमोक्षं विनाप्रभो।

मोक्षोहिते हस्तगतो नान्योदेवोऽस्यहि प्रभुः।

सर्वं कर्तुं समर्थास्मः प्रसादात्ते रमापते।

तवाखिल जनावास मोहिन्यामाययासितम्।

जगदेतन्नजानाति मोक्षद्वारंमनागपि।

रुदंति नरके केचित् काचिद्रोगाभिपीडिताः।

भ्रमंति मरुकान्तारे पिशाचा जलवर्जिताः।

स्वर्गार्थिनोभवन्त्येके कर्मैवप्रवदन्ति ते।

अन्यदेव समत्वेन त्वामेके समुपासते।50

आत्मानं त्वदभेदेन मायया भेदमाश्रिताः।

विमुक्त कर्ममार्गास्ते तम एवाभियांति हि।

त्वमात्मा सर्वजीवानां सखासि त्वं रमापते।

कोन्यो मोचयितामीषामुपायं देहि सत्तम।

प्रवोचं तदहं देवी चक्रं तेजोमयं महत्।

वत्स संचिन्तितं सम्यक्त्वमेवोपायतां व्रज।

आत्मानमनुसंधत्स्व साक्षान्मत्प्रीति भाजनम्।

मयासंलालितंपाणौ दीनानामनुकम्पया।

आधारस्सर्वविद्यानामविद्यां नाशयाम्यहम्।

कृत्वा स्वतेजसाभिन्नं त्वामेकं सदृशं मया।55

तेजसा तव तीव्रेण मायैषामामुपस्थिता।

न हि शक्ताऽभिभवतुं दह्यमाना समंततः।

सर्वदाधारयांयङ्ग करे सर्वेश्वरोप्यहम्।

कृत्वा स्वतेजसोभिन्नं त्वामेकं सदृशं मया।

त्वां विना न करोम्यङ्ग संहारं दुष्टचेतसाम्।

प्रत्यक्षं पश्यतां सम्यक् स्वतन्त्रोपि सुदर्शन।

खण्डिताधारयाह्येते दैत्यदानव राक्षसाः।

यास्यंतिमत्पदंशुद्धं विनाऽज्ञान जपाध्वरैः।

त्वामाह प्रथमावाणी मम पाणिविभूषणम्।

पवित्रं चरणं नेमि लोकद्वारं महौजसम्।60

ये तु त्वां श्रद्धया संयक्सन्ताप्य दहने भुजे।

दक्षिणे धारयिष्यंति स्यात्तेभ्यः परमागतिः।

मां प्रकोप्यपदं गन्तुमिच्छंति मम वैष्णवम्।

तानाशु धारयातेऽहं हत्यादद्यां परांगतिम्।

प्रसाद्यमामितो ये तु गंतुमिच्छंति मानवाः।

प्रताप्याऽऽचार्यरूपेण नमामि परमां गतिम्।

सुदर्शनगतिर्नृणां द्विधासन्निश्चिता मया।

तापेन धारयावापि सतामप्यसतामथ।

गतिर्नास्ति गतिर्नास्ति गतिर्नास्ति त्वया विना।

गतिर्नास्ति गतिर्नास्तिह्याचार्येण मया विना।65

सुदर्शन तवानंतरूपाणि स्मर सांप्रतम्।

मदाज्ञयाऽखिलं विश्वमवष्टाभ्यावभासने।

प्रकृतिस्ते ह्यनन्ताख्यो मयाधारतया स्स्थितः।

यस्यमूर्ध्नि स्थितं सर्वं सर्षपाभमिदं जगत्।

अथ ऊर्ध्वं यथा तात स्थितो मूर्ति विभेदतः।

संकर्षणो हि भगवानुपास्ते मामतंद्रितः।

त्वद्रूपेण करे स्थित्वा मम संकर्षणात्मकः।

अविद्यामशुभं दुष्टान् कर्षसित्वमशेषतः।

शोभनं दर्शनं ज्ञानं मत्प्रियेभ्यः प्रयच्छसि।

अतस्सुदर्शनं नाम धारणाद्भुजमूलके।70

त्वमेव सूर्यरूपेण निरस्यतम उत्कटम्।

निर्मलं ज्ञानमाधत्से चाक्षुषं द्वादशात्मकः।

कश्यपाददिते र्भूत्वा कलयाऽऽदित्य संज्ञया।

पापांधकारनीराणि कर्षसित्वं निरन्तरम्।

यावत्तवकरस्पर्श तापेनातापितातनुः।

कर्मणां नाधिकारोस्ति तमश्चण्डाळसंगमात्।

न देवां राक्षसानां नराणामपि सत्तस्म।

करस्पर्शं विना तावदधिकारोस्ति कर्मणि।

क्षेत्रोद्भवानांसस्यानां करस्पर्शेन काश्यप।

संस्कारो जायतेलोके स्पृष्टानामंत्यजैरपि।75

स्वर्गादि साधनं सर्वं सूर्यरूपस्य ते नृणाम्।

उदयादुदयं याति लीयते निशिचारिणाम्।

अगत्वा शरणं ये तु मृता विप्रादयो जनाः।

प्रेतयोनिगतानां तु तेषामात्म विशुद्धये।

वृषोत्सर्गंप्रकुर्वंति कृत्वा चक्रेणलांछनम्।

तरिष्यंति तमस्तेपि शिक्षेयं मामकीसुत।

“अनायुधोसोह्यसुरानदेवा” इति वै श्रुतिः।

इहामुत्र च तेषां वा आसुरोभूप उच्यते।

आसुरोविद्यते भावो यावदेषांद्विजन्मनाम्।

न तावदधिकारोस्ति ममाराधन कर्मणि। 80

नाधिकारोऽर्चने यावन्मोक्षाशा विद्यते कुतः।

मुक्तिद्वारंत्वमेवातः सहस्रारनिशामय।

श्रद्धया धारयिष्यंति मम चक्रं सुदर्शनम्।

ज्ञात्वा सर्वपदार्थेषु शुद्धिस्तेषां पदे पदे।

शालायां भाजने वस्त्रे गृहोपकरणेषु च।

चमसोलूखले पीठे क्वान्नेचक्रमुल्लिखेत्।

पशुपुत्रकळत्रेषु यानवाहन भूमिषु।

सुदर्शन तवांकेन प्राकृतत्वं प्रयास्यति।

मामकीनो जनोलोभान्मोहाद् द्वेषाच्चलज्जया।

नांकयिष्यति यो मूडः तस्य नैवास्ति सद्गतिः। 85

अङ्कनं ममचक्रस्य वत्समत्प्रीतिकारणम् !

यथा कलानिधेस्सम्यगुदयः क्षीरवारिधेः।

अंतकाले त्वमेवैकः संकर्षणमुखात्पुनः।

उत्थायाऽनलरूपेण त्रिलोकीं प्रतपिष्यसि।

संकर्षणांशजोरुद्रः त्वमेवांबकरोचिषा।

नूनं संहरसि प्राज्ञ विश्वं विश्वैक भेषज।

जाठराऽनलरूपेण चक्रचारु ममाज्ञया।

जग्दमन्नमशेषाणां क्षणान्नयसि भस्मसात्।

कालान्तकस्वरूपेण यमरूपेण देहिनः।

त्वं शोदयसि दण्डेन सुदर्शन पुनःपुनः। 90

वैष्णवानां प्रपन्नानां हिताय विबुधोत्तम।

रूपंकृत्वा तवैवैष संस्थितःपन्नगेश्वरः।

अंबरीषेति विख्यातो राजा भुवि भविष्यति।

तस्य त्राता मुनेःकोपात् सुदर्शन भविष्यसि।

सर्वाणि कालरूपेण यमसूर्यभवात्मना।

त्वं दण्डयसिभूतानि न जानंति सुदर्शन।!

ज्ञानं न जायतेऽमीषामन्यरूपेण वैदिकम्।

न पदं मम विख्यातं वैष्णवं प्रकृतेःपरम्।

ज्ञानिनो ये त्वया स्पृष्टास्तापादि विधिनारहः।

अज्ञाश्चधारया संख्ये यास्यन्ति पदवीं मम। 95

द्वादशारेण तप्तेन वलय त्रयशोभिना।

ज्वालाचतुष्कयुक्तेन पूता यांति ममालयम्।

“सुदर्शनमहाज्वाल सूर्यकोटिसमप्रभ।

अज्ञानांधस्य मे देव विष्णोर्मार्गं प्रदर्शय।

अग्ने पुनीहि मे गात्रं सुदर्शनसमाश्रितः।

बिभर्मि कवचत्वेन प्रभागात्रमुपैतु मे।“

इति संप्रार्थ्य यो बाहौ गायत्र्यावावधारयेत्।

स एव वैष्णवोलोके मत्सेवा रहितोऽपि हि।

मनुजाद्यवतारेषु लोकसंग्रह काम्यया।

धारयिष्येभुजेदिव्यं वह्निपूतं सुदर्शनम्। 100

वटुकोवामनोभूत्वा मेखलाजिनदण्डधृत्।

कश्यपादंकयित्वाङ्गं करिष्ये देवरक्षणम्।

वसिष्ठ मुनिशार्दूलाद्दिलीप प्रमुखानृपाः।

धारयिष्यन्ति भूलोके महाशस्त्रं सुदर्शनम्।

रामो राजीवपत्राक्षो भूत्वा दशरथात्मजः।

धृत्वा तात्तायसींमुद्रां देवकार्यं करिष्यति।

पारमैकान्तिकं धर्मं वायुपुत्रो महाबलः।

प्राप्स्यन्ति जानकीजानेस्सुग्रीवाद्याःतथापरे।

विभीषणो महातेजाः प्रह्लादोजनको ध्रुवः।

यमश्शिवः कुमाराश्च भक्ता ये भूतभाविनः। 105

चक्राङ्कितो भवंत्येते यातायास्यन्ति चाऽपरे।

मुक्तिद्वारमतोनास्ति विना चक्रांक धारणम्।

पाञ्चजन्य मया प्रोक्तः प्रद्युम्नांशसमुद्भवः।

वामे भुजे मुमुक्षूणां स्थित्वा मन्मार्गदो भव।

गदा पद्मे महावीर्ये भुजयोरुभयोरथः।

स्थित्वा मत्प्राप्तिकामानां क्रियतामशुभक्षयः।

मयेत्थं भोदितास्सर्वे बद्धाञ्जलिपुटाः पुरः।

आनंद् निभृताः प्रोचुःदासास्म इति वादिनः।

“जितं जितंतेऽक्षरबद्ध संश्रयः श्रीकांतवैकुण्ठपतेऽखिलेश्वर।

प्रपन्न वित्रास विनाशनक्षम क्ष्मालालितांघ्रे भवने भवाय। 110

सुरद्रुमोद्यान विहारशालिने नवांबुधश्यामरुचे मधुद्विषे।

कदंबकिञ्जल्क पिशङ्ग वाससे नमोनमस्ते भवने भवाय।

भुजङ्ग राजाङ्ग  रमांकशायिने सुगंधि पङ्कांकित चारु वक्षसे।

आजानु दोर्दण्ड विखण्डितारये नमोनमस्ते भवनो भवाय।

विहङ्ग राजाङ्ग निरूपिताङ्घ्रये समस्त वेदोदित चारुकीर्तये।

मंदस्मितासार निवर्तितार्तये नमो नमस्ते भवनो भवाय।

अगण्यपुण्यैक गृहीतनाम्ने धाम्नेगुणानां महतां महीयसे।

भक्तार्पितोरस्थलपुष्पधाम्ने नमोनमस्ते भवनोभवाय।

व्यग्रायसन्न्यस्थभरैकवीक्षणेऽनुपायतापन्न जनोपकारिणे।

दुष्टेषुदावानल चण्डरोचिषे नमोनमस्ते भवनोभाय।

गांभीर्य सौंदर्य दयैकसिंधवे कारुण्यवात्सल्य गुणौघवार्धये।

माङ्गळ्यशौर्यार्जितदिव्यकीर्तये नमोनमस्ते भवनोभवाय।

विश्वोद्भवस्थान निरोधकारिणे विहारिणे शौर्यविहार भूमये।

अनेकरूपाकृतिनामशालिने नमो नमस्ते भवनोभवाय।''

इति चक्रकृतंस्तोत्रं स्तुत्वाप्रीतोखिलेश्वरी।

अद्धामभयं ह्येतं पठतां उत्तमं स्तवम्।

धृत्वा मे चक्रचिह्नं ये स्तवेनाऽनेन मां नराः।

स्तोष्यंति वितरिष्येहं तेषामाशु मनोरथान्।

अतःकान्ते त्वया कार्या श्रद्धा मच्चक्रधारिणे।

संधारय मुमुक्षूणां प्रपन्नानामदाज्ञया।

ओमित्युवाच सा देवी चक्रशंख भुजद्वया।

प्रयोजनान्तरं हित्वा मन्त्रराजमथा ददौ।

इति श्री पांचरात्रे बृहद्ब्रह्मसम्हितायां प्रथम पादे ब्रह्मनारद संवादे

सुदर्शनगीतानाम द्वितीयोऽध्यायः

# अथ त्रितीयोऽध्यायः

## <u>श्रीवत्सचरितं</u>

श्रीरुवाच-

देवदेव जगन्नाथ रहस्यं मे प्रकाशय।

दासभावं प्रपन्नास्मि स्वामि त्वम् मे दयानिधे।

श्री नारायण उवाच-

पुरा कल्पान्तरे देवी भगवत्तत्व काम्यया।

तपश्चकार विप्रर्षिः श्रीवत्साख्यो महामनाः।

यत्र नारायणोदेवो नरेणसहितोऽधुना।

आस्थाय परमं योगमाकल्पान्तमिहस्ति वै।

वैष्णवाख्ये महाक्षेत्रे द्राविडेषु पुरा भवत्।

विष्णुधर्मेति विख्यातो राजापरपुरञ्जयः।

धार्मिकः परमोदारो विनिवृत्तमनोमलः।

स च जिज्ञासया विष्णोश्चकार नियमंनृपः।5

त्यक्षेकळेबरम् नूनं न पश्यामि जनार्दनम्।

वासुदेवं रमाकान्तं सर्वशोषिणमच्युतम्।

समागताः प्रबोधाय सर्वेऽत्रपुरवासिनः।

श्रीवत्साख्योपि तं श्रुत्वा संप्राप्तस्तुल्यवेदनः।

श्रीवत्स उवाच-

राजन् कथं निपतितो भूमौदर्भमयासने।

किं चिकीर्षसि सत्यं नो वद धर्मविदुत्तम।

विष्णुधर्मोवाच-

अवश्यं यत्तुकर्तव्यं तत्तु न क्रियते नरैः।

तदहं कर्तुमिच्छामि नानयंचोपयातु मे।

धर्मवृक्षस्य देवस्य फलमेतद्विनिश्चितम्।

यदनेन जगन्नाथः परमात्माऽवलोक्यते-10

अविज्ञातस्य यस्त्येव प्रपत्यै नियमो मतः।

तमविज्ञाय देहोस्मिन् रतेरुत्पादनेन किम्॥

स्वरूपमात्मनो ललक्ष्यं ब्रह्माख्यं तद्विना मनाक्।

सुखं न विद्यते ब्रह्मन् देहभूतस्य मे क्वचित्।

यदिदं दृश्यते लोके श्रूयते द्विजसत्तम।।!

परिणामस्वभावासा प्रकृतिर् बहुरूपिणी।

विद्युदभ्रानलज्वालानैकरूपा विभाव्यते।

तथा सर्वेषुभावेषु दृश्यमानेषु पश्यताम्।

यदाधारस्फुरत्येष संसार क्षणभङ्गुरः।

सचाधारो न दृष्टश्चेद्दधमज्जीवितेन किम्।15

सर्वस्यावधिभूतं यत्प्राप्यमंते यदेव हि।

तदप्राप्तमिहप्राप्यं किं मे प्राप्तं द्विजोत्तम।

यस्यानंदस्यमात्राभि रुज्जीवन्ति वै प्रजाः।

तमानंदमयंप्राप्य वृधा मज्जीवितेन किम्॥

यस्यैश्वर्येण विधृतं जगदेतच्चराचरम्।

तस्यैश्वर्यमविज्ञाय किं वृथा जीवितेन मे।

यस्य पादजलं पुण्यं त्रिजगत्प्रपुनाति हि।

तदेकसंश्रयंहित्वा किं वृथा जीवितेन मे।20

यस्य दास्यैकनिरता बृह्मरुद्रादयोऽमराः।

तस्य दास्यं परित्यज्य किं वृधा जीवितेन मे।

वेदशास्त्रपुराणार्थी न दृष्ठार्थाय कल्पते।

अदृष्टमात्मनस्तत्वं विधित्वा तु सुखी भवेत्।

*चक्षुषोहि फलम् साक्षाद्वैकुण्ठस्यावलोकनम्।

श्रवणं तस्य महताम् फलं श्रोत्रस्यमानद।

अप्रमाणम् नासिकायाः फलं तच्चरणाब्जयोः।

तदुच्चिष्ट रसास्वादो रसनायाः फलंत्विदम्।

तदङ्गस्पर्शमाधुर्यं परमानंदसङ्गमः।

त्वचःफलम् महाभाग तद्विना जीवितेन किम्। 25

प्राणेन्द्रिय मनोदेहानात्मानमपि योऽनिशम्।

संजीवयति तम् हित्वा वद किं जीवितेन किम्।

यस्याक्षिपक्ष्मपरिवर्ति च विश्वमेत दाविर्बभूव विविधाभिधमादिसर्गे।

योऽन्तनिवेशयति कूर्म इवाङ्गवर्ग मस्याङ्गसङ्गमपहाय किमप्यसङ्गैः।

श्रीवत्स! वेदसिद्धान्त उपाश्रावि गुरुर्मुखात्।

प्राप्यो भोग्यो हरिर्नान्यः सत्यंसत्यं पुनःपुनः।

तमुत्सृज्य गतश्चेतः कृपणस्सोभिधीयते।

नान्यस्मिन् साधनं देहे प्राप्तये परमात्मनः।30

उपायं नैव पश्यामि येन पश्यामि केशवम्।

श्रीवत्सनिश्चितमतः शरीरस्यैव मोक्षणम्।

नृपस्य वचनं श्रुत्वा श्रीवत्सोपि महामनाः।

उवाच वचनं चारु नृपतेः प्राणपोषणम्।

श्रीवत्स उवाच-

एवमेव महाभाहो मयापि सुधृडीकृतम्।

प्राणान्न धारयिष्येऽहमनालोक्य महेश्वरम्।

तदा मम भवद्वाणी राजन् काप्यशरीरिणि।

धर्ममूलमिमंदेहं द्रुतं  न त्यक्तुमर्हसि।

इतोगच्छ महाक्षेत्रं नरनारायणाश्रयम्।

उपायंगदितातेऽद्य स देवो दीनवल्लभः।

यावद्गन्तुमनश्चक्रे तावदेतच्छ्रुतं मया।

विष्णुधर्मा तनुंत्यक्तुमुद्यतः केन हेतुना।

तद्द्रष्टुमागतश्चात्र राजन्नाश्रुत्य ते वचः।

आवयोस्तु व्यथैकैव निश्चिता जगतीपते।

बहुभिर्बोधितोऽहं वै साधनैरात्मदर्शनैः।

न तैरहं महीपाल दृष्टवानीश्वरं हरिम्।

सांख्यै स्सम्बोधितस्सम्यक् तत्व निर्णयवर्त्मना।

विज्ञातोयं मयाह्यात्मा पञ्चविंशोय ईरितः।

नैवप्रापं परंस्वास्मत्षड्विंशं पुरुषं नृप।

यदाधारमिदं सर्वं सदसच्छब्द शब्दितम्।४०

ततोऽहं चिंतयन्नासं चिदात्मा न करोति हि।

प्रकृतिर्जडरूपोयं कुतस्सृष्टिरियं मता।

यत्संयोगात्पुमानेष प्राकृतं भावमाश्रितः।

अस्वतन्त्रोह्ययं तस्मात् कर्ताकोऽस्यविधीयते।

कर्तृत्वं प्रकृतेर्नैव या जडा पुरुषाश्रिता।

उभयोः परतंत्रत्वात्कर्तृत्वं नोपपद्यते।

आत्मा प्रकृतियोगाच्चेत्कर्ता स्यात्तादृशोस्म्यहम्।

विश्वकर्ता कथं न स्यामिति संचिन्तितं मया।

विज्ञातः प्रकृतेर्भिन्नस्सामर्थ्यं तस्यनेक्ष्यते

अतः प्रकृतिहीनोपि विश्वकर्ता न शस्यते।45

एतत्संशय विच्छित्यै शरणं कं प्रजान्यहम्।

नास्तिमत्तःपरःकोपि मद्विजातीयरूपवान्।

एवं सन्तप्यमानस्य चिरकालं विपश्चितः।

उपस्थितस्समभवत् संतापात्पुरुषःपरः।

सचाहमामवनतं शोचमानंसुदारुणम्।

किंशोचसि महाभागा परिग्लान मुखाम्बुजः।

एवमुक्तोऽहमानम्य बभाषे विधृताञ्जलिः।

नाहंपश्येत् त्रिभुवने मम संदेहनाशकम्।49-

पुरुष उवाच।-

जानेहं नरशार्दूलह्यनुक्तोपि तवेंगतिम्।

योगप्रभावात्सिद्धोऽहं सामर्थ्यं त्वमिहेच्छसि।

पलाशवत्कुष्कुरस्य निर्लिप्तः पुरुषोह्ययम्।

**<u>योगवैभवम्</u>**

योगेनैवात्मनस्सिद्धिं यथा विंदति तच्छृणु।

योगप्रभावेन हरिः संसूते च चराचरम्।
पालयत्येषयोगेन संहरत्येष वै तथा।
योगैश्वर्यमिदंसर्वं दृश्यते श्रूयते च यत्।
चित्तवृत्तिनिरोधो हि योगशब्देनचोच्यते।
सर्वज्ञत्वं जनेशत्वं सर्वगत्वं स्मृतिस्तथा।
सर्वं भवतियोगेन नास्ति योगात्परःप्रभुः॥
निधया नवयोगेन योगेनैवाष्टसिद्धयः।
योगेनैवास्यतिष्ठंति पितरो मुनयस्सुराः।
योगेन पञ्चभूतानि प्रधानं पुरुषं तथा।
अत्येति सर्वभूतानांयोगस्तो नात्र संशयः।
योगोपायेन विप्रर्षे सर्वैश्वर्यधरो भव।
कर्ता समस्तविश्वस्य संकल्पेन भविष्यसि।
तेनोपशिक्षितं योगमन्वतिष्ठमतन्द्रितः।
यमादिभिर्योगपथैः सुसंपन्नो निरामयः।
अविदंतेन योगेन सर्वेषामन्तरङ्गतम्।
कृतकृत्यं तदात्मानं मेने निरुपमंप्रभुम्।
सर्वेभ्यो वि सजातीय स्वभाव बलपौरुषः।
करोमि निजसंकल्प सिद्धमेतदचिन्तयम्।60

संकल्पात्ससृजे दिव्यं महाकाशे मनोहरम्।

लोकमत्यूर्जिताकारमनेकाद्भुत दर्शनम्।

नानावर्णमणिव्रातसन्निबद्ध महीतलम्।

मन्दारपारिजातादि तरुराजि विराजितम्।

विचित्रगिरि सद्धातु संलिप्तगगनांगणम्।

स्फुरत्कल्हार कासार विहारि वनिताजनम्।

स्फुरच्चामीकरोत्तुङ्ग गोपुरोद्धूतकेतुकम्।

सौदाग्रोदग्रमाणिक्य चर्वित ध्वांतदिक्तटम्।

वितान पटसंतान निहारित दिवाकरम्।

कर्पूर क्षोदसंचार चारुचंद्रोदय श्रियम्।65

मुक्तावळी लसद्वार सुवर्णकलशोज्ज्वलम्।

नीलाश्मवेदिकारूड जलयन्त्र महोत्सवम्।

विहारवापिका पद्म मिळिन्दमुखरीकृतम्।

हम्सकारण्डवाकीर्ण विमुक्त तटिनी तटम्।

मत्तमातङ्गसंचार दानाद्रीन् कृतभूतलम्।

पाटीरनीर संसेक प्रमादित वहाजनम्।

गंधर्व गीत संगीत संचारविलसत्पदम्।

मृदंगमधुरक्काण विभोदित झषध्वजम्।

तस्मिन्पुरे समासीनो राजन् काञ्चन विष्टरे।

संकल्पादसृजं तत्र ग्रहनक्षत्र तारकाः।70

स शीतवातवर्षादि भयं तत्र मनागपि।

हानिर्मृत्युर्मनोग्लानिर्नैव योगबलादभूत्।

यद्यदिच्छामि तत्सर्वं सुसम्पन्नमभूदिह।

ईश्वरं नापरं मेने कर्तहमिति भूमिप।!

न मत्तोऽस्यपरःकोपि वर्तते न भविष्यति।

न मे कालःप्रभविता सत्यंसत्यं न संशयः।

तत्रेहमसृजं कांतामरविन्दविलोचनाम्।

तया सह विमानेषु विषयान् बुभुजे बहून्।

न जरा न च मारोगो न पौरुष बलक्षयः।

कंदर्प इव राजेंद्र रूपेणप्रतिमोऽभवम्।

संपाद्य पुत्रपौत्रांश्च तत्तैत्संबंधि बान्धवान्।

सहस्रशःकोटिशश्च बभौ धातेवचापरः।

चतुर्युगसहस्राणां दिनमेकं प्रजापतेः।

संकल्पितं भगवता तन्निवृत्तं तदा नृप।

मयाकृतो यस्संकल्पः स च नाशमुपेयिवान्।

न तत्र नगरं नारी न पुत्रास्सुहृदो न च।

अहमेवैक एवाहं तस्मिन्नाकाश मण्डले।

केनमेनाशितो नूनं संकल्पो योग भावजः।

कुत्रास्ते स पुमानद्य यो ममैश्वर्य मत्यगात्।

इत्यहं सर्वभूतानि तमन्वेष्टुं प्रविष्टवान्। 80

पृथिवीतो विनिर्गत्य हरिरूपमुपेत्य च।

प्रविश्यचात्यगां वारिना पश्यं पुरुषं परम्।

विनिर्गतस्ततस्तेजः प्रविश्याहं तदाकृतिः।

अत्यगां तैजसंरूपम् नापश्यं पुरुषं परम्।

एवं वायुमथाकाशं अहंकारं महत्तमम्।

प्रधानमत्यगां राजन्ना पश्यं पुरुषां परम्। !

असंख्याता मया दृष्ठा सृष्टिस्तत्वैषु पार्थिव।

तेषु यागबलेनाहं न लिप्तः क इवांबुजम्। 85

यदाहं प्रकृतेरूर्ध्वं गमनायदधे मनः।

आत्मानमेवचापश्यं नापश्यं पुरुषं परम्।

पुरुषो न परश्चात इति मे न व्युभासत।

किं तु योगे गतिर्नासी न्न ज्ञानं न च पौरुषम्।

अनुमानादिना ज्ञातः कोव्यस्ति पुरुषात्परः।

कुतो न भासते कीदृग्रूप सत्वगुणात्मकः।

योगादीनां गतिश्चेयत्यात्मैश्वर्य मियत्तथा।

इतः परं गतिर्नैति निश्चया हि मयाकृतिः।

एवं चिंतयतेमह्यं वागाहंबरचारिणी।

भक्त्याहमेकया ग्राह्योः न ग्राह्याः कोटिसाधनैः।90

तत्वातिक्रमणेनैव ज्ञानेनाधिक तत्वया॥

स एव आत्मा शेषो मे नित्यो मायावधिस्स्मृतः।

पुं प्रकृत्योर्मुनिश्रेष्ठ एकोहमवधिस्मृतः।

सोऽहं नानन्य भावेन विनागम्यः कदाचन।

परमैकान्तिकं भावं संपादय गुरोःकुलात्।

उपायान्तरमुत्सृज्य नाहं लभ्योऽन्यसाधनैः।

द्राविडेषुजनिं लब्ध्वा मद्धर्मो यत्र तिष्ठति।

प्रायो भक्त्या भवन्तीह मम पादांबुसेवनात्।

एतदन्वेषणेनैव मत्प्राप्तौ सततं भवान्।

महत्वं वदति प्राज्ञः तस्माद्वत्सो मया कृतः।

शोभया परयायुक्तः तस्माच्छ्रीवत्स संज्ञितः।

नरनारायणौ प्राप्य संताप्य तनुमात्मनः।

अनुसंधान कर्ता मे मामुपैष्यसि मा शुचः।९७

इति श्री बृहद्ब्रह्म सम्हितायां प्रथम पादे

सुदर्शनगीतायां श्रीवत्सचरितं नाम त्रितीयोऽध्यात्यः।

# चतुर्थोऽध्यायः

## रहस्योपदेशः

श्रीवत्स उवाच-

सचाहमवतीर्णोऽस्मि श्रीवत्साख्यो नृपोत्तम।

स्मृतिर्मेनाद्य संरुद्धा योगेशचरणाश्रयात्।

तत्राऽहं गंतुकामोस्मि यदि ते रोचते वचः।

नारायणाश्रयं यावचावामध्य नरेश्वर।

राजोवाच -

माचिरंकुरु विप्रर्षे कुत्र नारायणाश्रमः।

गच्छाव पुण्डरीकाक्ष दिव्यदर्शनकाङ्क्षिणौ।

श्रीवत्स उवाच-

राजन् पश्यप्रभावं मे योगस्य नयनांबुजे।

पिधेहि पाणिनादीर्घं राज्याशां विनिवर्तय।

एवमुक्तो निवर्त्याशां प्रजां पुत्रेनिवेश्य सः।

राज्यं तृणमिव त्यक्त्वा पिदधेलोचनद्वयम्।

श्रीवत्सो दर्शयामास तं गिरिं गंधमादनम्।

मुतैकेन कमले योगाभ्यास प्रभावतः।

श्रीवत्स उवाच-

मुच्यतां नयनद्वारं मुक्तिद्वारंविलोकय।

सोपानमिव वैकुण्ठसौधस्यैनां सरिद्वराम्।

विष्णुधर्मा तदोन्मुच्य नरनारायणाश्रयम्।

अपश्यन्नयनांभोजमवाप परमोत्सवम्।

“यत्र चाऽळकनन्दाख्या नदी कैवल्य वाहिनी।

तप्तवारिचयाकारः पावनाय हुताशनः।

अंते विज्ञानदाधारा कूर्मस्य कमलोद्भवे।

गरुडोपि शिलारूपी सेवते चरणाम्बुजम्।१०

*धर्मात्मजं नरसखम् जगदेकवन्द्यं नारायणं जलजलोचनमप्रमेयम्।

सिद्धैरुपाश्रित गुणैकराशिम् जीमूतमेधुर तनुं पुरुषम् ददर्श।

पद्मासनं वर कमण्डलु मुग्धहस्तमेणाजिनोत्तर पटं विलसत्त्रिदण्डम्।

शुद्धोपवीतिनमुरस्थल कंजमालामाबद्धशेखर शिखं पुरुषं ददर्श।

प्राणावरोध तरुभूत तनुं प्रपन्न तत्वं परं परमया दयया दिशंतम्।

कन्दर्प गर्व हरखण्डित रोषदर्पं सिद्धान्तशान्त हृदयं पुरुषं ददर्श।

सामादिवेदपरिगीतचरित्रबृन्द मानंदसान्द्र नयनक्षत विश्वतापम्।

सद्ब्रह्मविश्वदयया तपसिप्रविष्ठमात्मान मुज्ज्वलगुणं पुरुषं ददर्श।१४।

श्रीमन्त्रराज पदवर्ण विचारयुक्तान् मन्त्रद्वयार्थ परिवर्तन दग्धमायान्।

तत्त्वत्रयैक परिचिन्तनलब्धविद्या ऽऽकारत्रयांस्तु निजधाम्नि निवेशयन्तम्।15

तावोचतुश्चरणपीठतलेलुठंतौ साष्टांगपात परिपूत शरीरयष्ठि।

आवां विलोकयमनाक् कृपया भवाग्नेः सन्तप्य ते चरणमूलमुपाश्रयंतौ।

नमोऽनन्ताय देवाय सुरासुरनतांघ्रये।

मुक्तिप्रदाय मुक्ताय सात्वतानंददायिने।

आवयोस्तवपादाब्ज परिचर्यामभीप्सतोः।

गुणत्रयातिरिक्तानां गतिःकेन भवेदिह।

श्री नारायण उवाच।

त्रिधागतिरिहप्रोक्ता कर्मिणां ज्ञानयोगिनाम्।

सन्यासिनां स मुख्याता ब्रह्मलोकमयागतिः।20

मय्येवार्पित चित्तानां शांतानां मामभीप्सताम्।

परमैकान्तिनांवत्सौ गुणातीता गतिर्मता।

वैकुण्ठदास्ययुक्तानां दासवेषोपशोभिनाम्।

दासदासेतिलभतामपूर्वान् गतिरिष्यते।

निवर्त्य सर्वतस्संगं सम्बंधमपि देहजम्।

प्रयोजनान्तरं हित्वा मामेकं शरणं गताः।

ते प्राप्नुवंति मामेव ममैवात्यंतवल्लभाः।

मामृतेनाभिकांक्षन्ति प्राणादप्यतिवल्लभम्।

श्रीवत्स योगसंसिद्ध राजन्ज्ञानैक भाजन। !

स रहस्यं प्रयच्छामि सिद्धान्त ज्ञानमुत्तमम्।

यस्याहं रूपभेदेन जनानां हितकांयया।

आर्थितो वैष्णवंक्षेत्रं नरेणसहितस्सदा।

तदेकंकारणं ब्रह्म वेदान्तप्रतिपादितम्।

नाहंवक्तुमलं तस्यप्रभावं शतजन्मभिः।

गुणांस्तस्यपरिच्छेत्तुमैश्वर्यं भूति वैभवम्।

नैवं वस्तुपरं येन परिच्छेदोऽस्य जायते।

यत्र नायमसौ देवो स देशस्तादृशः क्वचित्।

अतो देशपरिच्छेदः पुरुषस्य न विद्यते।

यत्र नायमसौ देवो न कालस्तादृशः क्वचित्।

अतः कालपरिच्छेदः पुरुषस्य न विद्यते।30

आश्रयान्तर संशून्यो नाश्रयो विद्यते क्वचित्।

निराश्रयाश्रयश्चैष परमात्माऽद्वयो मतः।

आधेयमत्रसकलं चिदचिच्छब्द संज्ञितम्।

आधेय नामभिस्तस्य नामानि विलसंति हि।

मतस्याधार इत्येव नानावस्ता कृतानि हि।

आधेयरूपरूपाणि नानावस्थाकृतानि वै।

स्वप्रकाश स्वरूपस्य विलसंति परात्मनः।

प्रकाश्यमत्र सकलं चिदचिच्छब्द संज्ञितम्।

प्रकाश्यते तस्यभासा तस्माद्देवःप्रकाशकः।35

प्रवर्त्यं सकलम्ह्येतदयमेकः प्रवर्तकः।

प्रवर्तकत्वगुणको नाम्नाचापि प्रवर्तकः।

नियंता चैव सर्वेषां नियाम्यानां च सर्वशः।

नियंतृत्वम् गुणस्तस्य तथा नामा प्रकीर्तितः।

आधेयम् कार्यतांयाति ह्यवस्थांतर भेदतः।

कारणम् तत्र चान्वेति कालकर्म प्रवर्तनम्।

कारणं सर्वकार्याणां जनकःपरमोमतः।

जन्यं हि सकलं ह्येतदात्मनो गुणतो हि सः।

तस्येदं सकलं वस्तुचिदचिच्छब्द संज्ञितम्।

तदीयंकिमिति प्रश्नेह्युत्तरं शेष एव हि।40

शेषश्शेषीति विख्यातो दासस्स्वामि स एव हि।

चेतनस्तत्र यो भागस्सोचिद्भोगैक साधनः।

चिदचिच्छेषभूतो हि तदायत्त स्थितिस्सदा।

तच्छेषरससंप्राप्तो विज्ञेयामनसैव हि।

आश्रितादिकसंज्ञां हि संप्राप्तो गुणतोपि सः।

स्वाभाविकोह्ययं भेदो मतो मे शेषशेषिणोः।

उभयोरात्मभूतोयं स्वतन्त्रो धारको हरिः।

प्रेरको भासकोलिप्तो भोजको भोजवर्जितः।

छायातपस्वरूपेण प्रविष्टौ विहगाभिधौ।

अचेतनायांप्रकृतौ चेतनायां तु सैव हि।

उभयोर्वि सजातीय स्वभावगुण वैभवः।

भेदोनिरूपितोह्येषह्यभेदस्तच्छरीरता।

अतोऽनन्यार्हसंबन्ध जीवात्म परमात्मनोः।

विचिन्त्यैवं विमुक्तस्स्यात् श्रीवत्स जगतीपते।

अचित्सु भोग्यभूतं हि प्राकृतेऽप्राकृतेन च।

अनहम्यात्मनि ज्ञात्वा स्वाप्न विद्युल्लतोपमम्।

अप्राकृतेन देहेन नैष्कर्म्येण द्विजोत्तम।

स्वस्यानन्यार्हभोग्यं हि विद्धि देवं रमापतिम्।

स्वतन्त्रमात्मनो देवं कारुण्यादि गुणान्वितम्।

तदीयस्यात्मनोऽनन्यसाधनं साधु साधय।50

प्राकृतेषुपदार्थेषु तदाचाप्राकृतेष्वपि।

समस्तेषु स्वकीयत्व स्पृहमात्यंतिकीं त्यज।

प्राकृताप्राकृतेष्वेवं चिदचित्सु निरन्तरम्।

सर्वशक्तिगुणोपेतं भगवन्तमवस्थितम्।

भावेनात्यंतिकेनैव भज तेभ्यो विलक्षणम्।

तत्राप्तये सदा वत्सयावदस्ति कळेबरम्। !

अखण्डतैलधारावदविच्छिन्नस्मृतिः पुमान्।

अभ्येति परमात्मानमिति वेदांतडिण्डिमः।

श्रृणु वत्स प्रवक्ष्यामि साधनं स्मृतये हरेः।

अधिकारानुरूप्येण कर्मज्ञानमुपासनम्।55

इति श्री पाञ्चरात्रे बृहद्बृह्म सम्हितायां

प्रथमो पादे सुदर्शन गीतायां श्रीवत्सचरिते

रहस्योपदेशो नाम चतुर्थोऽध्यायः॥

अथ पञ्चमोऽध्यायः

## <u>तापसंस्कार विधिः</u>

श्री नारायण उवाच

वेदोक्तं कर्मकुर्वत्सु चेतनेष्विच्छया हरेः।

ईहते मुक्तयेलोके सहस्रेषु च कश्चन।

वीक्षिस्तम् हि मनस्तस्य विषयास्वादनेन हि।

सैकदावशमायाति विना महदनुग्रहात्।

अतस्सर्वात्मना वत्स! मद्धर्माकाङ्क्षया प्रियम्।

आचार्यम् शरणं सम्यक् संश्रयेत विचक्षणः।

देहशुद्धिं विधायाथ यथाङ्गं परमात्मनः।

मन्त्रराजम् द्वयंचैव पौरुषं सूक्तमेव च।

श्रीसुक्तं पावमानं च भूमिसूक्तं तथैव च।

स्वर्णघर्मानुवाकं च द्वादशार्णं समभ्यसेत्।5

श्रीवत्स उवाच

भगवन् देहशुद्धिर्हि कीदृशी केन जायते।

मन्त्रराजस्य माहात्म्यं मान्त्रराजस्य को भवेत्।

श्री नारायण उवाच-

श्रुत्वा शास्त्रमशेषेण प्रवृत्तिं च तथेतराम्।

निवृत्तिं हृदये कृत्वा परधर्माय सज्जितः।

विरक्तो वा गृहस्थो वा सकामाऽकम्प एव च।

तापादिना विमुक्तस्स्यात् पातकैः कोटिजन्मजैः।

एषा वैष्णवसिद्धांते संस्क्रिया परमा मता।

सुदर्शनाग्निना तप्त्वा शरीरं यद्विशोध्यते।

बद्धांजलिपुटंशिष्यं त्राहि त्राहीतिवादिनम्।

विशोद्य पंचगव्येन कुशैर्गात्रेषु मार्जयेत्।

वाराहतनुसंभूताः कुशाःकर्मप्रवर्तकाः।

विशोधयन्तिचाङ्गेषु मार्जनाद्विष्णुनामभिः।

वासुदेवोच्यतेऽनन्तः प्रद्युम्नोह्यनिरुद्धकः।

कृष्णोरामो हरिर्विष्णुः उपेन्द्रो गरुडध्वजः।

वैकुण्ठो वामनश्चक्र शङ्ख पद्मगदाधरः।

तीर्थपादो हृषीकेशः पुण्डरीकनिभेक्षणः।

श्रीभू नीळापतिर्देवः प्रणवाद्य नमोन्तकाः।

तं वै विशोधयंत्येते पापेभ्यः शरणगतम्।

अस्त्रेणद्वादशार्णेन शोधयेच्च कुशोदकैः।

क्षुरकेणशितेनाथ मण्डनं तस्यकारयेत्।

स्नापयेद्वारुणैर्मन्त्रैस्तिलाऽऽमलक मिश्रितैः।15

भगवत्पादसलिलैः तुळसीदळ संस्कृतैः।

दत्वा विशुद्धं कौपीनं कवचेन समाहितः।

मन्त्रराजेनगायत्र्या द्वादशार्णेनवाग्यतः।

उपवीतं पुनर्दद्याद् भगवत्कर्मसिद्धये।

“शिष्यार्थं प्रार्थयेद्देवं जयलक्ष्मीपते हरे।

तवाज्ञालंघिनं दीनमस्यशेषाभिमानिनम्।

कुलजात्यभिमानेन मोहितं देवमायया।

स्वतन्त्रमकृतप्राज्ञ मन्यत्रैश्वर्य चिन्तकम्।

आदेयत्व स्वभावादि स्वरूपज्ञानविच्युतम्।20

अप्रपन्नममर्याद मकृतार्थंगतत्रपम्।

स्वीकुरुष्वैन मब्जाक्ष शरणार्थिनमर्थद।

परभक्ति परज्ञान परप्रेमैकभाजनम्।

कृत्वानिजेषु देवेशजानीहि भवभेषज।

स्वीकुरुष्व महादेव पादमूलमुपस्थितम्।

प्रणतं प्रणताधारकैङ्कर्ये विनिवेशय।

कर्मणाब्राम्यमाणोयमनेकादि महार्णवे।

नानोपासनविभ्रास्तो नाना सिद्धान्तवर्त्मना।

प्रपन्नो भगवत्पादमूलं मायागुणात्परम्।

विधित्वा परमोदारगुणायतनमायतम्।“

एवं संप्रार्थ्य पितरौ जगतःपरमेश्वरौ।25

आचार्यः पूजयेत् भक्त्या तापसंस्कारसिद्धये।

स्नानवाद्योपहारैश्च स्तवनीराजनादिभिः।

पौरुषेण तु सूक्तेन पायसेनानलं हुनेत्।

पीठमुद्भावयेद्वह्नेवाधारादिभिरेव च।

वैकुण्ठपार्षदैर्युक्तं देवेशं तत्र भावयेत्।

"स्फुरन्मकरकुण्डलं कमलकोश रक्तेक्षणं

विमुक्तजन सेवितं जलजकर्णिका संस्थितम्।

किरीटमणिदीपिकावळि विलीनशोकानलं

विशङ्गपटसंगिनं सजलनीरदाङ्गच्छविम्।

असीमगुणशेवधिं विधिमुखाऽमरैस्सेवितं

निवीतविमलैस्स्रजं दयितयादयोद्रेकिणम्।.

लसद्भुत चतुष्टयं धृतपवित्र शङ्खांबुजंगदां

गदिनमाश्रये वलयिनं रमाराजितम्।"

एवं ध्यात्वा प्रजुहुयान्मन्त्रराजेन वैष्णवः।

शङ्खचक्रे विशोध्याऽथ मन्त्रैःपञ्चामृतैरथ।

संपूज्य भगवत्पार्श्वेनिधाय परमायुधे।

प्रार्थयेच्छिष्यसंस्कार सिद्धये प्रणतोगुरुः।३२

"सुदर्शन महाज्वाल नारायणपरायुध।

एष ते स्वामिनःपादे परिचर्यासमुद्यतः।

स्वामिन्ननुग्रहीतस्ते वीक्षितःकृपयाभृशम्।

यदसौ सर्वमुत्सृज्य कैंकर्यायूपसंस्थितः।

संसादय तथायोग्यं प्रभोः पादार्चनाय च।

यथा भवेत्सुरश्रेष्ठो ज्येष्ठसर्वायुधेषु हे।

कर्मणा देहयोगेन संगेनामेध्य सेवया।

अयोग्यत्वमपोह्याशु ज्वालया दासतां नय।

चित्स्वरूपेण देहादेर्भिन्नो यद्यप्ययं जनः।

तथापि देहयोगेन ह्यन्यशेषत्व रक्षसा।

संस्पृष्ठो नष्टसंशुद्धिः नाधिकारि परार्चने।

कैङ्कर्यार्हो यथाऽभ्यर्चेत् तथा कुरु नमोनमः।

“पांचजन्य निजध्वान ध्वस्त पातक संचय।

शरणार्थिन् भवेत्सद्यः श्रीमत्पादयुगार्चने।

कैङ्कर्यंदेहिदेवेश! दीनस्यशरणार्थिनः

प्रताप्य शङ्खचक्राभ्यां मङ्कयेद्भुज मूलयोः।४०

पवित्रेण विशुद्धात्मा यदि हीनकुलोद्भवः।

द्वयाधिकारी भवति पूज्योवन्द्योऽमरैरपि।

चक्राङ्कितस्य देहोऽयं यत्र कुत्र पतेदिह।

तत्रैवतीर्थं भवति यत्तत्तिर्थं कळेबरम्।

वैष्णवस्यैकमेवात्मा स्वात्मानं प्रपुनाति हि।

दर्शनस्पर्शन ध्यानाद्देहःपातकिनो बहून्।

शङ्खचक्राङ्कितंगात्रं दययाभाजनं हरेः।

अतिवर्तितुमप्येनं न भवंति यमादयः।

संबंधादेवसंसिद्धिः तीर्थानां मुनिभिस्स्मृता।

चक्रलांछितदेहस्य बंधोस्ति मरणावधिः।45

मृतं शरीरं विप्रस्य शङ्खचक्रादि लांछितम्।

न संत्यज्यति देवेशः सत्यं सत्यं वदाम्यहम्।

"उत्कलेषु पुरा कश्चित् ब्राह्मणो गौतमान्वयः।

सोमशर्मेति विख्यातो वेदवेदाङ्गपारगः।

स्वाध्यायशीलो निरतः अग्निहोत्रपरस्सदा।

अन्यदेवसमंदेवं मनुते पुरुषोत्तमम्।

अन्यशेषेण देवेशं विष्णुशेषेणचापरम्।

यजते निर्विशेषेण शिवशक्ति महेश्वरान्।

तेषां कृपाविशेषेण जातस्सर्व समृद्धिमान्।

पराजयेन शत्रुभ्यो न भयं राजदस्युतः।50

निर्वेदोनाभवत्तस्य नानाकामहतात्मनः।

रजसा घोरसंकल्पात् तमसाऽऽलस्यपीडिताः।

भवन्ति पुरुषो विप्र ! विना सत्वनिषेवणात्।

तस्यां तस्यमदोद्रेको जातो निरयवर्द्धनः।

परदाररतश्चासीत्परद्रोह परायणः।

परनिंदासमासीनो विच्युताच्युत चिन्तनः।

लोभेन परिभूतस्य नित्यनैमित्तिकोत्सवाः।

विनष्टा नष्टभावस्य यौवनं जरया यथा।

एवं विनष्टधर्मस्य पापेनाऽभिहतस्य च। 55

राजभिर्दस्युभिस्तस्य विनष्टास्सर्व संपदः।

स्वजनैश्चपरित्यक्तो जायापुत्र समन्वितः।

वृत्यर्थं पर्यटन्मूडो मागधं देशमाश्रितः।

प्रलुप्त नित्यकर्मत्वान्निरतो हि महावने।

मृतस्सर्पेण संदष्टः प्रेतयोनिमवाप सः।

जायापुत्रौमृतंदृष्ट्वा नष्टधर्मकळेभरम्।

संस्कृत्यविपिनेनास्तां कर्तुं पित्र्यमलं द्विज।

स च प्रेतःक्षुधाव्याप्तो गच्छन्तौ वनितात्मजौ।

जघास निर्दयस्तौ च प्रेतयोनि मुपस्थितौ।

त्रायन्ते प्रेततां प्राप्ता बलात्पान्थजनान् बहून्। 60

जघ्नुस्ते ते समभवन् प्रेताः प्रेताशिनो जनाः।

कस्याश्चित्सरितो दृष्ट्वा तीरेऽश्वत्थ तरुंच तैः।

निवासमकरोत्तत्र प्रेतैः परिवृतोह्यसौ।

एवं निवसतस्तस्य प्रेतरूप हतद्युतेः।

गतो बहुतिथःकाल औत्कले यस्यसुव्रत।

कोपि बृन्दावनाद्विप्रः प्रवृत्तो नीलपर्वतम्।

द्रष्टुं नारायणो यत्र नित्यंसन्निहितो द्विज।

ब्राह्मणो हरिशर्मेति वैष्णवस्ससुतो मुनिः।

संतप्तचक्रपूतांगः तुळसीमालयायुतः।

नारायणं जगन्नाथमनन्येनान्तरात्मना।

सेवते परयाभक्त्या यया संप्राप्यते हरिः।

आगतस्सरितस्तीरे विप्रो मार्गवशादयम्।

हरिशर्म महाभागो मागधं तीर्थतांनयन्।

मृतःकालवशात्तत्र नारायणमनुस्मरन्।

दग्धं पुत्रेण तद्गात्रं नीत्वाऽश्वत्थतले महत्।

तद्गात्र धूमसंपर्कात्सोमशर्मा महाबलः।

विमुक्तः कर्मपाशेन स पुत्रो भार्यया सह।

प्रेतास्त्वन्येगताः केचिद्विहर्तुं च दिगन्तरे।

विमुक्तःकर्मपाशेन तावत्प्रेताधिपो भवत्।

प्रदक्षिणीकृत्यतमं हुताशनगतां मुनेः।70

प्रणाममुदायुक्तः साष्टांगमवनीतले।

स प्राप दर्शनादस्य जन्मान्तरगतां स्मृतिम्।

अन्यदेवसमत्वेन यो भजद्गरुडध्वजम्।

निरीक्ष्य तत्सुतस्सद्यः कोयमश्वत्थभूरुहात्।

अवतीर्यसमायातः पितुर्देहं सभाजयन्।

केयंस्त्री कः कुमारोऽयं केऽन्येस्ववान्सीनो यथा।

जयशब्दं नमश्शब्दं कुर्वंतःपरितश्चिताम्।

कौतुकेन समाविष्टः पप्रच्छ पितुरंतिके।

के यूयं मत्पितुर्गात्रं ज्वलितं परितस्थिताः।

सोमशर्म उवाच--

वयं प्रेतगणा वत्स! हरिभक्तावमानिनः।75

विष्णौ सामान्यबुद्ध्याऽहं प्रेतेषु गुरुतांगतः।

मदंगसंश्रयादेते पान्थाःप्रेतत्वमागताः।

गता हि बहवोऽस्माकं हयनाःशाश्वतीस्समाः।

सोपायमिह संप्राप्ता दग्धाः कोपाग्निना हरेः।

धूमेनाऽनेनमुक्ता हि तिष्ठामो भार्ययासह।

अयं मे तनयो मोहन्मया व्यापादितोऽनया।

मात्रासह महाभाग स्मृतिर्मे दर्शनादभूत्।

वेदाध्ययनसंपन्नः सोमशर्मा पुराऽभवम्।

नानादेवैक निरतो विष्णुभक्ति विवर्जितः।

सुरामिषपशुव्रातैरर्चिता चण्डिका मया।80

बलिदानकृतंकाले तर्पिताभूतभैरवाः।

विष्णुसामान्यबुद्ध्या मे द्वारदेवेषुपूजितः।

हसितावैष्णवाःनित्यं शङ्खचक्रांकधारिणः।

श्रद्धया पादतीर्थं मे न धृतं वदनांबुजे।

न देवःप्रणतो मूर्ध्ना हरिर्वैकुण्ठनायकः।

तामसानां हि देवानां सेवनं मनसाकृतं।

तेन कर्मविपाकेन प्रेतराजःपुराभवम्।

न जाने धूममाहात्म्यं कीदृशं ते पितुर्द्विज।85

आख्या हि पुत्र यदि ते विज्ञातंस्यादशेषतः।

पुत्र उवाच-

नाहमप्यत्रमाहात्म्यं प्रेतभाव विमोचनम्।

पितुर्धूमस्य जानामि केन जातं हि कर्मणा।

उभौप्रेतद्विजा तत्र मनसा पुरुषंपरम्।

जग्मतुः शरणं शीघ्रं संशयच्छेदनाय च।

तदानीमेव श्रीवत्स! वनमालीगदाधरः।

पीतवासाः चतुर्बाहुः संप्राप्तो गरुडाननः।

नमस्कृत स्तुतोदेवः ताभ्यां परमयामुदा।

पृष्टः प्रोवाच भगवान् मेघगंभीरया मुदा।

वैष्णवस्य तनुस्साक्षात्विष्णुरूपा मयोदिता।

निवसामि सदैवेह मच्चक्रेणांकिता यदि।

मच्चक्रपूत देहस्य यच्चपादोदकं महत्।90

विरजायाः समंविद्धि महापातकनाशनम्।

यावत्कळेबरे चक्रं स जीवस्यमृतस्य वा।

तावत्तिष्ठति मे तेजो नाशयद्यमकिंकरान्।

प्रेतत्वं नैवविद्येत मृतस्य ममशासनात्।

सूतकं नैव भवति स्पर्शदोषो न विद्यते।

लोकसंरक्षणार्थाय पुत्रैश्शिष्यैश्च बांधवैः।

कार्यो मदाज्ञयादाहो न तद्दष्यास्तु वै क्वचित्।

वैष्णवस्य शरीरस्य न दाहः क्रियते यदि।

न ते न दुर्गतिंगच्छेच्चक्रं तत्र प्रशास्ति हि।

सर्पव्याघ्रविषाघात चोरवारिविषूचिकाः।

चक्रांकितं दुर्गतिं न नयंति यमकिङ्कराः।

श्मशाने मागधेदेशे म्लेच्छदेशेत्यजांगणे।

मृतस्य चक्रदेहस्य सत्यं सत्यं न दुर्गतिः।

विष्णुभक्तशरीरस्य गंगाद्यास्सरितस्सदा।

सेवंते पार्षदाभूत्वा निजदोषापनुत्तये।

भिद्यते त्यजतेवास्यस्संस्कारो देहिनां तनौ।

चक्रचिह्नसमुद्भूत आजीवान्तं न मुंचति।

“ऊर्ध्वपुण्ड्रधरोबाहौ मच्चक्रकृतकेतनः।

तुळसीनळिनाक्षश्च मण्डितो वल्लभो मम।”

अतो विमुक्तिं संप्राप्ता वैष्णवांग विधूपिताः।100

प्रेतास्संबन्धिनोह्येते मद्भक्तस्य न संशयः।

काष्ठपाषाणरचित गृहोपकरणानि हि।

पुनंति चक्रयुक्तानि न कुतो वैष्णवी तनुः।

पक्वान्नं चक्रसंयुक्तं सेवितं पुरुषेण हि।

प्रयच्छति मनश्शुद्धिं महापातकिनामपि।

दासीदासाश्च भृत्यश्च चिह्निता चक्रवह्निना।

शुद्धं भवन्ति विप्राणां परिचर्यादिकर्मसु।

माधुरंमण्डलंपुण्यं तत्र बृन्दावनं परम्।

तत्रापि वैष्णवत्वं हि तत्रैकान्तित्वमुत्तमम्।

एकान्त्ययं मम प्रेष्ठःपिता ते द्विजसत्तमः।105

तत्संबंधादि मे प्रेता मुक्तानात्र विचारणा।

इत्युक्त्वांतर्हितो देवः प्रेतो वैमानिकोऽभवत्।

सभार्यास्ससुतो हृष्टो दृष्ट्वा वैकुण्ठनायकम्।

स च विप्रोमुदायुक्तः श्रीबृन्दावनमाययौ।

श्रीबृन्दावनमाहात्म्यं श्रुत्वाचैकांति वैभवम्।

पूर्णार्थौ दर्शनाद्विष्णोः नीलाद्रिं प्रणिपत्य च।

एषा श्रीवत्स! संशुद्धिः चक्रेण कथिता तव।

दिग्भ्यस्समागताः प्रेता अश्वत्थमवलोक्य च।

तर्कयामासुरत्यंतचिन्ताकुलित चेतनः।

क्वगतस्सगणोऽस्माकं प्रेतराजो महाबलः।110

निर्दोषो दृश्यते वृक्षो विजनेकस्समागतः।

निर्धूमांगारनिचयां चितामालोक्य सत्वरम्।

आजग्मुस्वैरितास्तत्र तामन्वेष्टुमितस्ततः।

प्रायःकेनापि न स्वामि मन्त्रज्ञेन विपश्चिता।

निर्दग्धस्सगणस्तस्य चितैषा प्रतिभाति हि।

वयमत्र प्रवेक्ष्यामो वृधा किं जीवितेन सः।

अनाधानामिवार्तानां वणिजां पोतवाहिनाम्।

सिन्धौ विनष्टपोतानां गच्छतां त्राणकांक्षिणाम्।

प्रविष्टा भस्मसंश्लेषात्सद्यो मुक्त कळेबराः।

विमानवरमारुह्य तेपिसर्वे दिवंययुः॥ ११५

इति श्री बृहद्ब्रह्मसंहितायां प्रथमेपादे

**तापसंस्कारकथनं** नाम पंचमोऽध्यायः।

## षष्टम अध्याये

## अष्टाक्षरमाहात्म्यम्

श्री नारायण उवाच

मन्त्रराजस्य माहात्म्यं श्रीवत्स! ह्यवधारय।

मननात्त्रायते यस्मात्तस्मान्मन्त्र उदाहृतः।

ओंकाराद्यो महामन्त्रो राजतेमन्त्रराजिषु।

वस्वक्षरोऽर्धदः पुम्सां द्वितीयःकल्पपादपः।

कल्पवृक्षः कामधेनुः चिन्तामणिमुखानि किम्।

अनुकुर्वन्ति श्रीवत्समन्त्रराजं विमुक्तिदम्। !

सार्धकोटिमहामन्त्रा नानाशक्तिसमन्विताः।

सेवका इव सेवंते मन्त्रराजं दिवानिशम्।

यथा नारायणंदेवं त्रयस्त्रिंशत्तु कोटयः।

उपासते तत्र हा सर्वे मन्त्रमष्टाक्षरं द्विज।5

ऋषिर्नारायणोऽहं वै देवता च श्रियःपतिः।

बीजमोंकार इत्याहुरैश्वर्यं शक्तिरेव च।

साध्यो नारायणस्साक्षात्सर्वाधारो बृहद्गुणः।

श्रीवैकुण्ठमहालीला नायको विश्ववन्दितः।

स्वरूपभूतकैंकर्ये विनियोगो मनोर्मतः।

धर्मार्थकाममोक्षेषु क्वापि क्वामानुसारथः।

महापद्मादिनिधयो ह्यणिमाद्यश्च सिद्धयः।

मन्त्रराजस्यपुरतः चरंति सचिवा इव।

स देवादानवानैव यक्षराक्षसगुह्यकाः।

न चाभिभवितुं शक्ता मन्त्रराजपरायणम्।10

त्रिपदो मन्त्रराजोयं वसुवर्णा विभूषितम्।

ये जपंति महाभागस्तेभ्यो नित्यं नमोनमः।

अकारेणाव्युकारेणमकारेण विभूषितम्।

ओमित्येकाक्षरं ब्रह्मा शिरोभूतं महामनोः।

अकारःपरमश्शेषी शेषभूताविहा परौ।

तयोराधारभूतो हि  निराधारो निरामयः।

स्वतन्त्रो वासुदेवाख्योऽविकृतःप्रकृतौ स्थितः।

व्यक्ताव्यक्त व्यवस्थायां भेदाभेदावुपैति हि।

अव्यक्तं प्रणवं ब्रह्मा व्यक्तमादित्रयं पृथक्।

तत्राद्योऽपरिणामी तु द्वितीयः परिणामवान्।

द्वयोरधीनःपुरुषः त्रितीयःपंचविम्शकः।

उकारेणविनिर्मुक्तो जीवो ब्रह्मात्मकस्स्वयम्।15

प्रकृत्याभिनिवेशेन साक्षात्परमपूरुषम्।

सोवैति पुरुषोजीवः पंचविम्शो महात्मकः।

आद्यश्चपुरुषःशेषी सच्चिदानंद लक्षणः।

स्वतन्त्रस्सर्वगःशश्वदात्मभूतो द्वयोर्मतः।

उपादिभूता प्रकृतिःचतुर्विंशति भेदभाक्।

अपरःपुरुषोज्ञेयो बद्धोमुक्तस्सनातनः।

चतुर्विंशतिभेदेषु कादिष्वनुगतो हरिः।

धारकोह्यात्यामभूतोसा वऽन्तर्यामितया स्थितः।

धार्यत्वेनस्थितास्सर्वे तनुभूताश्शरीरिणः।

क खादिसंज्ञादधते जीवयोगेनबीजताम्।20

क ख गादि विभागेन व्यक्तमेतत्त्रयात्मकम्।

प्रजप्तंमातृकायन्त्रे स बीजं सर्वकामदम्।

अप्रच्युतपदारूढं जीवब्रह्मैव केवलम्।

जपतामच्युतंधाम प्रयच्छति न संशयः।

ओमित्येकाक्षरं बीजं प्रकृत्या पुरुषेण च।

केवलं प्राकृतोजीवो जपतामखिलर्धिदः।

सर्वाधारोयमोंकारो बद्धमुक्तादि संश्रयः।

धर्मार्थकाममोक्षाणामेकः कल्पतरुस्स्मृतः।25

द्वाविमौ पुरुषौलोके सुपर्णाविवितिसंज्ञितौ।

कादिवृक्षलताविष्टौ भक्तिमुक्तिफलप्रदौ।

भोक्ता च भोजकश्चेको भोग्यभूतमथापरम्।

त्रिविधःपुरुषस्त्वेवन्मन्त्रमात्रेषु तिष्ठति।

भुनक्ति बिंदुरूपेण प्रकृतिं पुरुषाश्रिताम्।

केवलायां न भोगोस्ति जडत्वात्प्रकृतौ मनाक्।

केवलं पुरुषंपूर्णं अकाराक्षर संज्ञितम्।

भुनक्त्यपूर्णः पुरुषः पूर्णत्वं प्रतिपद्यते।

वालाग्रशतभागस्य शतधा कल्पितस्य च।

भोगोजीवस्य विज्ञेतास्सचानंत्याय कल्पते।30

विशत्यकारस्सर्वेषु सतारूपेण पुंगव।

मकारोबिंदुरूपेण परिस्फुरति रंजयन्।

भोग्यभूता हलस्सर्व उकारप्रकृतौस्थिताः।

कारणेप्रणवेसापि लीनाचोकार संज्ञया।

पुरुषोपि प्रकाशेन पावकः पंचविंशकः।

स्वरेण बिंदुरूपेण भगन्तमुपाश्रिताः।

स्वशेषभूतभूतीनामाश्रयः परमेश्वरः।

प्रणवाख्यःपरोदेवः उभयत्र च दीप्यति।

नचैश्वर्यं विना क्वापि सेव्यतेनोपदिश्यते।

ओमित्येकाक्षरंब्रह्म  व्याहरन् मामनुस्मरन्।

यःप्रयाति त्यजन् देहं स यातिपरमांगतिम्।

उपदेशोऽयमखिल श्रुतिस्मृतिभिरुच्यते।

फलंतूपाधि संत्यागः स्वरूपस्य परागतिः।

वत्सतेऽहं प्रवक्ष्यामि व्याख्यानं भगवद्गिरः। !

उपदेक्ष्याम्यहंचास्मै नरायार्जुन रूपिणे।

विशिष्टमपरैर्वर्णैः एकाक्षर मिहोच्यते।

अतो विशिष्टमद्वैतं वर्णेषु प्रणवो मतः।

प्रणवं व्याहरेत्प्राज्ञो मामेकं ब्रह्म संस्मरन्।

यदैकं चिदचिद्युक्तं बृहद्गुणयुतं तथा।४०

प्रणवब्रह्मणोरैक्यं वाच्यवाचक भावतः।

सूते स मातृकंविश्वं शब्दमेकाक्षरो मनुः।

यतश्चेमानिभूतानि जीवन्ति च यतःपुनः।

प्रलीयंते यतो यस्मिन् तद्ब्रह्मेति विदुर्बुधाः।

शक्तिरूपसमाधारे कार्यं तिष्ठति कारणे।

ततोऽवस्थान्तरं प्राप्य बहिरन्वेति पूर्ववत्।

शब्दब्रह्म परंब्रह्म द्वयं वै विश्वकारणम्।

शब्दब्रह्मसमाराध्य परंब्रह्मोधिगच्छति।

एवं ब्रह्मविदाप्नोतिपर मित्यनुशासनम्।

ब्रह्मविद्भवति ब्रह्मैवेत्येषा च पराश्रुतिः।

वाचकं तु पदंवाच्य प्राप्यं भोग्यं समाश्रयम्।

ब्रह्मेऽवगम्यतेसाक्षाद्विधूय प्रतिबंधकम्।

साधनं प्रणवाभ्यासो मम ध्यान समन्वितः।

आजीवं नैव भक्तिर्हि शरीरं प्रतिबन्धकम्।

त्यजन् देहं च यो याति स याति परमांगतिम्।

परमंपुरुषं दिव्यं कारणं चिदचिन्मयम्।

गतिं तस्य परं साम्यं याति प्राप्नोति मानवः।

तदा विद्वन् पुण्यपापे विधूयोपाधिवर्जितः।

उपैति परमं साम्यमिति वेदान्त निश्चयः।

साम्यं प्राप्नोति परमं प्रणवाभ्यास चिंतनैः।५०

स प्राप पुरुषंप्राप्यं तदा सर्वंनिरर्थकम्।

तत्प्राप्तौ च पुनर्वत्ससाधनं प्रणवानुग। !

भक्तिः कैवल्यभावेन यदा मामभिकाङ्क्षति।

अनन्यचेतास्सततं यो मां स्मरति नित्यशः।

तस्याहं सुलभो वत्सनित्ययुक्तस्य योगिनः।!

कैवल्याद्यखिलार्थेषु यस्य नो विशते मनुः।

अनन्यचेता भवति यो मामेवमनुस्मरन्।

तस्यैवाहं च सुलभो नान्ययोगयुजोपि हि।

यतो वै नित्यसंयोगो मयि तस्य प्रवर्तते।

मच्चिंतनमृतेनान्यत्साधनं विद्यते ततः।

अतस्तस्यार्थबोधाय द्वितीयं पदमुच्यते।

साधनांतरसंसिद्धिं नमश्शब्दो निरस्यति।

अहंकारपरित्यागो नमनैवोपपाद्यते।

ममत्वे तु मकारस्या न्नकारस्तन्निषेधने।

अतो नैवास्य कर्तव्यं केवलं शरणं विना।

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।"

इत्येवं नमसो ह्यर्थमुपदेक्ष्ये नराय च।

नरोयं स्व भरन्यासं मय्येव वितरिष्यति।

पारतन्त्र्यानुसंधानात् स्वस्य तच्छेषरूपिणः।60

कर्तृत्वं च कुतोयस्मा त्सर्वधर्मोपपादनम्।

अतो भगवताप्रोक्तं स्वकर्तृत्वं विहाय च।

मामेवं साधनंज्ञात्वा मदाज्ञापालनं कुरु।

मत्प्राप्तिप्रतिबंदेभ्यो ह्यहमेव विमोचिता।

माशुचस्सर्वपापेभ्यो सत्यं सत्यं वदाम्यहम्।

“सकृदेवप्रपन्नाय तवास्मीति च याच ते।

अभयं सर्व भूतेभ्यो ददाम्येतद्व्रतं मम।”

अथ प्राप्यं च भोग्यं च नारायण इतीरितम्।

नारं जीवसमूहोय मयनं तस्य यो भवेत्।

नारायणस्स भवति परमं प्राप्यमुच्यते।

स्वाधारमुत्तरं नैव गन्तव्यंविद्यते क्वचित्।

आधेयस्य सचाधार आधेयान्यस्सपुत्रक।

पक्षीणामयनंनीडं सर्वतश्चरतामपि।

नाराणामयनं तद्वदेष नारायणस्स्मृताः।

नराबद्धाश्च मुक्ताश्च केवलाचापि संस्मृताः।

सर्वेषामयनं साक्षाद्योऽसौ नारायणो हरिः।

नराज्जातानि तत्वानि नाराणीति जगौ श्रुतिः।

अयनं तत्र यस्साक्षात् आत्मानारायणोमतः।

य आत्मनीति वाक्येन ह्यन्तर्यामितयास्थितः।

प्रवर्तयति भूतानि कृतीनामाश्रया हि सः।७०

कार्याणामयनं साक्षाज्जीवस्य च परस्य च।

प्रकृतेरपि कालस्य सत्वस्य च परायणम्।

ज्ञानस्य धर्मभूतस्य ह्यैश्वर्यादिगुणस्य च।

आश्रयो वत्सनि !तरामेष एव नरोत्तमः।

यदेवचायनं साक्षादेषां निलयनं पदम्।

निलीय यत्र तिष्ठंति यस्मादेतत्प्रजायते॥

आधेयानामभावस्य न पदं परमेश्वरः।

किं तु सूक्ष्मस्वरूपस्य नामरूप बहिष्कृतेः।

स देव सोम्येदमग्रआसीदेवेति या श्रुतिः।

वदत्याश्रयनांनैव ह्याश्रितं सूक्ष्मतःस्थितम्।७५

अव्यक्तादसदेवेति शून्यमित्यपिचोच्यते।

नासच्छून्यमिदं वत्सबीजे ! वट इव स्थितम्।

कालेच्छाकर्मयोगेन त्रिगुणेन यदा पुनः।

प्राकृतं व्यक्तिमायाति कार्यंप्राक् सूक्ष्मतः स्थितम्।

केवलेशेच्छया नित्यमुक्तानां स्वात्मभक्तये।

अप्राकृतमिदं दिव्यं व्यक्तिमायाति शाश्वतम्।

प्राकृताऽप्राकृतानां च नित्यमुक्तात्मनामपि।

बद्धानां केवलानां च प्राप्य एव न संशयः।

प्रकृत्या सह संयोगः प्राकृतानां लयेषु च।

तथा प्रकृतिमुक्तानां साक्षाद्योगो निरूपितः।80

तत्र केवलिनामात्मा स्वरूपेण व्यवस्थितः।

भक्तानां दिव्यरूपेण भगवत्परिशीलनम्।

एवमाश्रयमाश्रित्य त्यजेदन्यत्प्रयोजनम्।

चतुर्थीनिर्दित्येत च्छ्रीवत्समनसा ! स्मर।

अनन्यार्हं च संबन्धं वक्ति प्रणव एव हि।

अनन्यसाधनं वक्ति द्वितीयं पदमुत्तमम्।

प्राप्यं नारायणायेति चतुर्थी द्विजसत्तम।

निर्दिशत्येषयुक्तानां तथाऽनन्य प्रयोजनम्।

फलश्रुतिः

एवं नारायणपरो मन्त्रराजमहर्निशम्।

योनुस्मरतिपूतात्मायाति विष्णोःपरंपदम्।

सायमेतदधीयानः पापं दिनकृतं महत्।

मध्यंदिनमधीयानः पापं प्रातःकृतं महत्।

प्रातरेतदधीयानः पापं रात्रिकृतं महत्।

भस्मीकरोति तत्सर्वं तूलराशिमिवाऽनलः।

ब्रह्महत्या सहस्राणि गुरुतल्पाधिरोहणम्।

स्वर्णस्तेयं सुरापानं तत्समानि बहूनि च।

अष्टाक्षरप्रजप्तारं चक्रशङ्खादि धारणम्।

दृष्ट्वा विलयमायांति नीहार इव गोपतिम्।

प्रजप्य मन्त्रराजेन जलमष्टोत्तरं शतम्।

प्रोक्षणात्कुशपत्रैश्च पिशाचस्तु विनश्यति।90

ब्रह्मराक्षसवेताळ कूश्माण्डग्रहजातयः।

नारायणायेतिमन्त्रेण पलायन्ते दिशोदश।

एकादश्यांव्रतं कृत्वा सहस्रतुळसीदळैः।

नारायणेनमनुना पूजयन्पुरुषोत्तमम्।

महापूजां प्रकुर्वीत रात्रौ जागरणं चरेत्।

अयुतं प्रजपेन्मन्त्रं  मन्त्रराजमनुत्तमम्।

द्वादश्यां चरुणा हुत्वा सहस्रं मधु सर्पिषा।

भोजयेत्परमान्नेन विप्रान् द्वादश संख्यया।

महाभागवतान् शान्तान् दक्षिणाभिः प्रपूज्य च।

प्रार्थयेन्मनसाऽभीष्टं वत्सरात्समवाप्नुयात्।

भ्रष्टोऽधिकारमाप्नोति वन्ध्या च लभते सुतम्।

गर्भिणी जनयेत्पुत्रं कन्याविंदन्ति सत्पतिम्।

महारोगात्प्रमुच्येत बद्धोमुच्येत बन्धनात्।

धनार्थी धनमाप्नोति विद्यामाप्नोति विस्तृताम्।

पुष्कलं ज्ञानमाप्नोति बुभुत्सुः प्रेमलक्षणम्।

निष्कामो भक्तिमाप्नोति संवत्सर विधानतः।

कार्तिके कमलाकान्तं कमलैर्लक्षसंख्यया।

वस्वक्षरेण संपूज्य स्वाभीष्टं साधयेन्नरः।

अन्तःकरण संशुद्धिमचिरात्समवाप्नुयात्।

जातिपुष्पैस्तु हवनात् कविर्भवति वत्सरात्। १००

नष्टबुद्धिश्चविकळो जडोबुद्धिमवाप्नुयात्।

<u>**अष्टोत्तरशतैः शंखैः दुग्धेनाऽऽपूरितेस्तथा।**</u>

<u>**तुळसीशर्करोपेतैः स्नापयेन्मनुनाऽमुना।**</u>

सहस्रनामभिः पुष्पैः पूजयेत्परमा धिया।

नैवेद्यं पायसं सर्पिःदत्वाभीष्टं सु साधयेत्।

दिनैर्द्वादशभी रोगान् मण्डलान्निगळे ग्रहात्।

मुच्यते वत्सराद्राज्यं प्राप्नुयाच्छत्रुभिर्हृतम्।

वस्वक्षरेण यो भुङ्क्ते प्रतिग्रासं द्विजोत्तम।

अश्वमेधसहस्राणि कलां नार्हन्ति षोडशीम्।

पङ्क्तिभोजनजाद्दोषादस्पृश्य स्पर्शनादपि।

अष्टवार जपादस्य मुच्यन्ते वैष्णवा नराः।

प्रतिग्रहाभवात्पापादयाज्यस्य च याजनात्।

यत्पापं जायते येषां तेषामष्टाक्षरो गतिः।

नारायणेति वदनाद्यस्य चोत्पाद्यते ध्वनिः।

तस्य पापानि नश्यंति वयांसीव घनध्वनेः।

श्रीवत्सबहुनोक्तेन किमिदानीमहामते। !108

इति श्री बृहद्ब्रह्मसंहितायां प्रथमेपादे

अष्टाक्षर वैभव कथनं नाम षष्टोऽध्यायः।

सप्तमोऽध्यायः

## <u>परमधर्म कथनम्</u>

श्री नारायण उवाच-

एवं नारायणमनुं समाराधयशाश्वतम्।

यदि गंतासिवैकुण्ठं यत्रास्ते पुरुषोत्तमः।

द्वयमावर्तयेन्नित्य मनुसंधानमाचरन्।

नान्यदेवांतराकाङ्क्षा प्रपन्नस्यमहात्मनः।

द्वयं द्विषद्पदं प्रोक्तं पंचविंशाक्षरंद्विज।

गृहाणदेवनिर्मुक्तो जायते मम शासनात्।

अष्टाक्षरं द्वयं चैव यस्य चेतसिवर्तते।

स मनुष्यो न विज्ञेयः पार्षदःप्रवरो हरेः।

नवाक्षरंपदंत्वाद्यं द्वितीयं त्र्यक्षरं मतम्।

त्रितीयं त्र्यक्षरं चैव चतुर्थं त्र्यक्षरं तथा।५

पंचाक्षरं पञ्चमं तु चरमं द्व्यक्षरं मतम्।

अष्टाक्षरं तु त्रिपदं चरमं द्वादशात्मकम्।

प्रपन्नानां धनमिदं पाथेयं मुक्तिमिच्छताम्।

द्वयं त्रयं च चरमं संज्ञेयंद्विजसत्तम।

व्यापकानां च मन्त्राणां विज्ञेया मम पुत्रक।

कर्मज्ञानोपासनाख्या साध्योपायाःप्रकीर्तिताः।

सिद्धोपायस्तु चरमो निर्दिष्टःकृपयामया।

वैष्णवो हि परोधर्मो वत्स! वेदेषुनिश्चितः।

विष्णोस्सकाशादुद्भूतं जगदेतच्चराचरम्। 10

विष्णोश्चतुर्मुखोजातः तस्मात्पंचमुखो मतः।

सहस्त्रशीर्षापुरुषो विराड्वै समपद्यत।

योऽवष्टभ्यत्विदं सर्वं सत्यलोकेविराजते।

गुणावतारोलोकानां हिताय पुरुषोत्तमः।

यत्र ब्रह्मादयो देवा उपासां चक्रिरे मुदा।

सगुणःपुरुषो विष्णुःश्रीभूनीळा समाश्रयः।

तत्र साधारणोधर्मो नानादेवैश्चसिध्यति।

अदृश्ये भावनातीते गुणत्रयविवर्जिते।

वासुदेवे भगवति सत्वद्रव्यशरीरिणि।

अनन्यभावयोगेन भावनानोपजायते।15

अर्च्यतेसाधनधिया हरिर्यज्ञांगरूपवान्।

तेनापूर्वं हि भवति स एव परमेश्वरः।

प्रयच्छति स एवास्य सुखंस्वर्गादिकंपरम्।

धर्मादर्थश्च कामश्च धर्मश्चैषप्रवृत्तिदः।

प्रयोजनान्तरंहित्वा तेनैवपुरुषोत्तमः।

पूज्यतेयज्ञपुरुषो वैष्णवोधर्म उच्यते।

एष साधारणोधर्मो निष्कामो ज्ञानवर्धनः।

तस्मादुत्पद्यतेचान्यो धर्मो भागवतोमहान्।

ज्ञात्वा भगवतो रूपं सर्वत्रास्तितयास्थितम्।

धारकः प्रेरकस्साक्षाद्वासुदेवस्सनातनः।20

सर्वानंदमयोनित्यो नित्यलीलानिकेतनः।

सर्वावधिस्सर्वशेषी सर्ववेदान्त संमतः।

तस्मादन्यन्नोक्तरूपं मया कार्यमिदं जगत्।

अनित्यं मृगतृष्णाभं गन्धर्व नगरोपमम्।

कर्तृत्वं च फलं हित्वा ममेदमितिकर्मणि।

कुर्याद्वेदोदितंकर्म वैष्णवंतत्प्रकीर्तितम्।

श्रवणादीनि कर्माणि विष्णोरेव करोति यः।

वत्सैषवैष्णवोधर्मः श्रोतव्यादि श्रुतीरितः।

एवं साधारणाधर्मा वैष्णवा बह्वो मताः।

संबन्धापादनं विष्णोरसाधारणमुच्यते।25

दासोभूत्वा यजेद्देवं पंचसंस्कार संस्कृतः।

वैष्णवः परमैकान्तीह्येकांतीति त्रिधामतः।

श्रीवत्स उवाच-

वैष्णवः परमैकान्तीह्येकांती मे त्वयोदिताः।

तेषां लक्षणमाख्या हि नारायण नतोस्म्यहम्।

श्री नारायण उवाच-

देवान्तरं परित्यज्य श्रीविष्णुं शरणंगतः।

अकामो मोक्षकामो वा सकामो वा द्विजोत्तम।

विष्णौ च वैष्णवेष्वेव निबद्धहृदयस्सदा।

अन्तःकरण शुद्ध्यर्थं पञ्चरात्रानुसारतः।

श्रुतिस्मृत्युदितंधर्मं वर्णाश्रमविभागशः।

संसेवते विशुद्धात्मा गार्ह्यं कर्मपरित्यजेत्।30

मलिनीकरणंत्यक्त्वा लोकनिंदाकरं तथा।

प्रतिकूलमनुज्ञाप्तं सदाचार बहिष्कृतम्।

धृत्वा भागवतंवेषं जन्मकर्मोत्सवादिकम्।

करोति विमलप्राज्ञो वैष्णवः परमोमतः।

अयमेव तदात्मानं ज्ञात्वा देहादिवर्जितम्।

निर्लेपमक्षरं शुद्धं परिणामविवर्जितम्।

सच्चिदानंद मुन्मुक्त षड्वरङ्गमनामयम्।

अवस्थात्रयनिर्लिप्तं विकार रहितंधृवम्।

स्वरूपभूत विज्ञानमयमच्युत मस्फुटम्।

उपाधिभेदरहितं शांतं स्वप्रभयाततम्।35

उपाधिकृत संकोच रहितं स्फटिकोज्ज्वलम्।

सर्वेन्द्रियगुणाभासं सर्वेंद्रियविवर्जितम्।

अप्रधृष्य मनौपंय मप्रतर्क्यमगोचरम्।

स्वरूपभूतसामर्थ्यसंपन्नं सत्यविक्रमम्।

सत्यसंकल्पनित्यात्म गुणाश्रयमनुत्तमम्।

भगवच्छेषभूतं हि ज्ञात्वा पापात्प्रमुच्यते।

एवमात्मस्थितिं प्राप्य ह्यनात्मासंगवर्जिते।

एकांतेचात्मनो रूप एकांती संस्थितो बुधः।

देहधर्मैरसंस्पृष्टो मानामान विवर्जितः।

लोकसंग्रह मन्विच्छन्नित्यकर्म परायणः।40

विक्षेपहेतुमाज्ञाय प्रतिकूल विवर्जितः।

स्वात्मभूत निजाधार परमात्मपरायणः।
निवृत्तानात्मसंबन्धि जनसंगरतिस्सदा।
प्रतिकूलजनान्नादि पङ्क्तिभोजन वर्जितः।
आचार्योपासनरतो देहाऽहंकृति निर्गतः।
एकान्ती स्वस्वरूपस्थो मम प्रीतिकरोमतः।
परमैकान्तिसंविद्धि वत्स! स्वात्मानमच्युतम्।
स्वाधारभूतमद्वैतमक्षरब्रह्म संज्ञितम्।
सेवते परयाभक्त्या प्राप्य भोग्याधिया सदा।
देहादेकान्तभूतोयं प्रत्यगात्मा द्विजोत्तम।45
तस्मादेकांतभूतो हि परमात्मा सनातनः।
तस्यैव वदनोल्लास विश्रांत नयनाम्बुजः।
परमैकांतिकोज्ञेयः ममात्मा तस्यचाप्यहम्।
मद्ध्यानसुखविच्छेद क्षणसंजीवना क्षमः।
यस्यानंदकलालेश लीहोब्रह्मादयोऽमराः।
तस्यानंदनिधेर्भक्तिः परमैकांतितामता।
यस्य ज्ञानकलालेशा ज्ञानिनोऽखिलचेतनाः।
तस्य ज्ञाननिधेर्भक्तिः परमैकांतितामता।
यस्य कर्तृत्वसामर्थ्यात् कर्तारो जडचेतसः।

तस्य कर्त्रवधेर्भक्तिः परमैकांतितामता।50

चतुर्विंशतितत्वानां राशिभूतकळेबरात्।

क्षेत्रज्ञलक्षणात्तस्य धारकाधात्मनः परः।

षड्विंशको हरिस्साक्षात् परमात्मा परायणः।

कल्याणादिगुणोपेतो निर्गुणःप्रकृतेःपरः।

निरंजनो निरालंबो निर्विकारोनिरामयः।

वाङ्मनोऽगोचरैश्वर्यो नित्यमुक्त जनाश्रयः।

अविष्कृतमहालीलः कोटिब्रह्माण्ड नायकः।

शुद्धसत्वतनुश्रीमान् श्रीभूनीळापतिःप्रभुः।55

दिव्यायुधो दिव्यजनो दिव्यलोक कृतालयः।

दिव्यवाहनभूषाड्यो दिव्यभोगो महाप्रभुः।

यस्य लोकगुणांशानां विभूतीनामनेकशः।

प्राकृतेप्यनुभूयंते जनानां मुक्तिहेतवे।

सत्यलोकस्तथा श्वेतद्वीप दुग्दाब्धि संज्ञकाः।

द्वारका मधुराऽयोध्या श्रीरङ्गमलयाद्रयः।

लोकालोकाचलादग्रे तमसःपरतः परः।

नरेणसहितो यत्र सदैव निवसांयहम्।

यथाऽत्र तपसामुक्तो मुनिवेषधरो द्विज।

सर्वैश्वर्ययुतस्तत्र श्रीभूनीळा समन्वितः।60

तयोरेवांशभूता हि सितकृष्णरुचावुभौ।

अवतीर्य यदोर्वंशे भुवोभारं हरिष्यतः।

अनन्तगरुडादीनाम् स्थानानि च बहून्यपि।

वैकुण्ठस्यांशभूतानि ह्युपास्यानि मुमुक्षुभिः।

मोक्षस्यद्वारभूतानि तत्तन्मूर्ति प्रपत्तितः।

अदृश्ये निर्गुणेब्रह्मण्यनंते पुरुषोत्तम॥

वासुदेवे भगवति रतिरुत्पद्यते कथम्।

विना तद्वारभूतानां विभूतीनामुपासनम्।

महावैकुण्ठलोकस्य सत्यलोक उदाहृतः।

अंशभूतो हि वैकुण्ठः शुद्धसत्वगुणोद्भवः।65

वैकुण्ठो ब्रह्मलोकश्च द्विधाभिन्नो महामते।

वैकुण्ठे भगवान्विष्णुः ब्रह्मलोके विधिस्स्मृतः।

तत्र ब्रह्ममहाभागः परमैकांतिकोमतः।

अधिकारावधिप्राज्ञस्तदाज्ञां पालयन्स्थितः।

वैकुण्ठस्थं हरिं साक्षात्सेवते रमयासह।

आस्ते तस्मिन्निवसति महाभागवतोयतः।

ब्रह्मलोकं समाश्रित्य तिष्ठंति मुनयश्चिरम्।

हैरण्यगर्भाः पुरुषान्यासीनो विगतैषिणाः।

तेभ्यो भगवतोभक्तिं संदिशत्यनपायिनीम्।

अंते ते ब्रह्मणासाकं प्रविशंति परंपदम्।70

महावैकुण्ठलोकस्य वैकुण्ठोयन्महामते।

महाविभूतिभूतश्च साक्षान्नारायणाश्रयः।

इतश्च सनकादीनां शापाद्भूमिं गमिष्यतः।

जयश्च विजयश्चोभौ द्वारपौ भगवानिव।

न तद्भासयतेसूर्यो न शशांको न पावकः।

यद्गत्वा न निवर्तंते तद्धाम परमं मम।

श्वेतद्वीपाभिधं स्थानं द्वितीयं विष्टरं हरेः।

परमैकांतिनो यत्र सेवंते विगतैषणाः।

अनिंद्रिया निराहारमुक्तास्ते चंद्रवर्चसः।

क्षणाक्षिपक्ष्मसंपात वियोगसहनाक्षमाः।

कर्मणा न गतिर्यत्र प्राकृतानां च देहिनाम्।

न गतिर्योगिनां विप्र! परमैकांतिनां पदे।

श्वेतद्वीपाधिपंदेवं श्रीवत्सा सुकृतोज्ज्वल।

विद्धि मे प्राकृतिंसूक्ष्मां चिंतयामि निरंतरम्।

द्वारकाद्यामहापुर्यो वैकुण्ठांश समुद्भवाः।

परमैकान्तिनां स्थानं वासुदेवेऽखिलात्मनि।

यो यस्य तस्य सोप्यस्ति किं बहूक्तेन पुत्रक।

वैष्णवःकर्मनिष्टश्चेज्ज्ञानयोग समन्वितः।

अंतर्यामिस्वरूपेण कर्मणा पूजयेद्धरिम्।80

अंतर्यामितया कर्मकुर्वतां कर्मिणामिह।

ब्रह्मप्राप्तिर्विनिर्दिष्ठो ब्रह्मानुध्यानतो द्विज।

ब्रह्मार्पणं ब्रह्महविर्ब्रह्मकर्म समाधिना।

विष्णोरंगतयामे च यजंते भुविदेवताः।

तेपि तं यज्ञपुरुषं प्राप्नुवंति मनीषिणः।

एकेभगवतोदेवा न्नित्यमावरणेषु च।

उपासकास्ते कथिता वैष्णवा लोकपावनाः।

अनुसंधाननिरता ज्ञानिनो भगवत्पराः।

परमैकांतिनो ज्ञेयाः अखण्डध्यान धारणाः।85

आकारत्रयसंपन्नाः परमैकान्तिनो मताः।

धन्यास्सुदुर्लभोलोके नित्यं तेभ्यो नमो नमः।

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।

यतीनामपि सिद्धानां कश्चिन्मां वेत्तितत्वतः।

गृहस्थाश्च विरक्ताश्चाप्यार्तदृप्त विभेदतः।

प्रपन्नाभगवद्भक्ता द्विविधाःपरिकीर्तिताः।

त्यक्तलोकाविरक्ताश्च ज्ञानिनो द्विजसत्तमाः।

अद्वेषमाश्रिताश्शान्ता मामेकं पुरुषोत्तमम्।

भजन्ति ध्यानयोगेन परिचर्या परायणाः।

त्रिदण्डिनस्सोपवीता शिखिनोऽजिन संवृताः।90

उपासकाःकर्मिणश्च ज्ञानिनोपि द्विजोत्तम।

गृहस्ता बहवो याता नारायणपदालयम्।

**ध्रुवस्तूपासनेनैव जनकःकर्मवर्त्मना।**

**सनकाद्याश्च प्रह्लादो ज्ञानाद्यास्संति सद्गतिम्।**

भवन्तौ यदि नैर्गुण्यं स्थानं मम मनोरमम्।

कालव्याळविषास्पृष्टमखण्डं गंतुमिच्छतः।

सांख्ययोग विनिर्धूत माया यवनिकारतिः।

संप्राप्तात्मगतिस्तात शरणं याहि सद्गुरुम्।

त्वं तु निर्मुक्तविषयो योगेन द्विजसत्तम।

मुच्यसे विषयासक्तः श्रीमदाचार्य संश्रयः।95

कृताचार्य भरन्यासो नेहेताप्यन्यसाधनम्।

किं न संप्राप्यतेऽभीष्टमनङ्गगतिना यथा।

संप्राप्य दासवेषं त्वं भजयत्स्वामितामतिम्।

मच्छेषतामुपादत्स्व पारतन्त्र्यं विचिंतय।

नारायणपदांबोजं शरणं याहि मा चिरम्।

प्रतिकूलजनावासं मनसापि न संश्रय।

राजन्! त्वमपि संत्यक्त राज्यलक्ष्मीमदस्सदा।

अनुसंधत्स्व मामेकमात्मानं सर्व देहिनाम्।

भोग्यान्तरमतिं त्यक्त्वा साधनांतर संमतिम्।

स्वातन्त्र्यमन्यशेषत्वं हित्वा मच्छरणो भव।100

श्रीवत्सराजानावूचतुः-

जनकं सर्वलोकानामाधारममलद्युतिम्।

कंयानश्शरणं हित्वा त्रैलोक्यैकगुरुं हरिम्।

अविज्ञातोपि भूतानामन्तर्यामितयास्थितः।

देहेंद्रियमनःप्राणान् संयोजयसि कर्मसु।

अतस्त्वमेवसौ देव! मन्त्रराजं द्वयं तथा।

चरमं वैष्णवंभावं देहि दीनार्तिभञ्जन।

श्रीनारायण उवाच-

यद्येवं पावकेह्यस्मिन्स्तीर्थभूते मदंतिके।

स्नातामाराधवप्लुत्य भवंतौ शरणागतौ।

तौ तथा चक्रतुस्तस्मिन्ह्रदे पावकसंज्ञिते।

**स्वर्णघर्मानुवाकं** च पावमानं तथैव च।

पठन्तंपुरुषं कंचिदैक्षिषातां घनप्रभम्।

तौसूक्ते दधतुस्तस्मात् तस्मिन्नेव जले तदा।

तावुत्तीर्य ततस्तत्र श्रीविष्णोः दिव्यपार्षदान्।

समानवपुषश्शांतान् पीतकौशेय वाससः।

किरीटिनः कुण्डलिनः शंखचक्रगदाधरान्।

मालिनो विशदस्मेर शिशिरीकृतलोचनान्।

अदर्शतां श्रियस्सूक्तं पौरुषं सूक्तमुत्तमम्।

जपतःपरमाभक्त्या तावूचतुरथो हितान्।

भोभोश्चंद्रप्रतीकाश हासभासित दिङ्मुखाः।

के यूयमिहसंविष्टाः किं जपस्तु निरामयाः।110

किमिदं स्थानममलं मनो येन प्रसीदति।

इदं विज्ञातुमिच्छावो यदि योग्यं बृवन्तु नः।

इति श्री बृहद्ब्रह्मसंहितायां प्रथमेपादे

**परमधर्मोपाख्यानं** नाम सप्तमोऽध्यायः।

अष्टमोऽध्यायः

## <u>महालक्ष्मी समाराधनम्</u>

पार्षदा ऊचुः

वयं भूचारिणोजीवाः कोटिकल्पानुचारिणः।

भगवन्माययारुद्धाह्यस्म कल्पांतरेषु च।

नानाविधशरीराणि रचयंतस्स्व कर्मणा।

उपर्यधस्तलोकान् चरंतो दुःखभागिनः।

कदाचिद्दैवयोगेन प्रबुद्धाह्यभवाम च।

संगोभागवतस्यासीद्येनेमां प्रापिता गतिम्।

शुभाशुभविभागेन लोकोयंद्विविधो मतः।

शुभेनकर्मणालोकः शुभायमशुभोऽन्यथा।

कर्मजन्यमिदंसर्वमनित्यं प्राकृतं द्वयम्।

अद्वयं परमद्धाम त्रितीयंप्रकृतेःपरम्।

वैष्णवंलोकमित्याहुः सत्यंकर्मविवर्जितम्।

उपासनैकलभ्यन्तं मुक्तनित्यैरुपाश्रितम्।

ज्ञानिनां प्रेमयुक्तानां परमैकांतिनामसौ।

नारायणोजनैर्गम्यः श्रुतवन्तो वयंततः।

तदर्थमिह संप्राप्ताश्श्रीमन्नारायणाश्रमम्।

दीक्षांभागवतींप्राप्य हरेस्स्वेच्छानुसारतः।

सेवया भो महाभागौ गतानःकालसंततिः।

संप्राप्य रूपसादृश्यं मन्त्रराजःप्रभावतः।

एके तस्य विहाराय वाञ्छंतिद्रुमजन्मताम्।

येषांपुष्पस्त्रजो देवोवक्षसा धारयिष्यति।१०

एके विहारभूमित्वमाकाङ्क्षंति मनीषिणः।

यत्र श्रीचरणन्यासैः दंपतीविहरिष्यतः।

एके चंदनकर्पूरकेसरादि विभूतयः।

भवितुं तत्र वांछन्ति यास्तु देवोरमापतिः।

एके वीणामृदङ्गादि शय्यास्तरणभावनाम्।

इच्छन्ति प्रेमवशतो भगवत्प्रीतये सदा।

मयूरभृङ्गविहग हंससारस कोकिलाः।

इच्छामोभवितुं तत्र यत्र ***नैश्रेयसं वनम्**।

गायका नर्तकाश्चैव वादकाश्चानुभावकः।

वयं भवितुमिच्छामो दिव्यलीलासुधांबुधौ।15

वलयांगदबृङ्गार मञ्जीररशना हरेः।

मीनशैवालजं बालवालुका हर्म्यचत्वराः।

कदापि भगवत्सेवा वियोगोनोपसर्पतु।

इति हेतोर्महाभागौ सूक्ते द्वे दधतोऽनिशम्।

तिष्ठामोऽत्रवयं विप्रा निवृत्ताःकतिवासराः।

स्थले वैश्वानरे नाम वह्निबीजसमुद्भवे।

मन्त्रराजमविज्ञाय चक्रशङ्खांङ्कनं विना।

विना सूक्तद्वयं नास्त्यसिद्धिर्भवतिवैष्णवी।

श्रीवत्स राजानो ऊचतुः-

कृपयाकथयध्वं नौ सूक्ते द्वे ब्रह्मसाधने।

संराध्ये ते कथं चैते भगवत्पदसिद्धये।

किं नामनी च किं देवे विनियोगः कथं तयोः।

कथंचाराध्यते ताभ्यां भगवान् पुरुषोत्तमः।

त ऊचुः-

एको नारायणो देवः श्रीमान् कमललोचनः।

एका च परमा शक्तिः सर्वकार्यकरी हरेः।

अनंतशक्तिसंपन्ना सापरापरमेश्वरी।

संतिष्ठते सदा तस्मिन् स्वाश्रयोपुरुषोत्तमे।

शालिपोते यथा शालिः उष्णत्वं पावके यथा।

तथा हरौ रमासाक्षात्प्रभवे शशिसूर्ययोः।

नित्याऽनपायिनी शश्वद्विभिन्ना नैवदृश्यते।

कारणे सर्वजगतामाधारे पुरुषोत्तमे।25

सर्गादौ भिद्यतेरूपं तयोरेकंद्विधाकृतम्।

पांचोपनिषदंचैकं नादात्मकमथापरम्।

नादात्मकं तु यद्रूपं तत्तु बीजद्वयात्मकम्।

श्रीबीजं प्रणवं चैक मूलाधारेप्रतिष्ठितम्।

प्रणवं पौरुषं बीजं विद्धि तत्वत्रयात्मकम्।

श्रींबीजं तु श्रियःप्रोक्तं समस्तैश्वर्य साधनम्।

प्रणवावयवैस्सृष्टिः त्रिविधाद्विजसत्तम।

स्वरा हलस्तथान्तस्था नवभेदैःसमन्विताः।

वासुदेवस्संकर्षण प्रद्युम्नाह्यनिरुद्धकः।

चत्वारःकेशवाद्यश्च द्वादशस्वरमूर्तयः।30

एषा षोडशधासृष्टिः दिव्याश्रीविष्णुरूपिणी।

अकाररूपस्य हरेर्नित्येयं परमात्मनः।

हलस्तु प्रकृतेस्सृष्टिः उकाराक्षर संज्ञया।

चतुर्विंशति भेदेन कादिरूपाधरादिना।

पंचविम्शो मकारोयं पुरुषोनववर्णकः।

एवं हि पौरुषेबीजे स्थितं वर्णात्मकंजगत्।

वासुदेवादिमूर्तीनां चतस्रश्शक्तयस्तु याः।

तथैव केशवादीनां द्वादशाभिःप्रकीर्तिताः।

श्रीरूपा बीजभूतास्ता विज्ञेया मन्त्रपारगैः।

एवं षोडशधाभिन्नं श्रींबीजानामतश्शृणु।35

लक्ष्मीर्गिरा रतिश्चोषा वासुदेवादिशक्तयः।

*श्रीर्लक्ष्मीः कमलापद्मा पद्मिनी कमलालया।

रमा वृषाकपिर्धन्या पृथ्वी यज्ञा तथेंदिरा।

शक्तयः केशवादीनांसंप्रोक्तामुनिपुङ्गवैः।

उत्पत्तिस्थिति कर्तारौ बीजभूतौ सनातनौ।

आत्मानौ वाचकौवाच्यौ पंचोपनिषदात्मकौ।

संहारेकारणेकारे नादे व्याकृतरूपिणौ।

वाच्यावाच्यकृतालीनौ सर्वाधारेसनातने।

कार्यादौ निलयेस्वस्य सृष्ट्वा विश्वंहृदंबुजात्।

प्रविष्टःप्राणरूपेण ह्यन्तर्यामितया तथा।40

नादातीतं परंब्रह्म ह्यन्तर्यामितयास्थितम्।

नादात्मकंशब्दमयं प्राणरूपेणसंस्थितम्।

समष्टिव्यष्टिरूपेण ते रूपे परमात्मनः।

प्रतिदेहंस्थितोव्यष्ट्या समष्ट्यापरमेपदे।

छंदोरूपो हरेःपार्श्वमास्थितस्सस्तुवन्नमुम्।

तेनैवप्रोक्तवान् धर्मं परंचाऽपरमेव च।

परंभागवतंधर्मं यं निवृत्यात्मकंमतम्।

प्रवृत्तिलक्षणंचान्यदपरं धर्ममुच्यते।

तद्धर्मपालनायाथ मुनिभूपतिमूर्तिभृत्।

स्थापयामास लोकानां हितैषी भगवान् हरिः।45

कदाचिद्दंपती तौ तु रूपे द्वे परमाद्भुते।

दधतुःकृपया भूयो मूलमन्त्रेण दृष्टये।

वाग्भिष्षोडशभिर्लक्ष्मीः स्वरूपं जगृहेमुदा।

अष्टादशात्मकंरूपं भगवान् भूतभावनः।

श्रीसूक्तं प्रथमंप्रोक्तं द्वितीयं पौरुषंमतम्।

ऋषि तयोस्तु तावेव श्रींबीजं प्रणवं तथा।

छंदोऽनुष्टुप्समाख्यातं देवते ते च दंपती।

विनियोगस्तुसर्वत्र पुरुषार्थचतुष्टये।

सूक्तमूर्तिं परंब्रह्म सदोपास्यं मनीषिभिः।

आभ्यामाराधयेद्देवं श्रीमन्नारायणं मुदा।50

सर्वैरपि समाराध्यौ यद्यप्येदौ च दंपती।

वेदवाक्यैस्तथाप्येते सूक्तेसाधारणेद्वयोः।

विष्णोराराधनार्थाय पौरुषं सूक्तमुत्तमम्।

देव्या आराधनायैतच्छ्रीसूक्तं तु श्रियाकृतम्।

द्वेसूक्ते प्रातरुत्थाय स्मृत्वा मनसिदंपती।

पठेदनन्यशरणः परमैकांतितामियात्।

सूक्तयो स्तुतयोस्तावत् प्रकारद्वयमुत्तमम्।

उपधारय वक्ष्यामि यदि ते मनसिस्पृह।

तुला मकर मेषे वा शुक्रवारे विशेषतः।

अष्टमीदिनमारभ्य द्वादश्यान्तं प्रपूजयेत्।55

"क्षीराब्धितनयां देवीं रक्तांबोज निवासिनीम्।

महालक्ष्मीं महाविद्यां महाभय विनाशिनीम्।

नारायणांक संरूडां किशोरीं कनकप्रभाम्।

त्रिजगन्मातरं गौरीम् मातुलङ्गधरां श्रियम्।"'

सप्तम्यां प्रातरुत्थाय गुरुंनत्वा विधानतः।

अनुज्ञां देहि भगवन्! महालक्ष्म्याः प्रसाधने।

संपादय महाभाग! मण्डपंमणिवेदिकाम्।

पूजाद्रव्याणिसर्वाणि कुण्डं च यजनाय वै।

दत्तानुज्ञास्तुगुरुणा मन्त्रस्नानंविधाय च।

प्रणयेत्षोडशस्तम्भं मण्डपं वेदिकोज्ज्वलम्।६०

वरयेद्ब्राह्मणान् शुद्धान् महाभागवतान् शतम्।

पाठार्थं तु महादेव्याःसूक्तं वै लक्षवारतः।

पाठयेत्परयाभक्त्यात्वष्टम्या तु दिनत्रयम्।

पंचामृतेन संस्नाप्य पूजयेत्वाऽर्हणोत्तमैः।

पायसेन तु नैवेद्यं पक्वान्नैर्विविधैस्तथा।'

गंधपुष्पाक्षतैश्चैव स्तवनीराजनादिभिः।

रात्रौजागरणं कुर्यात् नृत्यगीत महोत्सवैः।

एकादशीमथारभ्य वह्निकार्यं समाचरेत्।

दशांशेन प्रजुहुयात् मूलमन्त्रेणवाग्जितः।

लक्षं प्रजुहुयाद्वापि पायसेन हविष्यभुक्।65

द्वादश्यां पूजयेत्सर्वान् वैष्णवान् भोजयेद् द्विजान्।

अंगावरणसंयुक्तां स यानायुधभूषणाम्।

पूजयेत्परया भक्त्या महालक्ष्मीमनन्यधीः।

सर्वान्कामानवाप्नोति निष्कामो मोक्षभाग्भवेत्।

प्रणवादिं ऋचंसंयग् लक्ष्मीसूक्तस्यवैष्णवः।

कल्पयेद्यजनेदेव्याः क्रमादावाहनादिषु।

वेद्यांप्रकल्पयेत्पीठं तत्र पद्मं तु संलिखेत्।

पूरयेद्विविधैर्वर्णैः तद्विधिंचावधारय।

भङ्क्षेषोडशधाक्षेत्रे चतुर्भिःमध्यमैःपदैः।

प्रागादिकैःप्रदेशैश्च विदधीतनवांबुजम्।70

मध्यमंकमलंकार्यमष्टपत्रं यथा शृणु।

चतुर्धाभ्रामयेत्सूत्रं वर्जयित्वाऽष्टमं बहिः।

कर्णिका केसरं पत्रं संधीपर्वेति च क्रमात्।

सूत्राणामंतरेभूयः क्षिपेत्सूत्राष्टकं तथा।

पद्मसंधिस्तु सूत्रेण दिक्क्रमेण दळाष्टकम्।

पद्मांतराणामष्टानामेवमेव विधिर्भवेत्।

बहिर्द्वारयुतंकोण शोभनादिकसंयुतम्।

चतुर्वर्णरजोयुक्तं **नवपद्मं प्रकल्पयेत्**।

तस्मिन्नावाहयेल्लक्ष्मीमन्तर्यागं विधाय हि।

हिरण्यवर्णां हरिणीं सुवर्णरजतस्त्रजाम्।

घटेसुवर्णघटिते राजते ताम्रजेपि वा।

मृण्मयेवापिसंपूर्णे दध्नाक्षीरेणवारिणा।

तत्र मामच्युतोत्संगे निविष्टां पद्ममालिनीम्।

"शरच्चंद्रसुधासार शिशिरस्मित शोभिताम्।

अनिर्देश्यामनौपम्यां अनंतां विश्वभाविनीम्।

आमोदमिवपुष्पाणां दिविस्थानां प्रभामिव।

न निष्क्रामयितुंशक्यामनन्यां पुरुषोत्तमात्।

नित्यानपायिनीमेव भावयित्वानिजांतरे।"

प्रसन्नवदनांगौरीं किशोरींकमलालयाम्।

चतुर्भुजांबुजकरां मातुलुंग करद्वयाम्।80

पद्मगर्भनिभांकान्तामसितायत लोचनाम्।

स्फुरत्कटककेयूर हारकुण्डलमण्डिताम्।

गंभीरनाभित्रिवळीं विभूषिततनूदराम्।

सुकर्कशदृडोत्तुङ्ग पीनवृत्तघनस्तनीम्।

चरद्विरेफ पटल समाक्रांतालकावळिम्।

आरक्ताधरबिंबांतर्लसन्मुक्ताफलद्विषाम्।

अर्धचंद्रललाटस्थ राजमानविशेषिकाम्।

सर्वलक्षण संपन्नां कृष्णकुंचित मूर्धजाम्।

वरदांपङ्कजकरां पद्ममालाविभूषिताम्।

विष्णुवामभुजाश्लिष्टां भक्ताभीष्टप्रदायिनीम्।

ध्यात्वेमांसंमुखीं कुर्यान्मन्त्रमूर्तिंसनातनीम्।"

घटस्तहेममूर्तौ ता मानयेत्पद्ममालिनीम्।

ऋग्भ्यां हिरण्यपूर्वाभ्यां प्रपद्येतहरिप्रियाम्।

सांत्वयेच्चपराभ्यां वै तद्भेदेनसंस्थिताम्।

पंचम्यां च प्रपन्नोयं प्रसन्नांभावयेद्धिया।

ततस्तामसितापाङ्गी मावाहनपुरस्सरम्।

मुद्राणांपंचकेनैव मूलमन्त्रेणमन्त्रवित्।

यजेज्ज्वलन सूर्येंदुमण्डले कमलालयाम्।

करन्यासंविना देहन्यासं देव्यां समाचरेत्।

ऋग्भिस्सूक्तस्यमूलेन मुक्ताभिःक्रमशोन्यसेत्।90

स्नानपीठेसमारोप्य पाद्याऽर्घ्याचमनीयकम्।

मधुपर्कंप्रदद्यात्तु दन्तकाष्ठादिपूर्वकम्।

सुगंधतैलसंसिक्तां मुहूर्तेन समन्विताम्।

कुर्यादानंदिनींदेवीं दीप्त्यादारयतीं तमः।

ततो नानाविधैस्स्नानै सर्वौषधिसमन्वितैः।

कषायगन्धदूर्वोद कुशोद कनकोदकैः।

तीर्थोदकैश्च शुद्धोदैः तथा पंचामृतेन च।

संस्नाप्य परमेशानीम् सुगंधोद्वर्तनेन ताम्।

उष्णोदकेन संस्नाप्य केशान्संशोध्य मुद्रया।

पुनराचमनं दत्वा वस्त्रेणाङ्गं प्रमृज्य च।९५

वस्त्रैर्नानाविधैर्देवीं भूषणैर्विविधैस्तथा।

सिंदूरालक्तकालेप नीलाञ्जन मुखैर्यजेत्।

प्रतिस्नानं प्रदातव्यं पाद्यार्घ्याचमनादिकम्।

नैमित्तिके विशेषेण विभवेसति सर्वदा।

गन्धतैलं च चूर्णं च शालिगोधूम संभवम्।

हरिद्राचूर्णसंमिश्र मिषत्पद्मकभावितम्।

उद्वर्तनार्थेनोदेन स्नानार्थं शालिसंयुतम्।

उष्णांबु चन्दनं चंद्रमिश्रितं लेपनार्थकम्।

क्षीरं दधिघृतंगव्यं मध्वेक्षवरसस्तथा।

सुगन्धामलकांभश्च लोध्रतोयं ततःपरम्।१००

रक्तचंदन तोयं च रजनीवारिचोत्तमम्।

ग्रंथिपर्णपयःपश्चात् ततश्च तगरोदकम्।

प्रियङ्गुजटिलांबश्च तथा सर्वौषधि जलम्॥

पत्रपुष्प फ़लाम्भांसि बीजगन्धोदकं तथा।

हेमरत्न सरित्तीर्थ केवलांबुनि च क्रमात्।

स्नानीयांबु समेतानि देयान्यंबून्यमूनि तु।

स्नानशिष्टांबु संपूर्णं हरिद्राशालि संभृतम्।

स्त्रगादिसंयुतंकुम्भं हस्तेकृत्वा परत्र तु।

सिद्धार्थैर्धूपयेत् पात्रं धारयित्वा तु मूर्धनि।

बहिःक्षिपेत्ततोदद्यात् सुधौतेचांगशाटिके।105

केशोदकापकर्षार्थमंबरं देहवारिहृत्।

अंतरीयोत्तरीये द्वे सुधौतेवाससी शुभे।

भाविते गंधधूपेन दद्याद्भद्रासनं ततः।

अलंकारासनं पश्चाद्देयं देव्यैर्मृदूत्तमम्।

तत्र सर्वंप्रदातव्यं अर्घ्यपाद्यादि पूर्ववत्।

विवेचनं तु केशानां कङ्कतेन प्रशोधनम्।

तैलेनमर्धनंमूर्ध्नि ततश्चूडोपकल्पनम्।

अलंक्रिया तु कर्तव्या मूलेनमनुनापृथक्।

कुंकुमागरु कस्तूरि कर्पूरक्षोद मिश्रितम्।

चंदनं तु प्रदातव्यं शीतलं सुखवर्धनम्।110

स्रजो नानाविधा देयास्सात्विकैःकुसुमैश्चिताः।

अंगरागं च हृदये दद्यादञ्जनमीक्षणे।

**सीमंताऽलंकृतिं** कुर्यादादर्शं दर्शयेत्ततः।

चामरव्यजने छत्रं गजांश्च परितोन्यसेत्।

ज्वलदंगारनिचये कृष्णागरुमनिंदितम्।

दाहयेद्धूमधाराभिः दिक्प्रांतमधिवासयन्।

ज्वालयेत्परितो दीपान् गवाज्येनमुदान्वितः।

नैवेद्यं पायसंशुद्धं राजतेभाजनेकृतम्।

घृतशर्करयोपेतं सितखण्डैरलंकृतम्।

अपूपमोदकाभीष्ट शाकराजिविराजितम्।115

हेमपात्रगतंनीरं उशीरशशिवासितम्।

एलाचूर्णमहामोदामोदितं च नवोद्धृतम्।

अवैष्णवजनास्पृष्ट मनवेक्ष्यमवैष्णवैः।

नीराजनादिना पूतमभूमिस्तं निवेदयेत्।

धेन्वाऽमृतीकृतंद्रव्यं प्रोक्षितंप्रोक्षणोदकैः।

मूलसंपुटितेनैव चास्त्रेणैवाभिरक्षितम्।

तुळसीमिश्रितं सर्वं घण्टां वामेन वादयन्।

निवेदयामि मन्त्रांते प्राणाहुतिमथाचरेत्।

किंचित्किंचित्मुखेदेयं ततः कबळमुद्रया।

ध्यायन् सावरणां देवीं नारायणकृताश्रयाम्। 120

ततश्चान्तःपटंदत्वा श्रीसूक्तंप्रजपन् बहिः।

मूलं षोडशवारेण मध्येनीरं निवेदयेत्।

दृष्टिदोषविघातार्थं दीपंपिष्टेणनिर्मितम्।

भ्रामयेत्सर्षपैर्युक्तं मृण्मयोत्तानपात्रगम्।

भोजनं भावयित्वाऽथ दत्वाऽऽपोशनमुत्तरम्।

करोपमर्धनंदेयं सुगन्धद्रव्यसंयुतम्।

स्वास्थानेस्थाप्य देवेशं तांबूलंपूगपूरितम्।

प्रदेयं परयाभक्त्या मुखवासनकंपरम्।

ततो मूलं महालक्ष्म्यै तुळसीकुसुमोज्ज्वलाम्।

कुसुमांजलिमादाय दद्याच्छिरसिपादयोः।

प्रदक्षिण नमस्कार क्षमापणगुणस्तवैः।

प्रतोष्य परयाभक्त्या निवेद्याऽथमनोरथम्।

संभोज्य परमान्नेन भक्त्याभागवतान् नरान्।

द्वादश्यां दक्षिणां दद्यात् गुरुं संपूजयेत्ततः।

एवं कृते महादेव्याः समाराधन कर्मणि।

अत्येतिदुष्कृतान्घोरान् परमानंदभाग्भवेत्।

इति श्री बृहद्ब्रह्मसंहितायां प्रथमेपादे श्रीवत्सचरिते श्रीसूक्ताविर्भावे

महालक्ष्मी समाराधनं नाम अष्टमोऽध्यायः।

नवमोऽध्यायः

## <u>महालक्ष्मी व्रताभिधानं</u>

पार्षदा ऊचुः-

व्रतं देव्याःप्रवक्ष्यामो वार्षिकं ह्यष्टरात्रिकम्।

सर्वेषामधिकारोसि वैष्णवानां विशेषतः।

अकृत्वा तु व्रतंदेव्या मासीभाद्रपदे सिते।

तामसींयोनिमाप्नोति दारिद्र्यमधिगच्छति।

शुक्लाष्टमीं समारभ्य जनःप्रौष्टपदस्य हि।

दंपत्योःपूजनं कुर्यात् घटस्थापन पूर्वकम्।

लक्ष्मीषोडशकंपूज्यं केशवादिसमन्वितम्।

प्रत्येकमेकप्रथिमं जयमङ्गळघोषणैः।

विधिं तस्य प्रवक्ष्यामि जीवानां हितकाम्यया।
यस्यानुष्ठानमात्रेण श्रीविष्णोर्वल्लभो भवेत्।५
शक्तयःकेशवादीनां द्वादशानां पृथक्पृथक्।
चतस्त्रोह्यनिरुद्धादि शक्तयःसमुदाहृताः।
एकैकाःप्रत्यहंपूज्या क्रमात्तत्पतिना सह।
ऋचात्वेकैकया तत्तन्नाममन्त्रेण पूजयेत्।
षोडशाप्यथवा पूज्याः प्रत्यहं विष्णुवल्लभाः।
महाराजोपचारेण महत्कृष्णाष्टमी भवेत्।
कुर्यात्षोडशधा शुद्धिमात्मनस्साधकोत्तमः।
उपचारैःषोडशभिः पृथग्भूतैः प्रपूजयेत्।
वरयेत्पुंप्रकृत्योस्तु द्वयंषोडश संख्यया।
संपूज्य भोजयेद्भक्त्या परमान्नेन वैष्णवान्।१०
प्रदक्षिणनमस्कार दक्षिणाऽऽभरणादिभिः।
प्रतोष्य सूक्तपाठं तु कारयेद्विभवे सति।
यथा षोडशसंख्याक दिवसैर्लक्षतामियात्।
अयुतं पाठयेद्वापि प्रत्यहं वा शतं शतम्।
न त्यजेत्पाठमेकं तु भयेपिसमुपस्थिते।
पाठाभावे प्रजप्तव्यः श्रियोमन्त्रष्षडक्षरः।

तेनैव पूजयेद्देवीं परिवारसमन्विताम्।

पूजार्थमथ नामानि तासां वक्ष्यामि तच्छृणु।

*श्रीर्लक्ष्मीः कमला पद्मा पद्मिनी कमलालया।

रमा वृषाकपिर्धन्या पृथ्वी यज्ञा तथेन्दिरा।15

***शक्तयः केशवादीनां महालक्ष्म्यांशमूर्तयः।***

उषारतिर्गिरा देवी लक्ष्मीर्ज्ञेया तु षोडशी।

एवं षोडशधा भिन्ना महालक्ष्मीस्तु या स्मृता।“

स तु सप्तदशीज्ञेया निर्मलाकारणात्मिका।

प्रथमेदिवसे देवी श्रीसंज्ञा केशवप्रिया।

समाराध्य घटेवेद्यामास्थिते मन्त्रपूजिते।

द्वितीयेदिवसे लक्ष्मीर् नारायणकृतालया।

त्रितीये कमलादेवी माधवेन समन्विता।

चतुर्थेदिवसे पद्मा गोविंदकृत केतना।

पञ्चमेपद्मिनी पूज्या विष्णुनाकमलालया।20

मधुसूदनसंयुक्ताषष्टे सप्तमके रमा।

त्रिविक्रमेण संपूज्या वृषाकपिरथाष्टमे।

वामनेन समंपूज्या नवमे श्रीधरेण च।

धन्यानाम्नि समाराध्या पृथ्वीं तु दशमे यजेत्।

हृषीकेशेन यज्ञाख्यां पद्मनाभेन रुद्रके।

इंदिराद्वादशेपूज्या दामोदर कृताश्रया।

त्रयोदश उषादेवीत्वनिरुद्धेन संयुता।

प्रद्युम्नेनरतिस्त्विंद्रे गिरां संकर्षणेन हि।

षोडशे दिवसेप्राप्ते सुधीर्लक्ष्मीं निशामुखे।

पूजयेद्वासुदेवेनस्वकेन मनुनामुदा।25

कदळीस्तंबसंवीते नववस्त्र विभूषिते।

मण्डपे पूजयेद्देवीं दिक्षुदिग्गज मण्डिते।

"अथ बिल्ववने देवीं चतुर्बाहु समन्विताम्।

चामरैर्वीज्यमानां च सिक्तामेनां कुशांबुभिः।

त्रिपाद्विभूतिनिलयां भूनीळाभ्यामुपासिताम्।

महालक्ष्मीं सप्तदशीं महाविष्णोश्च सन्निधौ।"

कलाभिश्च कलाभिश्च पूर्वोक्ताभिस्समंततः।

स्वयं सप्तदशी तत्र स्वाश्रया परमेश्वरी।

नित्यमुक्तैर्जनैर्गुप्ता लोकपालाङ्गणा गणैः।

आनंदकंदकमले निषण्णां ज्ञाननाळके।30

स्फुटत्प्रकृतिपत्रे च विकारमयकेसरे।

मातृकाकर्णिकेपूर्ण परानंद मधुव्रते।

परमात्मांतरात्मा च ज्ञानात्मपरिवारिते।

दिव्यतेजस्त्रयोपेते लक्ष्मीबीजवराटके।

महामाया महाविद्या महायोगिन्यधीश्वरी।

महालक्ष्मीर्महादेवी महाशक्तिर्महेश्वरी।

सर्वाधारमयाशांता कांता विष्णोर्यशस्विनी।

दिव्यायुधधरा देवी शंखचक्रगदाब्जभाक्।

यस्या अंशकळाभिश्च त्रिगुणाः कोटिशक्तयः।

स्वयं तु निर्गुणाशक्तिः नादातीता पराभिदा।35

मत्स्यादिशक्तयस्तत्र सात्विक्यःकार्यलक्षणाः।

उमाद्यास्तमसोद्रिक्ता गायत्र्याद्यास्तु राजसाः।

पालिका नाशिकास्त्वन्या जगदुत्पादन क्षमाः।

ताभिस्स्वांशकलाभिश्च सेव्यते परमेपदे।

अप्राकृताभिर्नित्याभिः केशवादिक शक्तिभिः।

दिव्यसृष्टिःप्रभूताभिः अप्रसूता समर्च्यते।

या कालकलनातीता गीताया सामागायकैः।

उमादितामासीमध्ये भैरवी काळिकादयः।

शक्तयः कोटिशस्संति यावत्यःपिशिताशनाः।

मध्यःप्रियाः कराळास्याः श्मशानकृत केतनाः।40

निष्कामैर्वा सकामैर्वा वैष्णवै र्न निरीक्षिताः।

सात्विक्यस्तु सदोपास्या वैष्णवै र्विष्णुनासमम्।

तत्र दुर्गासकामैस्तु कृष्णाधिष्टातृदेवता।

निष्कामै र्वैष्णवैस्सेव्या महालक्ष्मीर्हरिप्रिया।

नंदगोपगृहे जाता यशोदागर्भसंभवा।

किंचित्कार्यं समुद्दिश्य गोपवृद्धैस्तु पूजिता।

गोपीभिःकृष्णकामाभिः कृष्णाल्लब्धपरा यतः।

सूते सर्वार्थनिचयं जनैराराधिता सती।

सकामैर्वैष्णवैश्चाथ विष्णोराज्ञा पुरस्सरम्।

सात्विकैरुपहारैश्च चक्राद्यष्टभुजायुधा।

एकांतिनस्तु लक्ष्मीशं सेवंते रमया सह।

दीयमानं न गृह्णंति सालोक्यादि चतुष्टयम्।

सर्वविद्यामयीसाक्षात् निर्गुणा परमेपदे।

महालक्ष्मीर्महामाया पूजनीया हि षोडशी।

तस्य ध्यानं प्रवक्ष्यामि ह्यभिषेकविधिं तथा।

कृते यस्मिन् समाप्नोति शाश्वतंपदमुत्तमम्।

"विरजायाः परेपारे निर्गुणे परमेपदे।

नित्ये निरव्ययेरम्ये प्राकृतैः परिवर्जिते।

नित्यानंद महाधाम्नि वनंदिव्यं विचिंतयेत्।

सर्वैश्वर्य बलज्ञानमय भूरुहमण्डितम्।50

चंपकाशोकपुन्नाग पाटलैरुपशोभितम्।

लवंगमाधवीबिल्व देवदारुनमेरुभिः।

मंदारपारिजाताद्यैः कल्पवृक्षैः सुपुष्पकैः।

चंदनैः कर्णिकारैश्च मातुलङ्गैश्च वंजुळैः।

दाडिमी लिकुचांकोलैः पूगैःकुरवकैरपि।

कदळीकुंदमंदार नाळिकेरैरनुत्तमैः।

मालती मल्लिकाजाति केतकी शतपत्रकैः।

वासंति तुळसी नन्द्यावर्तैःर्दमनकैरपि।

सर्वत्रकुसुमोपेतैः नमद्भिरुपशोभितम्।

मन्दमारुतसंभिन्न कुसुमामोदि दिङ्मुखम्।55

तन्मध्ये तटिनीतीरं महामंदारमण्डलम्।

सुवर्णकमलोद्यान भ्रमद्भ्रमरनादितम्।

कुमुदोत्पलकल्हार पंकजैरुपशोभितम्।

मारुतोद्धूपनोद्भूत मकरंद घनोदयम्।

कूजद्विहङ्ग सन्नाद मुखरीकृत दिङ्मुखम्।

तत्र रत्नमयीभूमिः कोटियोजनविस्तृता।

कोटिसूर्येंदु वह्नीनां प्रभा यत्र विलीयते।

तत्र श्रीमंदिरं दिव्यं चतुर्द्वार समावृतम्।

नित्यसिद्धजनैर्नित्यं कृतसत्कारमुज्ज्वलम्।

रत्नोपक्लृप्तसंशोभि कवाटाष्टकसंपुटम्।60

नवरत्नसमाक्लृप्त तुंगगोपुरतोरणम्।

हेमदण्डशिखालंबि ध्वजावळि परिष्कृतम्।

नवरत्नसमाबद्ध स्तंभराजि विराजितम्।

सहस्रदीपसंयुक्त दीपदण्डविराजितम्।

तप्तहाटक संक्लृप्त वातायन मनोहरम्।

नानावर्णशुकाबद्ध सुवर्णध्वजकोटिभिः।

किंकिणीमालिकायुक्त पताकाभिरलंकृतम्।

भूतरूपमयैरत्न विचित्रैरतिविस्तृतैः।

माणिक्यवज्रवैडूर्य स्वर्णमालावळीयुतैः।

अन्तरान्तर संबंध रत्नैर्दृष्टिमनोहरैः।65

विचित्रैश्चित्रबद्धैश्च वितानैरुपशोभितम्।

सर्वरत्नसमायुक्त हेमकुट्टिममुज्ज्वलम्।

केतकीमालतीजाती चंपकोत्पल केसरैः।

मल्लिकातुळसीकुन्द नन्द्यावर्त कदंबकैः।

एतैरन्यैश्चकुसुमैरलंकृत महीतलम्।

अब्जकाश्मीरकर्पूर मृगनाभि तमालकैः।

चंदनागरु तक्कोलैर्विमोहित दिगंतरम्।

एवं **<u>संचिन्त्यमनसा</u>** मण्डपं सु मनोहरम्।

तन्मध्ये भावयेन्मन्त्री पारिजातंमनोहरम्।

तस्याऽधस्तात् स्मरेन्मन्त्री रत्नसिह्मासनं महत्।70

तस्मिन्सिह्मासनेदिव्या यन्त्रं संचिंतयेन्मुदा।

षट्कोणाष्टदळं बाह्ये भूपुरद्वारसंयुतम्।

मध्ये तु भावयेद्बीजं रमायाः प्रणवान्तरम्।

तस्मिन् सुधांशुशतदीधिति शुद्धहास- माशागजैरुभयतः परिषिच्यमानाम्।

ब्रह्मादिदेवरमणी मणिगीतकीर्तिं - संकल्प कल्पितदयार्द्र कटाक्षपाताम्।

दाहाभिभूतहृतदोष हिरण्यवर्णां कर्णांतपाति नयनांबुज वीक्षणीयाम्।

संकल्पनिर्गतमुखांबुजमुग्धगंध मत्तालिजालमुखरीकृत गण्डसीमाम्।

मुक्ताच्छगुच्छदवळीकृतकर्णमूलां मूलामनोजविकृतेः पुरुषोत्तमस्य।

सत्पद्मरागमणिकल्पितकर्णपूरां पूरायितामतिसुखोद सरिद्वरामः।

भ्रूवल्लि तर्जितरतीश मदामदांत दूरातिदूर पदपल्लव मुग्धशोभाम्।

स्निग्दालकाळिजितसाळि सरोजभास्व दास्यामनन्यमति संश्रित पद्मनाभाम्।

अर्धेंदुमण्डल ललाट तटोदिताभ माणिक्यभूषणमयाच्छ विशेषकाभाम्।

निर्भिन्न नीळमणिभंग विभिन्नकांति बालाभिरामकचभार लसच्छिरस्काम्।

सीमंतगर्भ विनिविष्टसितांशुतार धारापगाप परिमार्जित कृष्णताराम्।

चूडाग्रबद्धमणिनद्ध विभूषनार्चिर् भास्वन्मयूखविकचीकृत हृत्सरोजाम्।

नानामणिप्रकर मण्डित कंबुकण्ठी मुन्निद्रकांतिचय मौक्तिक दामशोभाम्।

स्वर्णारविंद मुकुळोन्नत कुंकुमोत्थ दिव्याङ्गराग परिमृष्ट कुचप्रदेशाम्।

हेमारविंदवलयांगद बाहुयुग्मां सन्मातुलुङ्ग विलसद्वय पाणिपद्माम्।

क्षामोदरोपरिलसत्त्रिवळीतरंगा मंकाधिरूढ पुरुषोत्तम केळिहस्ताम्।

कांचीकलाप मुखरीकृतमध्यभागा मारापबोधन निरूपित नूपुराभाम्।

पादारविंदविगळन्मकरंदबिंदु संमोहिताळिमुनिबृन्द सुगीत गीताम्।

संचिन्तयेच्च जलजात कृताधिवासां वैकुण्ठनाथ रमणीमनुनीय वाचा।

यंत्रे निवेश्य कुसुमासुमांजलिना सखीभिः सीमन्तिनीभिरभितः परितोष्यमाणाम्।

इति श्री बृहद्ब्रह्मसंहितायां प्रथमेपादे

श्रीवत्सचरिते श्रीसूक्ताविर्भावे <u>**महालक्ष्मी व्रताभिधानं**</u> नाम नवमोऽध्यायः।

## दशमोऽध्यायः

## महालक्ष्मीव्रतभिधानम् - २

द्वारेषु पाठकौ स्थाप्यौ द्वौ द्वौ देव्याभिषेचने।

लक्ष्मीसूक्तं प्रजप्तव्यं यावत्स्यादभिषेचनम्।

आवाहनादिकं कृत्वा भद्रपीठे हरिप्रियाम्।

सन्निवेश्यवरारोहां सूक्तन्यासं समाचरेत्।

शरीरेस्वस्य देव्याश्च भूतशुद्धिपुरस्सरम्।

मन्त्रन्यासं स बीजं च जितवाग्विमलाशयः।

स्थापयेत्कलशंभक्त्या ह्यभिषेचनिकं परम्।

शतैकं षोडशाष्टौ च कार्यमुद्दिश्य भक्तितः।

एकमेव तथा कुम्भं निष्कामो नित्यकर्मणि।

कृत्वा नवपदात्मानंमण्डलं यत्र भूषितम्।५

कलशान् स्थापयेत्तेषुपदेषु शुभलक्षणान्।

मूलेनावोक्षणंकुर्यात् प्रोक्ष्यचास्त्रेण वर्मणा।

रक्षणं सर्वतःकृत्वा क्षाळणं चास्त्रतोजलैः।

सन्निवेश्य कुशाधारे वक्रं नैव पिधापयेत्।

ध्यात्वा तत्र महालक्ष्मीं कलशान् पूजयेत्क्रमात्।

चंदनालिप्तसर्वांगान् दूर्वाक्षत समन्वितान्।

दुकूलवेष्टितान् सर्वान् पूरयेत्तीर्थवारिभिः।

नवरत्नसमाबद्धं पङ्कजं स्वर्णनिर्मितम्।

मध्यकुम्भे क्षिपेद्धीमान् भक्त्याकर्ष प्रमाणकम्।

वित्तशाठ्यं न कुर्वीत पटे वा चंदनैर्लिखेत्। १०

मूलेनपूरयेत्तत्र चौषधीन् देवतामयाः।

चंदनोशीरकर्पूर जाति तक्कोल कुंकुमम्।

कोष्टागरुतमालैलायुतं संपिष्यभागतः।

विलोड्य सर्वकुम्भेषु रत्नान्यपि विनिक्षिपेत्।

लक्ष्मीं दूर्वां सदाभद्रां सदादेवीं मधुव्रताम्।

मुशलीं शक्रवल्लीं च कृत्वाऽपामार्ग पत्रकम्।

प्रियङ्गु मुद्गगोधूम व्रीहींश्च स तिलान्यवान्।

शालितण्डुल माषांश्च तेषु प्रक्षाळ्य निक्षिपेत्।

धात्रीलिकुच बिल्वानां कदळी नालिकेरया।

फलान्यपि विनिक्षिप्य पुष्पाण्यपि च निक्षिपेत्। १५

पद्मं सौगन्धिकं जातीं मल्लिकां वकुळां तथा।

चंपकाशोकपुन्नाग तुळसीकेतुकोद्भवम्।

पल्लवानि वटाश्वत्थ प्लक्षोदुम्बर शाखिनाम्।

ब्रह्मकूर्चं विनिक्षिप्य शरावैस्सकलाक्षतैः।

पिधाय कुम्भवक्त्राणि क्षौमैराच्छादयेत्ततः।

आवाह्य मध्यकलशे महालक्ष्मीं प्रपूजयेत्।

पूर्वोक्तस्नानसम्पन्नं वस्त्रालंकृतिभूषिताम्।

निषण्णां भद्रपीठे तु स्वस्तिवाचन पूर्वकम्।

षोडशब्राह्मणास्ते तु कुशैर्बिल्वदळैस्तथा।

दूर्वातुळसिकापत्रैः श्रीसूक्तैःपरमेश्वरीम्।२०

कुर्युस्सुमंगळी गीतै रभिषिक्तां महोत्सवैः।

अभिषिच्य महादेवीं परिवारसमन्विताम्।

अलंकुर्याद्विभूषाभिः धूपदीपादिभिस्तथा।

रात्रौ जागरणं गीतनृत्यवाद्यस्तवादिभिः।

षोडशीपूजनंचैव षोडशेदिवसे स्मृतम्।

सहस्रनामभिःतैस्तैः पुष्पबिल्वदळाक्षतैः।

दूर्वाभिः कुंकुमाक्ताभिरवकाशे पृथक्पृथक्।

पूजयेद्विष्णुनासाकं नाकंपश्यति कर्हिचित्।

य एवं वार्षिकीम्पूजां कुर्यात्प्रयतमानसः।

विनैवावरणान्यङ्गं देव्यास्संपूजयेत्क्रमात्।२५

हस्तप्रक्षाळनं कृत्वा प्रदेयः कुसुमांजलिः।

हृदयादि महामन्त्रै हृदयादीन् समर्चयेत्।

प्रथमावरणं ह्येतच्छ्रियःप्रोक्तं मनीषिभिः।

दळेष्वष्टसु संपूज्याः कुर्याद्या अग्निकोणतः।

द्वितीयावरणं ह्येतन्महालक्ष्म्यास्समीरितम्।

उमाद्यासंधिषु तथा संपूज्याः प्रयतात्मना।

उमा च श्री सरस्वत्यौ दुर्गा च धरणी तथा।

गायत्रीदेव्युषा चेति पद्महस्तास्समन्ततः।

त्रितीयावरणंह्येतत्ततो मत्स्यादिशक्तयः।३०

वेदा वेदवती धात्री महालक्ष्मी स्सुखालया।

भार्गवी च तथा सीता रेवती रुक्मिणी प्रभा।

मत्स्यकूर्मादि मूर्तीनां शक्तयस्संप्रकीर्तिताः।

चतुर्थावरणं ह्येतद्गंगा सूर्यसुतस्तथा।

शंखपद्मनिधीपूज्यौ पार्श्वयोर्धृतचामरौ।

धृतातपत्रं वरुणम् पूजयेत्पश्चिमे ततः।

संपूज्यराशीन् परितो यजेदथनवग्रहान्।

अर्चयेद्दिग्गजान् दिक्षु चतुर्दंतविभूषितान्।

ऐरावतः पुण्डरीकः वामनः कुसुमोंजनः।

पुष्पदन्तस्सार्वभौमः सुप्रतीकश्च ते क्रमात्।३५

इति षष्टे सप्तमे च दिक्पालान् पूजयेत्क्रमात्।

एवमावरणैर्देवीं महालक्ष्मीम् परात्पराम्।

संपूज्यप्रार्थयेदिष्टं क्षमापणपुरस्सरम्।

“अनाथमगतिंदीनमपराधैक भाजनम्।

रक्ष मां कृपय देवी तवैव शरणागतम्।

भगवच्चरणांबोज भजनानंदभाजनम्।

कुरुमाममलालोक निवारित जगद्भयम्।

अगाधभवपाथोधि निमग्नमितिविह्वलम्।

आनंदिनी महामाये समुद्धरकरग्रहैः।

परमावधिभूतानि परमैश्वर्य संश्रये।४०

कमन्यं शरणं यामि परतन्त्रमुनीश्वरम्।

श्रीमन्नारायणानंदसंदोहं कुरु साधने।

जयमातर्मदोन्मत्त मातङ्गदळनाभिधे।

कमले कमलाक्रीडे कलानिधिसहोदरी।

ममदेही पदांबोज मयिमानस पंकजे।

ब्रह्मादिदेवताबृंद समाराधित पद्दळे।

विमले विमलाज्ञान कलया विमलं कुरु।"

एवं संप्रार्थ्यदेवेशीं आराधनपरोभवेत्।

प्रातः पुनःप्रपूज्याथ हुत्वा वह्नौ स्वशाखया।

श्रीसूक्तमूलमन्त्राभ्यां ऋग्भिष्षोडशभिर्मुहुः।४५

पायसेन तिलैर्वापि कमलैर्वा मधुप्लुतैः।

प्रत्येकं षोडशदिनैः पूजितायाश्च मातरः।

तदर्थं जुहुयाच्छाग्नौ शतं चाथ सहस्रकम्।

दत्वापूर्णाहुतिं विप्रानाभोज्याथ विसर्जयेत्।

प्रतोष्यविविधोपायैः गुरुं भक्त्या धनादिभिः।

पश्चात्सपरिवारोयं यजमानः कृतोत्सवः।

स्वयं भुञ्जीत मतिमानात्मानं धन्यमावहन्,

न मारी न च दुर्भिक्षं नोपसर्गभयं भवेत्।

राजाजयति संग्रामे शत्रूनेवं कृते व्रते।

महालक्ष्मीव्रतंमोहादज्ञान् न करोति यः।५०

दारिद्र्यं जायते तस्य मृतो नरकमाप्नुयात्।

ज्ञात्वा देहाभिमानाद्यो महालक्ष्मीव्रतं त्यजेत्।

तस्यान्यं समालोक्य सचेलस्नानमाचरेत्।

जगतः पितरौ साक्षात् लक्ष्मीनारायणौ मतौ।

तावनाधृत्यमूढात्मा कथं न नरकं व्रजेत्।

अशक्तो व्रतमास्थातुं पयोमूलफलादिभिः।

हविष्येणापि नक्तेनचैकभुक्तेन वा पुनः।

नयेत्कालं जपेत्सूक्तं यावत्कृष्णाष्टमी भवेत्।

पायसान्नं निवेद्याथ भोजयित्वा द्विजन्मनः।

तेनैव पारणं कुर्यात्प्रत्य ऋचेन यथाविधि।

न वन्द्यं दिवसंकुर्याद्वैष्णवोऽभिलषण् हरिम्।५५

इति श्री बृहद्बृह्मसंहितायां प्रथमेपादे श्रीवत्सचरिते श्रीसूक्ताविर्भावे

महालक्ष्मीव्रतविधिःनाम दशमोऽध्यायः।

## एकादशोऽध्यायः

## श्रीसूक्त आराधनविधिः

पूर्वोक्तेनविधानेन नव षोडशभिर्घटैः।

स्नापयेत्कार्यमुद्दिश्य यजमानं च भक्तितः।

ऋग्भिश्च पंचदशभिः तस्य सिद्धिं ब्रवीमि वः।

घटे घटे समभ्यर्च्याः पूर्वोक्तश्शक्तयः क्रमात्।

मध्यमेकलशे देवींमहालक्ष्मीं प्रपूज्य च।

त्रिसहस्रं जपेन्मूलं श्रीसूक्तेन समन्वितम्।

दिव्यज्ञानबलैश्वर्य सिद्धये भद्रपीठके।

समारोप्य गुरुर्भक्त्या शिष्यमासेचयेद्घटैः।

अलंकृतं वरस्त्रीभिः लाजैश्चाप्यभिवर्धितम्।

नदत्सु पंचघोषेषु मुहूर्ते शोभने तथा।५

मध्यस्थकुम्भतोयेन महालक्ष्मीमनुस्मरन्।

अभिषिंचेत्क्रमादन्यैःकलशैः शोभनांबुभिः।

भद्रमस्तु शिवंचास्तु महालक्ष्मीःप्रसीदतु।

प्रणश्यत्यशुभं सर्वं जन्मजन्मांतरे कृतम्।

आशिषस्संप्रयुज्यैवं गुरुश्शिष्यं समाहितम्।

महापीठेनयेत् पाणिपल्लवेधृतमङ्गळम्।

“महादेवी महामाये वैकुण्ठहृदयप्रिये।

देहि मे चरणांबोजे भक्तिमव्यभिचारिणीम्।

नमो मातर्महालक्ष्मी मेऽनन्यशरणार्थिनः।

सान्निध्यं देहि देवेशि परिचर्यानुवर्तनम्। १०

अकामो वा सकामोवा प्रार्थयेद्दीनया गिरा।

गुरुंनत्वा द्विजान् भोज्य विसृज्य विहरेत्ततः।

अभिषिक्तासती वंद्यासूतेपुत्रंमहामतिम्।

महारोगेषु जातेषु कुर्याद्द्रोहेषु वैष्णवः।

भूतेषु दुर्निमित्तादौ कुर्यान्मन्त्राभिषेचनम्।

सर्वसंपत्करंपुंसां सर्वसौभाग्यसिद्धिदम्।

सर्वरोगप्रशमनं सर्वापद्विनिवारणम्।

गर्भरक्षाकरंस्त्रीणां दीर्घायुर्जनकंपरम्।

प्रसूतानामपिस्त्रीणां सूतिकागाररक्षणम्।

प्रणष्टपुष्पगर्भाणां पुष्पगर्भाभिरक्षणम्। १५

आसन्नशत्रुभीतानां महाभयविनाशनम्।

गतश्रीणां गताज्ञानां निर्मितानां च भूभुजाम्।

श्रियमाज्ञामतिं चैव संवर्धयतिभक्तितः।

आस्तिकानां वदान्यानां गुरुदेवैक्य भाविनाम्।

सिद्धयोव्यभिषेकेन समायांति न संशयः।

नास्तिकाय न वक्तव्यं नाधनायाति हिंसिने।

अवैष्णवाय दुषाटाय वैदिकायापि नोदिशेत्।

आस्तिकं च विशुद्धां च शान्तं च समदर्शनम्।

अविप्रमपि संस्कुर्यान् महालक्ष्म्यभिषेचनैः।

अथ प्रबोदयात्रां च कार्तिक्यां प्रब्रवीमि वः।२०

यस्या विज्ञानमात्रेण मन्त्रसिद्धिमवाप्नुयात्।

अमाप्रदोषसमये बोदयेत्कमलालयाम्।

ऋग्भिश्च पंचदशभिः सर्वैश्च सह वैष्णवैः।

एकादशीं समारभ्य संस्कुर्याद्यागमण्डपम्।

चित्रध्वजपताकाभिः वितानवरतोरणैः।

गृहं सुतासितं कुर्यात्सुगंधोदक वासितम्।

चामरादिलसत्कुम्भं कदळीस्तंभमण्डितम्।

वीणाविनोदसंयुक्तं नटनर्तकनादितम्।

स्तभकामलपूगाम्रबिल्वांबोज कृतच्छवि।

शयनीयगृहे कन्यां गां च काञ्चनदीपकम्।२५

दर्शनार्थं प्रकल्प्याथ संभारान् पूजनस्य च।

प्रस्वाप्य वरपर्यंके पूर्वमेव प्रभोधनात्।

स्नानीय कलशान्स्थाप्य नानाऔषधि समन्वितान्।

पक्वान्नानि विचित्राणि नैवेद्यार्थं प्रकल्पयेत्।

पूजापीठं च शङ्खादि स्थापनं गुरुपूजनम्।

अधिवासनवत्कुर्यात् प्रदोष समये ततः।

प्रज्वाल्य परितोदीपान् दीपवृक्षांश्च सर्वशः।

तत्र प्रबोदयेद्देवीं द्विजैः श्रीसूक्त पाठिभिः।

घण्टाताळमृदंगैश्च वीणा पणववादनैः।

जयशब्दैर्नमश्शब्दैः स्तवैरारात्रिकैस्तथा।३०

प्रबुद्धां दर्शयेत्तावद् गां कन्यां घृतदीपकम्।

दन्तकाष्ठं च गण्डूषं दत्वा मंगळदीपकम्।

तैलाभ्यङ्गंसुगंधेन पाद्यार्घ्य आचमनं तथा।

पंचामृताभिषेकं च सुगन्धोद्वर्तनं तथा।

स वस्त्रांग विभूषाभिरर्चयेच्चिंतयन्सुधीः।

धूपंदीपं च नैवेद्यं नानासंभारसंयुतम्।

तांबूलाऽऽदर्श कुसुम मालिकाभिःप्रपूज्य च।

सहस्रनामभिःपूजां पृथक् कृत्वाऽक्षतादिभिः।

कमलैःकमलांदेवीं समभ्यर्च्य विधानतः।३५

चामरै रुचिरैश्चित्रैःसंवीज्य नरवाहने।

समारोप्य महादेवीं तूर्यमंगळनिस्वनः।

सूक्तपाठैःस्तवैःपुण्यैः भ्रामयेन्नगरेनिशि।

महानिशायां लाजैश्च प्रसूनैश्चसमर्चिताम्।

तामानयेत्पुनःपीठे नीराज्यद्वारदेशके।

तत्र जागरणं कुर्यात् प्रातर्भक्तान्प्रपूजयेत्।

भोजनैर्दक्षिणाभिश्च प्रदक्षिणगतिस्तवैः।

एवं यःकुरुते देव्याः कार्तिके <u>**बोधनोत्सवम्**</u>।

श्रीसूक्तेन गृहंतस्य महालक्ष्मीर्न मुंचति।

एवं जन्मोत्सवंदेव्याः द्वादश्यां तु समाचरेत्।४०

भक्तानां श्रेयसे वत्स! संभूता क्षीरसागरे।

श्रीसूक्तेनश्रियोदेवै रेकादश्यांसमर्चनम्।

कृतं सहस्रनाम्नाश्च पठनं हरिणेरितैः।

द्वादश्यां कमलादेवीक्षीराब्धितनया रमा।

देवानां कार्यसिद्ध्यर्थं निर्गता जयनिस्वनैः।

तस्मात् श्रीवैष्णवोदेव्यै द्वादश्यामुत्सवोदये।

विप्रैः श्रीसूक्तमन्त्रज्ञैः अभिषेकं प्रवर्तयेत्।

सर्वौषधिसमायुक्तैः तथा नानाविधोदकैः।४५

कुंकुमोदकगंधोद कषायोदक पूरितैः।

तीर्थोदकैश्च शुद्धोदैर्मन्त्रपूतैः समंततः।

तुळसीकुशहस्तैश्च विप्रैर्भागवतैर्मुदा।

स्वस्तिवाचनपूर्वं तु श्रीसूक्तेनाभिषेचयेत्त्।

अभिषिक्तेर्महादेवीम् विष्णुना सह मंदिरे।

'पूजयेत् गंधपुष्पाद्यैः नैवेद्यैर्भक्तिसंयुतः।

जुहुयादनलेदेवीं पीठपूजन पूर्वकम्।

भोजयेद्ब्राह्मणान् भक्तान् परमान्नेन श्रद्धया।

अनुभूय सुखं भूरिह्यंते तद्दासतामियात्।

सहस्रनामकवचंश्रीसूक्तं प्रत्यहं जपेत्।५०

तस्य लक्ष्मीप्रसादेन कैवल्यं नातिदुर्लभम्।

विना श्रीवैष्णवीं दीक्षां विनाश्रीसूक्त संस्तवम्।

विना श्रीपूजनं लोके कथं स्याद्वैष्णवो नरः।

न विष्णुना समंदेव्या अन्तरंभावयेन्मनाक्।

संलीना प्रणवेबीजे ह्यकारेणमहोज्ज्वला।

सहस्रनाम कवचं श्रीसूक्तं पंचवर्णकम्।

य दिवां परमाश्रद्धा हरिरेवोपदेक्ष्यति।

श्रीसूक्तपाठकास्सर्वे वयं चेहसमाश्रिताः।

तपःकुर्मो महादेव्याः कैंकर्य प्राप्तकाम्यया।

यदिच्छसि महालक्ष्म्या सहवासमनन्यधीः।५५

तदाराधयमानिन्या विष्णोश्चरणपङ्कजम्।

इति श्री बृहद्ब्रह्मसंहितायां प्रथमेपादे श्रीवत्सचरिते

श्रीसूक्ताऽऽराधनं नाम एकादशोऽध्यायः।

द्वादशोऽध्यायः

**पुरुषसूक्त आराधन विधिः**

श्रीवत्स उवाच-

विधिं पुरुषसूक्तस्य समाराधनवर्त्मना।

वक्तुमर्हथ नो यूयं कृपांकुरुत चेतनः।

त ऊचुः-

नारायणोऽस्यसूक्तस्य कर्ता वक्ता पिता स्वयम्।

तथापि चाभिदास्याम श्रूयतामेक चेतसा।

संप्राप्याचार्यतो मन्त्रं श्रीमदष्टाक्षरं परम्।

विधिना पौरुषं सूक्तं गृह्णीयात्परमादरात्।

**अष्टादश ऋचोपेतं** प्रणवाद्यं हरिप्रियम्।

सूक्तं नारायणोद्भूतं तस्याराधन सिद्धये।

उत्थाय रात्रिशेषेषु स्वगुरुं चिंत्यचेतसा।

रात्रिवासः परित्यज्य पादौप्रक्षाळ्य वारिणा।५

शुचौ स्वासनमास्तीर्य मन्त्रेणाधारदेवताम्।

नत्वाऽच्युतादिनाऽऽचम्य स्थित्वाध्यानपरो भवेत्।

भूतोच्छाटनकं कृत्वा ह्यस्त्रेणारक्ष्य सर्वतः ।,

मन्त्रं सौदर्शनं जप्त्वा महाविश्वास पूर्वकम्।

तत्वत्रयमनुस्मृत्य चिदचित्परमात्मकम्।

चित्तत्वमात्मनो भाव्यह्यचिदात्मोप कारकम्।

पंच पंचदशैकं च प्रकृत्यादि त्रिभिर्युतम्।

शरीरमचिदाख्यातं कार्यरूपं महामते।

भावनानलयोगेन संहृत्याऽनलविद्यया।

अप्राकृतमथो बीजं पंचकेनोप कल्प्यताम्।15

श्रीमद्भगवतःपाद परिचर्योपयोगिनम्।

देहंविचिंत्यमहिमान् **ध्यानयोगं** समारभेत्।

सदनंतगुणोपेतं कल्याणैक निकेतनम्।

विचित्रशक्तिमैश्वर्य परिपूर्णमनंकुशम्।

नित्यैकरूपमत्यन्त भक्तावात्सल्य गर्भितम्।

कारुण्य औदार्य गाम्भीर्य माधुर्यैक समाश्रयम्।

आधारभूतं सर्वस्य सर्वावधि मनल्पकम्।

सर्वात्मकं सर्वतनुं सर्वमप्यग्र चेतसम्।

सर्वज्ञं सर्वदैकाभं परिणाम विवर्जितम्।

ज्ञानानंद बलैश्वर्य संकोचरहितं सदा।'15

स्वतन्त्रं सर्वनेतारमन्तर्यामिनमच्युतम्।

निरातङ्कं निराधारंनिरंजनमनामयम्।

अनित्य पारतन्त्र्यादि विशेषरहितं हरिम्।

अजहत्स्व विशेषाढ्यम् सत्यसंकल्प सत्पतिम्।

कारणं सर्वकार्यस्य सर्वधार्यस्य धारकम्।

हारकं सर्वहार्यस्य सर्वभास्यस्य भासकम्।

सर्वस्मिन्व्यापकं शुद्धं व्यापकांतर वर्जितम्।

गंतृणां परमं गम्यं भोक्तृणां भोग्यमुत्तमम्।

साधनानां परं साध्यंस्वस्व साध्यस्य साधनम्।

देवानां दैवतंदिव्यं फलानांपरमंफलम्।20

अनन्यानां च सर्वस्वं निर्धनानांपरंधनम्।

वाच्यं समस्तवेदानां चिंतयेत्परमेपदे।

कलयातलमासाध्य पादपद्मासनं तु यत्।

विधृतं स्वेकदेशेन तस्मिन् न्यास्तांघ्रिपङ्कजम्।

विद्यामये महातल्पे नवशक्ति समन्विते।

धर्मादि सेवितपदे छंदोभिःपरिवेष्टिते।

समासीसंश्रयासार्धं भूम्यदेदेव्या निषेवितम्।

नीळयालालितंचाग्रे नानाकेळिकलोदयैः।

कोटिसूर्यप्रतीकाश किरीटावृतमस्तकम्।

भास्वन्मणिगणाकीर्न कुण्डलाभ्यांविराजितम्।25

कोटिमन्मथमाधुर्य भंजकालकमण्डितम्।

नीलांबुजदळोद्रेक भङ्गिलोचनशोभितम्।

अत्यच्छफालविलसत्तिलक श्रीविमोहकम्।

सांद्रनीलांबुदश्याम स्वच्छादर्शकपोलकम्।

मन्दहासोज्वलमुखं दन्तावळि विराजितम्।

रुचिरौष्ठपुटामोद समाहूताळिसंवृतम्।

कंबुग्रीवोल्लसद्दिव्य कौस्तुभोद्दीप्तवक्षसम्।

चतुराजानुदोर्दण्ड विभूषितभुजान्तरम्।

चक्रशंखगदापद्म दिव्यायुध विकासितम्।

बालद्युमणिविस्तीर्ण प्रभांबरविभूषितम्।३०

भ्रमद्भ्रमरझंकार मुखरीकृतविग्रहम्।

आपादतलसंलग्नां बिभ्राणं वनमालिकाम्।

भक्तार्पितमहामोद विनोदितदिगन्तरम्।

समञ्जरीकतुळसीमालयाऽलंकृतोदरम्।

स्फुरन्मयूखशीतांशु मुक्तावळिविभूषितम्।

त्रिवळीगर्तविभ्रान्त विमुक्तजनमानसम्।

नितंबमण्डलालंबि रत्नकांचीलसत्विषम्।

ऊरुद्वयविनिर्धूत कदळीमत्तवारणम्।

जानुजंघोच्छगुल्फच्छ नखकान्ति विराजितम्।

सुरासुरशिरोरत्न नीराजितपदांबुजम्।35

शेषभोगासनासीनं विष्वक्सेनादिभिर्युतम्।

मुक्ताजाललसच्छत्र विराजितनभस्तलम्।

नित्यमुक्तजनाजीवचरणांबुज वैभवम्।

आसीमगुणमञ्जूषां श्रियालालितपद्दळम्।

कोटिशीताम्शुसंदोहलसच्छामर मण्डितम्।

छंदोभिस्तूयमानं तम् पुरतो मङ्गळैस्तवैः।

सिद्धगन्धर्वदिक्पाल किन्नरोरगराक्षसैः।

सदासंचिन्त्यमानांघ्रिमादिदेवं विचिन्तयेत्।

सन्यस्य वामहस्तादि निजांगेषु विचक्षणः।

मूलमन्त्रं च मतिमान् जपेदचलमानसः।४०

भगवत्परिचर्यांगतया दासोहमाज्ञया।

देहशुद्धिं करिष्यामीचेति संकल्प्य सर्वतः।

मनसा वचसाचैव शरीरेण तथैव हि।

यथा कुर्यां तवैवाहम् कर्मनाथ तथा कुरु।

यत्र यत्र रमाकांतमनु मे परिसर्पति।

तत्र तत्र तवानंत देहबुध्या प्रसर्पतु।

तत्सृष्ट्वेति च वाक्येन कार्यमात्रे व्यवस्थितः।

आत्मरूपतयायस्मात्त्वमेव पुरुषोत्तम।

इतिबुध्या हृषीकेश निर्वैरस्यां हि सर्वतः।

भेदबुद्धिर्न दैवास्तु त्वयिवस्तुनिचात्मनि।४५

परमैकान्तिनं देव परज्ञानसमन्वितम्।

परभक्तियुतं संयक्कुरुमामनपायिनम्।

निस्सीम नव सौंदर्य सुधासिन्धु विगाहितम्।

एवं ध्यात्वाथमनसा नित्यंसंबद्धमात्मनः।

नाहं देहो न वै प्राणो न मनोहं नचेंद्रियम्।

न वर्णो नाश्रमश्चाहं न मनुष्यो न देवता।

न यक्षो राक्षसोनैव न दैत्यो दानवस्तथा।

निरूपादिक सत्तत्वा त्तव दासोस्मि केवलम्।

तवानन्यार्ह शेषोहं तवाहं परिपालकः।५०

दासोहं नित्यसंबंधी त्वमेव मम सत्पतिः

अतोह्यनन्यसेवार्थं नियोजय निजंजनम्।

इति प्रार्थ्यमृदालिप्तो हस्तपादाब्ज शीर्षणि।

आचान्तस्संयतोमौनी तीर्थान्यावाह्यतज्जले।

प्राणानायम्य संचिन्त्य हृदिलक्ष्मीसमन्वितम्।

मूलेनस्नानविधिना स्नात्वा देवंप्रतोष्य च।

सूर्यमण्डलमध्यस्थं श्रीमन्नारायणंहरिम्।

अर्घ्यंदत्वा तु गायत्र्या प्रद्युम्नादि धियापितृण्।

संतर्प्यदर्भपाणिस्तु प्राणानायम्यसर्वतः।

संप्रोक्ष्यास्त्रेणचास्पृष्टं दौतंकार्पासकं तथा।55

क्षौमंवाप्याविकं वापि धृत्वावृक्षमयं तु वा।

गुरुवैष्णवपादाब्ज तीर्थमादायमस्तके।

ऊर्ध्वपुण्ड्रादिकं धृत्वा श्रीरेखामरुणप्रभाम्।

धृत्वादासोस्मिसंचिंत्य तथा युगळमालिकाम्।

पूजार्थं श्रीपतेःकुम्भमादायोद्धार्य मूर्धनि।

नामसंकीर्तयन्विष्णोः पठेत्सूक्तमथापि वा।

पुष्पाणितुळसीं चैव नीत्वा गच्छेद्धरेर्गृहम्।

द्वारदेवान् नमस्कृत्य नित्यमुक्तांश्च पार्षदान्।

मार्जयेन्मन्दिरंविष्णोः निर्माल्यंचापवाहयेत्।

लेपयेत्परयाभक्त्या दासो मृद्गोमयाम्भसा।60

दीपान् प्रज्वाल्यपरितो घृततैलमयान् पृथक्।

प्रबोधयेत्पठन्सूक्तं देवं पर्यङ्कशायिनम्।

घण्टादुंदुभिनिर्घोषैः शंखताल मृदङ्गकैः।

गुणाननुवदन् पुण्यान् पुराणागमसंस्तुतान्।

संस्थाप्य लक्ष्मीसहितं दिव्यसिह्मासने प्रभुम्।

दंतोल्लेखं कारयित्वा मूलेन तुळसीदळैः।

मङ्गळारात्रिमादाय प्रभासंदर्शनाद्रवेः।

प्रागेव भ्रामयेद्विद्वान् घण्टां वामेनवादयन्।

पात्रासाधनकं कर्मकुर्याद्गुरुपदंस्मरन्।

स्वासने विधिनाक्लृप्ते भूतशुद्धिं विधाय च।65

लिपितत्वहृषीकेश मुनिमन्त्रपदाक्षरान्।

विन्यस्य हृदयाद्यंगे करन्यासं विधाय च।

ततो बद्धशिखामौनी चोर्ध्वपुण्ड्रधरोनघः।

विन्यसेत्पौरुषंसूक्तंश्रीसूक्तं च विधानतः।

हस्तस्यसंपुटं कृत्वा स्मृत्वा विष्णुं तथाऽव्ययम्।

श्रीभूनीळा सुखासीनं मायातीते परेपदे।

विन्यस्य प्रथमांवामे द्वितीयांदक्षिणेकरे।

तृतीयां वामपादे तु चतुर्थीं दक्षिणेन्यसेत्।

पंचमीम् वामबाहौ तु  षष्टीं दक्षिणतोन्यसेत्।

कण्ठेत्रयोदशीं न्यस्येत्तदा वक्रे चतुर्दशीम्।70

अक्षोःपंचदशींकृत्वा षोडशीं मूर्ध्निविन्यसेत्।

सर्वाङ्गं मार्जयेद्वाभ्यां ऋग्भ्यामात्मनि साधकः।

एवं देवतनौन्यस्य पश्चाद्यागं समारभेत्।

आविर्भूतस्यदेवस्य महावैकुण्ठ विष्टरात्।

मायातल्पे निषण्णानां जीवानामशरीरिणाम्।

शरीरक्लृप्तये भोगभुक्तये मुक्तये तथा।

पादैकलीला भगवान् लीलया प्रेरितोमुदा।

सहस्त्रशीर्षापुरुषः प्रथमोभवनात्मकः।

महत्संज्ञोऽब्जगर्भश्च ब्रह्मयोनिस्सनातनः।

जलशायी जगन्नाथः प्राकृतादीश्वरो हरिः।75

त्रिव्यूहकार्यकारी च नानारूपो निरंजनः।

भूर्लोकपादो विश्वात्मा भुवोजानुस्सुवःकटिः।

महर्नाभिश्च हृदयं जनलोकःप्रकीर्तितः।

कण्ठदेशे तपस्तस्यलोकःख्यातः परात्मनः।

भ्रुवोर्ल्ललाटे संध्योस्तु सत्यलोकःप्रतिष्ठितः।

सर्वावतार निलयः पुरुषोयं सनातनः।

वैराजश्श्रीपतिश्रीमानुपास्यो मुक्तिकांक्षिभिः।

अन्यैवांशकलास्सर्वे मत्स्यकूर्मादयश्च ये।

तथैव ब्रह्मरुद्राद्या देवामन्वादयो नृपाः।

पूज्याः पुरुषसूक्तेन नानाबलिपरिच्छदैः।80

साळग्रामे जले वह्नौहृदये च गुरौ द्विजे।

अर्चायामात्मनि तथा वैष्णवेभगवत्प्रिये।

संपूज्यःपरयाभक्त्या हरिर्नारायणस्स्वयम्।

सगुणात्पुरुषादस्माद् वैराजात्पुरुषःपरः।

लोकातीतःपरपदे परमात्माव्यवस्थितः।

हिरण्मये परेकोशे  विरजं ब्रह्मनिष्कळम्।

तच्छुद्धस् ज्योतिषांज्योतिः तद्यदात्म विदोविदुः।

गमनागमनातीतः सदैकरसविष्टरः।

सदैकलीलानिरतस्सदानन्त गुणान्वितः।

अप्राकृतविहारस्थो नित्यमुक्त जनाश्रयः।85

सर्वावधिस्सर्वशेषी निर्विकारो निरंजनः।

प्रकृतिःपुरुषस्स्यायं वैराजस्य महात्मनः।

एतस्मान्नपरंकिंचित्साकाष्ठा सापरागतिः।

परमैकान्तिनां गम्यस्सेव्यो भोग्योऽथ साधनम्।

मन्त्रराजानुसंधान कर्तृणामयनं हि सः।

सर्वधर्मान् परित्यज्य प्रपन्ना ये हरिं परम्।

ते यांति परमंस्थानं यतोनावर्तते पुनः।90

गतिरेकांतिनामत्र यैर्भरो निहितो हरौ।

सहस्रशीर्षापुरुषस्सहस्राक्षस्सहस्रपात्।

योऽण्डभूमिं समाविश्य दशाङ्गुळमथाभवत्।

तस्मात्पुरुष एवेदं सर्वंचिदुदरीकृतम्।

भूतंभव्यंभविष्यं यद्येनाविश्य प्रकाशितम्।

योधर्ताऽस्यशरीरस्य चतुर्दशपदात्मनः।

महापुरुष नामासौ यश्शेतेसलिले पुरा।

नारायणायेति विख्यातःप्रवेशाद्विष्णुरुच्यते।

वासनाद्वासुदेवेति हरणाद्धरि रुच्यते।

त्रिपाद्विभूति संविष्टः पादभूतिमुपस्थितः।95

उपास्यस्वैकरूपेण नानारूपेण वा पुनः।

वैराजश्चैकरूपेण नानामत्स्यादि मूर्तिभिः।

अन्तर्यामितया ब्रह्म रुद्रेन्द्रवसु मूर्तिषु।

एकानेक स्वरूपासु सर्वार्चासु त्रिपात्प्रभुः।

आवाहयेत्तमेकांती योज्यायावतितिष्ठति।

अमृतत्वस्यचेशानो भगवान् पुरुषोत्तमः।

न कर्मफलभुग्भोक्ता भोजकस्सर्व कर्मिणाम्।

आधारशक्तिमारभ्य पीठदेवान् प्रपूजयेत्।

कर्णिकायामथोदेवमानयेदाद्यया ऋचा।

यथादेहे तथादेवे न्यासंकुर्याद्विधानतः।100

द्वितीययासनं दद्यात् पाद्यंचैव त्रितीयया।

चतुर्थ्याऽर्घ्यं प्रदातव्यं पंचम्याचमनं तथा।

षष्ठ्यास्नानं प्रकुर्वीत सप्तम्यावसनं तथा।

यज्ञोपवीतंचाष्टम्या नवम्या गन्धलेपनम्।

पुष्पंदेयं दशम्यांस्यादेकादश्यास्तु धूपकं।

द्वादश्या दीपकंदद्यात् त्रयोदश्यानिवेदनम्।

चतुर्दश्याजलं दद्यात् पंचदश्या प्रदक्षिणम्।

षोडश्योद्वासनंकुर्या द्वाभ्यां संस्तवनं स्मृतम्।

एवं षोडशभिश्चैकेके प्यष्टादशभिस्तथा।

ताभिरिच्छंति कृतिनो वैष्णवं यजनंसदा।105

स्नानेवस्त्रे च नैवेद्ये दद्यादाचमनं पृथक्।

षण्मासात्सिद्धिमाप्नोति योऽर्चयेदेवमेव हि।

द्वादश्यां तु विशेषेण यजनं हवनं स्मृतम्।

लक्षं पुरुषसूक्तस्य पाठयित्वा द्विजातिभिः।

सहस्रनाम्नामयुतं श्रीसूक्तेन समन्वितम्।

त्रिभिर्दिनैश्च जुहुयाद्दशम्यादिभिरेव च।

लक्षमेकं तिलाज्येन श्रीमदष्टाक्षरेण च।

कार्यसिद्धिर्भवेत्तस्य निष्कामो मोक्षमाप्नुयात्।

हविष्याशि महीशायी मौनीपठनमाचरेत्।

यावद्ध्यानं न विकृतं यावदासन संस्थितिः।110

तावदेवाभ्यसेत्सूक्तं श्रीसूक्त पुटितंयमी।

एवंचायुत पाठेन लक्षपाठेन वा पुनः।

असाध्यं साधयेद्धीमान् पुरुषाराधने विधिः।

दशलक्षप्रपाठेन महापुरुष ईरितः।

कोटिपाठेन भवति तथाति पुरुषात्मकः।

ब्रह्मभ्येति परं योहि यजते पुरुषोत्तमम्।

योतीत्य सर्वपुरुषान् सर्वावधितयास्थितः।

एवं सावरणं साङ्गायुधंच सहशक्तिकम्।

अर्चयेत्परयाभक्त्या सूक्तेनानेन वैष्णवः।

तस्माद्विप्रधरानाथ सूक्ताभ्यां श्रीपतिंयज।115

सहयोगोभगवता भविष्यति न संशयः।

तदर्थमिह तिष्ठामो वह्नितीर्थे समाहिताः।

सूक्तं प्रजपतांचात्र व्यतीयुर्नरशतं समाः।

श्रीवत्सो विष्णुधर्मा च संप्राप्यानेक कारणम्।

प्रणिपत्योत्थितौ तावन्नारायणमपश्यताम्।

इति श्री बृहद्ब्रह्मसंहितायां प्रथमेपादे श्रीवत्सचरिते

पुरुषसूक्ताराधनं नाम द्वादशोऽध्यायः।

त्रयोदशोऽध्यायः

**पुरुषसूक्त आराधनं - 2**

ततस्तौ भगवत्पार्श्वमागतौ नृपति द्विजौ।

द्वयाधिकारिणौ भूत्वा स्नात्वा संतपनह्रदे।

देहिनौ मन्त्रराजं च द्वयं च चरमं तथा।

सूक्ते द्वे **स्वर्णघर्मानुवाकं** वै पावमानकम्।

दासत्वं देहि दीनार्तिभंजनानंद विग्रह।

तव तीर्थस्य माहात्म्यं विज्ञातं स्नानमात्रतः।

निवर्त्यविधिकैंकर्य माकारत्रयसंयुतः।

पालयन् भगवद्वाक्यं द्वयमावर्तयन्मुदा।

आदेहान्तमिहस्थास्ये लोकयात्रां प्रवर्तयन्।

अतोऽनुग्रहवर्षिण्या दृष्ट्यादेवावलोकय।५

एवं संश्रुत्य तद्वाक्यं नरोनारायणो मुनिः।

सस्मारपावकोद्दीप्त ज्वालामालि सुदर्शनम्।

द्वादशारं महाशस्त्रं कोटिसूर्यानलप्रभम्।

महामोहतमो भूत सृष्टिसंहार कारकम्।

ज्ञानविज्ञान जनकं दुरितक्षयकारकम्।

सान्निध्यं परमेशस्य परमैकान्तिनां निधिम्।

मोक्षद्वारं सहस्रारं ददर्श पुरतस्थितम्।

तथैव पांचजन्याख्यं ध्वान ध्वस्ताखिलामयम्।

"सुदर्शनमहाज्वाल पांचजन्यमहारव।

प्रपन्नयोर्द्वयोर्गात्रं कुरु तं लांछनान्वितम्।१०"

इत्युक्त्वा बाहुयुगळं तयो र्नारायणोर्हरिः।

अंकयामास हेतिभ्यां पारमैकान्त्यसिद्धये।

पंचामृतेन संस्नाप्य शङ्खचक्रे निजायुधे।

स्थापयामास पुरतः संस्कारान्तर सिद्धये।

सुदर्शनप्रभावेन प्रध्वस्तानेक बंधनौ।

शुद्धस्फटिकसंकाशौ क्षणादेव बभूवतुः।

तीर्थभूते शरीरे हि तयोस्तु निकटस्थिताः।

मुनयःपूजयां चक्रुः चरणक्षाळनादिभिः।

वह्निपूतशरीरस्य पादतीर्थाभिषेचनम्।

ये कुर्वंति जनास्ते वै भवंति ह्यधिकारिणः।१५

अधिकारस्य सिद्ध्यर्थं चक्रयुक्तस्य ये तनुम्।

प्रनमंति मुदायुक्ताः ते कृतार्था न संशयः।

वयं धन्या वयं धन्या वयं धन्या इति ध्वनिः।

समपद्यत सर्वत्र गिरिगह्वर निर्गतः।

सहस्रशस्तदा प्राप्ता चिरकालनिवासिनः।

चक्रांकस्यावलोकार्थं पुण्याहमिति वादिनः।

तदा नारायणं देवं बद्धांजलिपुटौ च तौ।

ऊचतु स्संभ्रमं प्राप्तौ श्रीवत्स! नृपसत्तमौ।

सानुरागामहीचैषा दत्ते सोत्पुलकां तनुम्।

घोरशोभन निर्घोषैः देवादीनां जयस्वनैः।२०

ववृषुश्च लता एता मारुतांदोळिता भृशम्।

किं सुमानिजुगुश्चैते सिद्धगंधर्व किन्नराः।

नारायण उवाच-

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।

यततामपि सिद्धानां कश्चिदात्मानमेव माम्।

वेदतत्वविदां कोपि मदेकरसनिर्भरः।

प्रपन्नोजायते कोपि ह्येकांती चक्रलांछितः।

पुत्रेकारागृहान्मुक्ते यथाऽऽनंदः पितुर्भवेत्।

तथानंदमयोऽहंस्यां परमैकांति दर्शने।

शरीरभूत मे सर्वे जडचेतन योनयः।

ममानंदवशात्सर्वे लोकभूरादयो द्विज।२५

आनंदिनो भवंतीह परमोत्सव निर्वृताः।

देवासुर मनुष्याश्च सिद्धगन्धर्व किन्नराः।

अयं भागवतो जातो वैकुण्ठं याति वै धृवं।

अतिक्रामति नाकादि लोकानेषमहोज्ज्वलः।

अतिथिर्भवितास्माकं यस्यपादजलै स्तदा।

आत्मानं पापयिष्याम इति नृत्यंति खेचराः।

विना भागवातीं दीक्षां विनैकांति निषेवणम्।

नाधिकारो महाभाग परमैकान्तिनां पथि।

भगवत्कृपया ज्ञानकर्मयोगादिभि र्नृणाम्।

मुक्तिर्भुक्तिस्तथासिद्धिः जायते नात्र संशयः।३०

विना भागवतानां हि पादाब्जां भोऽभिषेचनात्।

नैकान्तिकःपरोभावः कल्पकोटिशतैरपि।

महाभागवता यत्र निवसंति महीतले।

धन्यासेयं महीराजन् यथाधातरि राजनि।

बहुकालकृतावासाः संलब्धात्मविचारणाः।

नैकांतिभावोपगता येनयामो रमापतिम्।

मुक्तिद्वारमिदं जातमस्मा कमिति वादिनः।

अभिद्रवंते वामपार्श्वं षट् पथाःपादपं यथा।

बुभुक्षितानां दीनानां सुभिक्षेपि च वत्सरे।

अन्नं च लभ्यते यत्र पुण्याहं तु तदुच्यते।३५

पृथिव्यां यत्र चैकांती सा धन्या नापरा मही।

सकामो  यत्र चैकांत भुवो भागवतो भवेत्।

ईषणात्रयनिर्मुक्तं मामेकमनुवर्तिनम्।

एकांतिनमुपासेहं किमुता सुर मानुषाः।

एवं प्रभाषितौ विप्र! नृपौ नारायणेन तौ।

प्रहृष्टागत संदेहौ प्रणामं चक्रतुर्भृशम्।

ततो नारायणो देवःसस्मार द्वादशाकृतिः।

केशवाद्या समाजग्मुः सपत्नीकाः कृपान्विताः।

स्वस्ववाहन भूषाड्यान् स्वनामाह्वान कातरान्।

तान् विलोक्य मुदायुक्तः सर्वाचार्य शिरोमणिः।४०

उवाच वचनं चारु विकसद्वदनांबुजः।

चक्रसंतप्तयोःपूत गात्रयोर्दासभूतयोः।

ललाटादिषुचांगेषु कुरुध्वं गतिमात्मनः।

प्रणवाकारताम् प्राप्य रेखाभिस्तिसृभिस् सदा।

इमौ तु परमोदारौ देवान्तरमपोह्य च।

प्रयोजनांतरं हित्वा साधनांतरमेव च।

संबदान्तरमुत्सृज्य स्वकर्तृत्वं विहाय च।

साक्षादेकेन मनसा श्रीपतिं शरणं गतौ।

तस्मात् पुण्ड्रात्मनाऽत्र सरक्षार्थं सुरसत्तमाः।

यत्राऽनयो र्मनोयोगो नान्यत्र क्रमते मनाक्।४५

प्रतिज्ञेयं कृता पूर्वं विष्णुना प्रभविष्णुना।

मयि न्यस्तभरोरक्ष्यो मया सर्वात्मना जनः।

प्राणैर्दारैर्गणैश्चैव हेतुभिस्तनुभिस्तथा।

मयापि सर्वनाथेन संरक्ष्यश्शरणागतः।

प्रदीप कलिकाकारा यारेखा पुण्ड्रमध्यगा।

तस्यारूपेण लक्ष्मी त्वं कलया सन्निधिंकुरु।

ओंनमःकेशवायेति मन्त्रोच्छारण मात्रतः।

प्रपन्नस्य तनुं तावत् सत्यजेन्नाशुचा वपि।

ललाटे दृश्यते यावदूर्ध्वपुण्ड्र विधानतः।

अतस्तु श्वेतद्रव्येण चोर्ध्वपुण्ड्रधरो भवेः।५०

श्रीवत्स!शासनाद्विष्णो र्नामतःकेशवादयः।

आविर्भवंति पुण्ड्रेषु नात्र संदेहभाग्भव।

चतुर्धा वासुदेवस्य मूर्तिर्भिन्ना विलोक्यते।

सालग्रामशिलारूपा द्वितीया सुरनिम्नगा।

त्रितीया मन्त्ररूपा च चतुर्थी पुण्ड्ररूपिणी।

वैष्णवानां हितार्थाय जीवानां पावनेच्छया।

पुण्ड्राकारं समालोक्य तनौ संविशते हरिः।

श्रियासार्धं निजावासमालोक्य पुरुषोत्तमः।

अशुचिर्वाप्यनाचारी महापापयुतोपि वा।

पुण्ड्रसंधार्यतेनाव निर्भयत्वं प्रपद्यते।५५

स्त्रियोवैश्यास्तथा शूद्राः म्लेच्छवांत्यज जातयः।

ऊर्ध्वपुण्ड्रधरास्सर्वे समस्या देवता इव।

प्रणमंति विमानस्था देवाऽपि सहस्त्रशः।

दृष्ट्वा भागवतं दूरादूर्ध्वपुण्ड्रांकितं जनम्।

**ध्यानार्थमूर्ध्वपुण्ड्राणां** देवता दृक्पथंगताः।

एवं ध्यात्वा तनौधार्या श्रियोदेव्या समन्विताः।

**नारदाद्या ऊचुः-**

पितामह महाप्राज्ञ श्रीवत्सेन नृपेण च।

यथाऽवलोकितास्ता वै तथा नो वक्तुमर्हसि।

ब्रह्मोवाच-

**ललाटे **केशवं** शङ्खचक्र खड्ग गदाधरम्।

सुवर्णवर्णममलं  मुक्ताभरण भूषितम्।६०

शुक्लांबरधरं सौम्यं **नारायण**मथोदरे।

पीतवाससमब्जाक्षं शङ्खपद्म गदासिकम्।

मेघश्यामं मणिव्रात विभूषणधरं स्मरेत्।

**माधवं**चोत्पलप्रख्यं तप्तकांचन भूषणम्।

चक्र शार्ङ्ग गदा खड्ग धारिणं वक्षसिस्थितम्।

**गोविन्दं** कण्ठदेशे तु तथैवैनं विचिंतयेत्।

**विष्णुं** च दक्षिणाकुक्षौ गौरवर्णं मनोहरम्।

चक्रं शङ्खं हलं खड्गं बिभ्राणं क्षौमवाससम्।

अरविंदनिभं देवं बाहौ **मधुविनाशनम्।**

चक्रं शार्ङ्गं च मुसलं पद्मं बाहु चतुष्टये।६५

कंदरे दक्षिणेदेवं रक्तवर्णं **त्रिविक्रमम्।**

शङ्खचक्र गदाखड्ग धारिणं मकुटान्वितम्।

**वामनं** कुन्दवर्णाभं पुण्डरीकायतेक्षणम्।

दोर्भिर्वज्रं गदां शङ्खं ध्याये द्विभ्राणमंबुजम्।

वामकुक्षौ तथा वामबाहुके **श्रीधरं** स्मरेत्।

चर्मशाङ्गासि पद्मानि धारयन्तं महाप्रभम्।

रक्तारविंदनयनं मुक्तादाम विभूषितम्।

विद्युद्वर्णं **हृषीकेशं** वामस्कंधेऽरुणस्रजम्।

रक्तांबरधरं चक्रं शाङ्गं हलमसिं तथा।

धारयन्तं स्फुरत्कर्णं पुण्डरीकावतंसकम्।70

**पद्मनाभं** तथा पृष्ठे पीतवाससमेव हि।

इन्द्रनीलनिभं शङ्ख चक्रपद्म गदाधरम्।

त्रिके **दामोदरं** नाम रत्नभूषण भूषितम्।

पद्मं शाङ्गमसिं शंखं धारयन्तं घनप्रभम्।

<u>**वासुदेवं**</u> च शिरसि चिन्तयेदुक्त लक्षणं।

सहस्रदळ मध्यस्तं कोटि सूर्य समप्रभं।

चतुर्बाहुं श्रियायुक्तं स्फुरन्मकरकुण्डलम्।

एवं ध्यात्वा मृदाकुर्यात् ऊर्ध्वपुण्ड्राणि वैष्णवः।

प्राकृतत्वमपोह्याशु सादृश्यं लभते हरेः।

नारायणोऽदर्शयद् ध्यानार्थं पुण्ड्रदेवताः।७५

ता एव द्वादशाङ्गेषु तयास्संविवशुः क्षणात्।

तासां धारणतस्तौ तु विनिर्धूतमनोमलौ।

ऊचतुः परया भक्त्या पुटीकृत करद्वयौ।

हरिस्तु भगवान् साक्षात् वासुदेवोरमापतिः।

कथं द्वादशधाजातो यस्सर्वत्रैक उच्यते।

नारायण उवाच-

एतद्गुह्यतमं मां तु भवन्तौ शरणं गतौ।

अपृच्छतां रहस्यं हि ज्ञानं भागवतं महत्।

शुद्धा च मलिना चैव सृष्टिस्तु द्विविधा मता।

मलिना प्राकृता तत्र शुद्धात्वऽप्राकृता मता।

बंधायमलिना प्रोक्ता शुद्धासृष्टिर्विमुक्तये।८०

प्राकृता महतादिभ्यो विशुद्धा वासुदेवतः।

वासुदेवात्समुत्पन्ना या सृष्टि र्द्विजसत्तम।

संक्षेपात्तं प्रवक्ष्यामि मूर्ति तत्वं प्रबुध्यताम्।

वैष्णवानां तदा पूज्याश्चतुर्विंशति मूर्तयः।

संधार्यस्तत्र चाङ्गेषु केशवाद्या द्विषट्स्मृताः।

आत्मनः प्रोक्षणात्स्पर्शे द्वादशान्याश्च मूर्तयः।

स्नानतर्पण पूजायां संयोज्या वैष्णवैस्त्विमाः।

ज्योतिरूपमजं नित्यं सर्वाधिष्ठानमव्ययम्।

परिभ्रमादिरहितं तथा हेय विवर्जितम्।

कल्याणादि गुणोपेतं निराकारं निरञ्जनम्।८५

स्वाधारं बीजभूतं हि शुद्धस्य मलिनस्य च।

प्रकृतेः पुरुषस्यापि कार्यमात्रस्य सत्तमम्।

आत्माधार स्वरूपं च बीजं वृक्षस्य वै यथा।

अयः पिण्डे यथा वह्निरलक्ष्योपि पृथक् स्थितः।

तापयन् स्वप्रकाशेन परमात्मा सनातनः।

धरित्री सर्व बीजानां प्रावृड्कालेन सर्वतः।

दत्तेंकुराणि सर्वत्रह्यसं पृक्तानि वै यथा।

कालकर्मेच्छया विष्णोः स्वाश्रिताण्यनुरूपतः।

तथा भवंति विप्रेंद्र व्यक्तानि स्थूल रूपतः।

मुक्तयो निर्विकारो सा वात्मानं व्यतनोद्विभुः।९०

न कर्मफलभोगार्थं गुणमय्या न मायया।

ज्ञानेनैवाहमेकोहं बहुस्यां विनिवृत्तये।

मामाराध्य ममैवाम्शोरभिन्नैः प्राकृतात्मनाम्।

शुद्धसत्वेन द्रव्येण ह्यनावरण रूपिणा।

आविर्बभूव भगवानंशेनाधार रूपतः।

अयमंशोभगवतो ह्यभिन्नोऽप्राकृतो मम।

भगवानेव नो जीवो यो मया बद्यतेवशः।

न मुक्तो नापि नित्यस्तु जीवादन्यः परःपुमान्।

**द्विहस्तमेकवक्रं च शुद्धस्फटिक सन्निभम्।

सहस्रकोटिवह्नींदु लक्षकोट्यार्क सन्निभम्।९५

मरीचिमण्डले संस्थं चक्राद्यायुध लांछितम्।

किरीटहारकेयूर वनमाला विराजितम्।

पीतांबरधरं सौम्यरूपमाद्यमिदं हरेः।

ध्यानैकसाधनं ध्येयं योगिभिर्हृदयांबुजे।

पश्यंति सूरयः शश्वत् तद्विष्णोःपरमं पदम्।**

वासुदेवेति विख्यातं ततोऽन्यत्समपद्यत।

वासुदेवाभिधस्सोपि ह्येकवक्र श्चतुर्भुजः।

चक्राद्यायुध संयुक्तः तस्य कृत्यं निशामय।

स्थित्यै चक्रं सरसिजं दधानं सृष्टये पुनः।

मुक्तये पांचजन्यं च गदां संहृतये तथा।१००

मयूरवर्णवच्छ्यामः पीतनैसर्गिकांबरः।

स्फुरन्मकुट केयूर कांचीममञ्जीरमण्डितः।

स वासुदेवो भगवान् सृष्टिस्थित्यन्त मुक्तिदः।

केनापि हेतुनैवाभूद्द्वितीयश्च चतुर्मुखः।

नारायणोवासुदेवः त्रीतीयोयं द्विधा भवत्।

तयोरेको वासुदेवः शुद्धस्फटिकसन्निभः।

नारायणेति यः प्रोक्तो नीलांबुध समप्रभः।

एतस्माद्वासुदेवात्तु व्यूहोत्पत्तिं निशामय।

संकर्षणो वासुदेवात्तस्मात्प्रद्युम्न संभवः।

प्रद्युम्नादनिरुद्धो भूत्सर्व एव चतुर्भुजाः।१०५

ज्ञानादिगुण सामान्यो वासुदेवः प्रकीर्तितः।

सत्वादिगुणसामान्या प्राकृतेः प्रकृति र्यथा।

तथा गुणानां वैषम्ये वक्ष्यंते मूर्तयः क्रमात्।

गुणत्रयस्य वैषम्ये यथास्स्युर्महदादयः।

ज्ञानाधिकोऽभवद्ब्रह्मन् संकर्षणसमाह्वयः।

बलाधिकस्यात्प्रद्युम्नः ऐश्वर्येचाऽनिरुद्धकः।

मूर्तिभ्यश्चतसृभ्यः चतुर्विंशति मूर्तयः।

जायंते क्रमशो ब्रह्मन् दीपाद्दिपान्तरं यथा।

सर्वे चतुर्भुजाःपंच शङ्ख चक्रगदाधराः।

रुद्रादि देवतानां च व्युत्पत्तिस्तावदुच्यते।११०

वासुदेवादादि देवात् प्रतथमात्केशवस्तथा।

नारायणो माधवश्च त्रयस्त्वेता बभूविरे।

संकर्षणश्च गोविंदो विष्णुश्च मधुसूदनः।

त्रिविक्रमो वामनश्च प्रद्युम्नात् श्रीधरस्तथा।

अनिरुद्धाद् हृषीकेशः पद्मनाभश्च सुव्रतः।

दामोदरश्च तैरित्थं द्वादशांशाः प्रजज्ञिरे।

चतुर्व्यूहश्चतुर्व्यूहः स्त्वन्योपि समपद्यत।

तस्याप्यन्यान् प्रवक्ष्यामि चेतसा पुरुषर्षभ।

वासुदेवाच्छ तन्नामा तथा संकर्षणादपि।

प्रद्युम्नादपि तन्नामा तन्नामैवानिरुद्धकात्। ११५

अभूवन् क्रमशस्तेभ्यः चत्वारः पुरुषोत्तमः।

अधोक्षजो नृसिह्मश्च चतुर्थश्चाच्युतो मतः।

एतस्मादपि संभूतः पुरुषोत्तम संज्ञकात्।

व्यूहादपि परोव्यूहो जनार्दनमुखो महान्।

जनार्दनस्ततोपेन्द्रो हरिः कृष्णस्समाख्यया।

एवं द्वादशधाभेदो द्वितीयस्समपद्यत।

चतुर्विंशतिमूर्तीनां कीर्तनं पापनाशनम्।

दर्शनं चोर्ध्वपुण्ड्रेषु पंच पंच द्विजोत्तमाः।

पश्यतां हन्तिशमलम् किमुतोद्वहनां तनौ।

समतां सर्वलोकाश्च नमंति मम शाशनात्। १२०

*श्राद्धे जपे तथा होमे स्वाध्याये देवतार्चने।

दाने तीर्थावगाहे च कृतम् भवतिचाऽक्षयम्। *

दत्ते पुण्ड्राणि यो मर्त्यो लक्ष्मीरेखायुतानि च।

आयुश्श्री बलं ज्ञानं वैराग्यम् तस्य वर्धते।

केशवादीनि नामानि स लक्ष्मीकाणि बिभ्रताम्।

दुरितं यदि होत्पन्नं तत्क्षणादेव नश्यति।

धृत्वा पुण्ड्राणि गात्रेषु ब्रह्मत्वं भावयेद्यदि।

ब्रह्मा परोक्षतामेति मायागच्छेति नाशनम्।

अज्ञानादथवाज्ञानात् प्रेरणाल्लोभतोपि वा।

स लक्ष्मी कानि नामानि धृत्वा पापात्प्रमुच्यते। १२५

प्रायश्चित्तं तु पापानां मङ्गळानां च मङ्गळम्।

विष्णुतीर्थमृदांगेषु केशवादीन् करोति यत्।

भुक्ति मुक्तिमपिच्छूनां स लक्ष्मीकाश्च देवता।

उभयं तु प्रयच्छंति यद्यूर्ध्व तिलकंधृतम्।

लक्ष्मीवृद्धिं हरि ज्ञानं भोगमोक्षं स दैवतु।

प्रयच्छंति महाभागा वैष्णवा ऊर्ध्वपुण्ड्रिणः।

द्वादशापि च नामानि वासुदेवादिकानि च।

प्रपन्नेषु च देयानि पावनाय सुखाय च।

यस्य नाम भवेद्विष्णोः संबंधेन धरासुर।

नामापि न स्पृशंत्यस्य धूताः पितृपतेरपि।१३०

वासुदेवाद्देवदेवादपि केनापि हेतुना।

क्षिते बीजांकुरमिव मूर्त्यष्टक मजायत।

ब्राह्मी च मूर्तिः प्रथमा प्राजापत्याद्वितीयका।

त्रितीया वैष्णवी दिव्या चतुर्थी पुण्ड्ररूपिणी।

पंचमी मानुषी ज्ञेया सप्तमीचासुरी मता।

पैशाची चरमाचैता मूर्तयोलोक विश्रुताः।

मीनाद्या जज्ञिरे विप्र चतुर्व्यूहाद्यथा क्रमम्।

मत्स्यः कूर्मो वराहश्च वासुदेवादजायत।

नृसिंहो वामनो रामो जामदग्न्योप्यजायत।

संकर्षणात्तथा जज्ञे प्रद्युम्नाद्राघवो बली।१३५

अनिरुद्धादभूत्कृष्णः कल्कीति दशमूर्तयः।

संकर्षणाच्च पुरुषः सत्यः प्रद्युम्नसंभवः।

जातोऽच्युतोऽनिरुद्धाच्च बभ्रुः त्रैलोक्यमोहनः।

दाशार्हश्शौरिरन्यांशा वासुदेवाच्च जज्ञिरे।

संकर्षनाद्धयग्रीवः शंखोदर नृकेसरी।

वैकुण्ठमूर्तिराधातु मुकुंदश्च वृषाकपिः।

तत्रैवादि वराहश्च ततस्संकर्षणादपि।

'अनंतः पन्नगोजातः सहस्रफणवान्बली।

सुदर्शनाद्यायुधानि किरीटादि विभूषणम्।

मूर्त्याविर्भाव समये सहैवैतानि जज्ञिरे।१४०

देव्याश्च श्रियादयः तत्तन्मूर्तिभेदं समाश्रिताः।

श्रीवत्सादेवसकला जज्ञिरे दिव्यलांछनात्।

गरुडः पक्षिणामिंद्रो वाहको बलिनां वरः।

वासुदेवादि मूर्तिभ्यः छन्दोमूर्तिरजायत।

कुमुदाद्यैश्च भूतेशाः सर्वैःपारिषदैस्सह।

पादतश्चाऽनिरुद्धस्य समभूर्वा सहस्रशः।

सहस्रशीर्षचरण हस्तनेत्राद्भुताकृतेः।

अनिरुद्धाज्जगज्जज्ञे स्वांगादेव यथाक्रमम्।

ईश्वरः पुरुषोव्यक्तोऽनिरुद्धाख्यो निजांगतः।

मुखादिंद्र च वह्निं च छंदांस्यङ्गानि षट् तथा।१४५

जनयामास संलीनां चतुर्थांशो हरेरियम्।

पादोस्यविश्वाभूतानि त्रिपादस्यामृतं दिवि।

प्रद्युम्न संकर्षणक वासुदेव इति त्रयः।

त्रिपाद्विभूतिराख्याता अमृतामुक्ति सेतवः।

अतोदेवादिभिःपैत्रे ब्राह्मणः ब्रह्मकाङ्क्षिणः।

त्रिपादं पुरुषं साक्षा द्यजंति मनसाधिया।

आत्मानमनिरुद्धेनह्यभिन्नं चिंत्य चेतसा।

प्रद्युम्नादि स्वरूपेण त्रिपादि पुरुषत्रयम्।

पैत्रं स्थानं वैष्णवानामिदमेव परंमतम्।

मार्गोयमर्च्चिरादिस्स्यात् सूर्यलोक मुखेन हि। १५०

मार्गेणानेन गच्छंति वैष्णवाः परमात्मनि।

नान्यलोके निवासाय श्रुतिरत्र सनातनि।

कर्मिणां सूर्यपुत्रस्य लोकद्वारेण वै गतिः।

वसुरुद्रादिरूपेण पैत्रं स्थानमथापरम्।

वैष्णवानामनन्यानां वासुदेवमुपेयुषाम्।

यजनं शुद्धरूपाणां केशवादि स्वरूपिणाम्।

सर्वकर्मसु विप्रेंद्र सर्वावस्थासु नित्यशः।

वैष्णवो न यजेदन्यं चतुर्व्यूहात्परं मुने।

केशवादिममूर्तीनां पूजनं मुक्तये मतम्।

स्वर्गादि दिव्यभोगानां भुक्तयेऽन्ये प्रकीर्तिताः। १५५

यद्यप्यन्यन्न लोकेस्मिन्श्चतुर्व्यूहान्मनागपि।

तथापि नियमस्तावन्मतो मार्गद्वये द्विज।

पादलीलाविभूतीनां सेवनं पादभुक्तये।

त्रिपाद्विभूति सेवा तु मुक्तये नात्र संशयः।

त्रिपाद्विभूतिगा देवा विविच्यात्मविभूतितः।

महाभागवतैः पूज्याः शंख चक्रादिधारिणः।

अर्चिर्धूम विभागेन द्विधामार्गो निरूपितः।

अर्चिर्भागवतानां हि धूमाख्याः कर्मिणांमतः।

धूममार्गेणद्विविधा गतिः प्रोक्ता मनीषिभिः।

दैवी पैत्रीति विज्ञाता दैवीस्वर्गगतिस्स्मृता। १६०

अग्निष्वात्तादयो यत्र दिव्याश्च पितरो मताः।

मोदंते विविधैर्दत्तैः भागैःपुत्रादि निर्मितैः।

कर्मिणापितृलोके हि गति पैत्रीह्युदाहृता।

ज्योतिष्ठोमादिभिर्दैवी गतिरुक्ता द्विजोत्तम।

द्वावमो पुनरावृत्तियुतौमार्गौ सनातनौ।

आब्रह्मभुवनाल्लोकाः पुनरावृत्तिनो यतः।

अर्चिरादि गतानां हि वैष्णवानां हरिः स्वयम्।

गतिस्मृत्याविनिर्दिष्टा श्रृत्याचापि द्विजोत्तम।

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।

नाप्नुवंतिमहात्मानं संसिद्धिपरमां गताः। १६५

सूर्यमण्डलमाविद्य भित्वाऽऽवरणसंहितम्।

आप्लुत्यविरजातोये नित्यान्मुक्तान् समेत्य च।

स्वाधारं विरजं ब्रह्म गुणातीतमनामयम्।

शुद्धं महाविभूतीशं वासुदेवाख्यमद्वयम्।

प्राप्नुवंति महात्मानो महाभागवता द्विजाः।

नावर्तन्ते पुनस्तस्मात् पन्थानान्योऽयनाय च।

एवं कर्मणि मन्त्रेषु वेदेषु यजनेषु च।

सर्वात्मकेपि संप्राप्तो भेदस्सर्वात्मना द्विज।

प्राप्ये भोग्ये यतो भेदो नित्यानित्य विभेदतः।

विवेकार्थंपुनस्ताव दनिरुद्धोनिरूप्यते। १७०

द्यौर्मूर्ध्नो नयनात्पूर्यो मनसश्चंद्रमा अपि।

श्रोत्राद्दिशो नभोनाभेः पद्भ्यां भूमिरजायत।

प्राणाद्वायुस्तथऽपानान्मृत्युः केशात्तथांबुधाः।

ऋत्वादि कालभेदाश्च कालश्चाभूत्तथाधियः।

वनस्पतय ओषध्यो रोमकूपाद्विनिस्सृताः।

यज्ञाश्च जज्ञिरे तस्माद्बहवो बहु दक्षिणाः।

चातुर्वर्ण्यं क्रमाद्वक्त्र बाहूरुचरणोद्भवम्।

एवं सृष्ट्वा जगत्सर्व मनिरुद्धोजगत्तनुः।

अयं जगज्जगद्धाम कार्यकारणयोर्मतः।

अभेधोभोदितस्सद्भिः बीजपादपयोरिव।१७५

ज्ञानबुध्याह्यभेदेन पूजनं पुरुषस्य हि।

निष्कामाणां मुमुक्षूणामन्तःकरणशुद्धये।

ब्रह्मरुद्रेंद्रवरुण मनुकाल यमादयः।

चातुर्व्यूहात्मकास्सर्वे ह्यनिरुद्ध तनौस्थिताः।

भेदेन सेविताभोग माब्रह्मभुवनं ददुः।

राज्यं भौमं तथाचैन्द्रं प्राजापत्यं च वारुणम्।

ज्ञानवैराग्यकैवल्यं प्रयच्छंतिह्यभेदतः।

उपासितः पृथक् कृत्यह्यनिरुद्धोनिजायुधैः।

भूषणायुधजालैस्तु परमैकांतिनां गतिम्।

प्रयच्छति न संदेहो यतोनावर्तते पुनः।१८०

पृथक् कृत्यस्वमात्मान मास्तेऽनंतासनो हरिः।

*अनिरुद्धात्मकोदेवः श्रीभूमिभ्यां सहप्रभुः।

मध्ये क्षीरार्णवं श्वेतद्वीपाख्ये हेमनिर्मिते।

प्रासादे सेव्यमानश्च योगिभिर्विविधैरपि।

चण्डाद्यैर्द्वारपालैश्च कुमुदाद्यनुजीविभिः।

पक्षीन्द्रविष्वक्सेनाभ्यां सेव्यमानो मुदान्वितः।

श्रीवत्सवक्षा नित्यश्रीरनिशः शाश्वतोध्रुवः।

अनिरुद्धोजगत्स्वांशैः इन्द्राद्यैःपरिपालयन्।*

एवं सृष्टिः द्विधाभिन्ना वैष्णवी ब्राह्मणीति च।

वैष्णवी वासुदेवाद्या केशवाद्या प्रकीर्तिता।१८५।

अनिरुद्धात्मिकासृष्टि ब्राह्मी तत्र प्रकीर्तिता।

नाभीपद्म समुद्भूतो ब्रह्मा यत्र चतुर्मुख।

अनिरुद्धो हि पुरुषः यूयं नाभिसमुद्भवः।

मरीच्याद्यास्समभवत् सनकाद्यास्तु योगिनः।

क्रोदाद्रुद्रादयश्चासं स्तेभ्यो जातास्सहस्रशः।

प्राकृतेस्मिन् महाभाग संपूज्यास्तेपि भूरिशः।

नानाकामपरैः पुंबि समानीकृत्य विष्णुना।

कामानवाप्य संसारान्निवर्तंते न कर्हिचित्।

निर्हेतुक कृपादृष्ट्यायमपेक्षेत माधवः।

स एव निर्गुणैर्मार्गैः परमैकान्तिनां मुने।190

याति सर्वात्मना सर्वान् धर्मान् संत्यज्य वैष्णवः।

अन्यदेवेन साम्यं च न्यूनत्वं परमात्मनः।

संत्यज्य सर्वशेषित्वमाश्रित्याराधयेद्धरिम्।

श्रुति स्मृत्युदितं धर्मं पालयन् वैष्णवोत्तमः।

सात्वतान् सम निर्धिष्टधर्मान् भागवतांस्तथा।

उपास्य परमैकान्ति भावमासाद्य वैष्णवः।

प्रेमातिशय योगेन प्रद्युम्नादीनवाप्य सः।

वासुदेवमवाप्नोति  यतोनावर्तते पुनः।

एवं धर्ममविज्ञाय मोहिता मायया हरेः।

निंदंतु नामते भक्तान् प्रहसंतु निरंकुशाः।१९५

तेषां न सङ्गःकर्तव्यं परमैकान्तिभिर्नरैः।

संगादेव मतिभ्रंशो जायते नात्रसंशयः।

श्रीवत्स! वैष्णवोधर्मः तत्राप्येकांतिनामयम्।

न श्राव्यो नास्तिकानां च ये द्विषंति रमापतिम्।

प्रहृष्टौ भगवद्धर्ममाकर्ण्य द्विजपार्थिवौ।

द्वयार्थं चक्रतुस्तावद् विज्ञापनमतंद्रितौ।

ततो नारायणोदेवः करुणार्थी कृतेक्षणः।

द्वयं च मन्त्रराजं च चरमं सूक्तयोर्द्वयम्।

समादिदेशेसार्थंच तयोर्दीक्षा विधानतः।

तदानीमेव संप्राप्तः शरीरेच रमापतिः।२००

ध्यायेत्तं परया भक्त्या विना साधन कोटिभिः।

अयमेवपरोयोगो यद्भक्त्या पुरुषं व्रजेत्।

ध्याने नारायणं वीक्ष्य श्रीवत्सादि विभूषितम्।

सदा किशोरवदनं कोटिकंदर्प सुंदरम्।

सुस्वरूपावधिं दृश्य पद्मपत्रनिभेक्षणम्।

स्फुरद्दिव्याळकव्याप्त वदनांबुजमद्वयम्।

श्रिया भूम्या नीळया च नित्यमुक्तैरुपासितम्।

प्राप्यं भोग्यं रक्षकं च यदेकं श्रुतिबोधितम्।

तदेव ध्यानविषयं संप्राप्य द्विजसत्तम।

तत्रैवाऽळकनन्दायास्तीरे नारायणाश्रमे।२०५

नृपश्च कौस्तुभालोकी द्वयं ध्यायन् समाहितः।

मन्त्रराजं जपन् स्तत्र चरमार्थं विचिन्तयन्।

पठन्सूक्तं हरेर्नामसहस्रं च पठन् मुखात्।

उद्वहन् नित्यसंबंधमात्मनः प्रभुना सह।

विरहं चासहन् विष्णोः दिव्यवक्षस्थलस्य च।

श्रीवत्स लक्ष्मयुक्तस्य श्रीवत्साख्यो द्विजोत्तमः।

ध्यायमानोमुदा तत्र बहुकालं समास्थितः।

विष्णुधर्मापि राजर्षिः कौस्तुभार्पितमानसः।

तयोस्समभवत्कालो यो लोकानां क्षयंकरः।

तेन कार्याणि सर्वाणि करणे विवशस्स्वके।२१०

एतौ देवी मयि प्रीत्या मामेव शरणं गतौ।

श्रीवत्स कौस्तुभासक्तौ तत्प्रभामुपजग्मतुः।

नारायणोपदेशेन तीर्थस्यांबुनिषेवणात्।

शंखचक्रोर्ध्वपुण्ड्रादि धारणादर्धचिन्तनात्।

मत्प्रेमातिशयात्सार्ष्टिं प्रयातौ परमोत्सवात्।

इयं श्रीवत्स! सामीप्ये या प्रभाह्यवलोक्यते।

या तु कौस्तुभसामीप्ये तदाकारा तु वा प्रभा।

तावेव द्विजराजानौ भवतीव मया धृतौ।

यूयं मम तनौभाति विशेषोब्धि समुद्भवे।

नित्यो वा मम भक्तो वा मद्योगंप्राप्य तिष्ठति।२१५

क्वचायं प्राकृतौ जीवे मायया मलिनीकृतः।

क्वेयं भक्त्याबिधादूती ययाहं संपुटीकृतः।

भक्त्याहमेक यो ग्राह्यो नाहं साधन कोटिभिः।

नाहं त्वां विसृजे भक्त्या वक्षसा धारयाम्यहम्।

एष एव परोपाय उपायानां शतेषु च।

परमैकान्ति भावेन यन्मामेवं प्रपद्यते।

एवं प्रबोधिता लक्ष्मीः पुरा मे पद्मसंभव।

हास्येन स्मारिता भूयो न त्वं शोचितुमर्हसि।

यदि ते मुक्तिकामोस्ति संसारात्कमलासन।

तदा मच्छरणं याहि परमैकांतितां भजन्।२२०

रूपं तु वैष्णवं कृत्वा तनुं सन्ताप्यहेतिना।

नैवा तप्ततनु ब्रह्मन्! यतो या मुपयाति हि।

नाम्नां द्वादशकं धृत्वा दिव्यसृष्टि विचिंतय।

मन्मनाभव मद्भक्तो मद्याजी मां नमस्कुरु।

मदनन्यार्ह शेषस्स्यात् मदनन्यार्ह साधनः।

न ते बंधःप्रभविता सत्यं सत्यं वदाम्यहम्।

मामुवाच ततो धर्मं तनुं संस्कृत्य हेतिना।

मुनयो निवसां यत्र वैष्णवंवेषमुद्वहन्।

भवंतोपि मदादेशात् धर्मं भागवतं महत्।

प्रबन्धैस्वैर् विनिर्माय मुमुक्षून् शरणागतान्। २२५

दिशंतु हेतिसंस्कारपूर्वकं विनिवृत्तये।

सुदर्शनाभिधागीता गेया सज्जन सन्निधौ।

पुण्यर्क्षे पुण्यवारे च पुण्यमासे तिथौ तथा।

पुण्यतीर्थे विशेषेण द्वादश्यां श्राद्धवासरे।

वैष्णवैर्वैष्णवीगीता श्रीवत्स! चरितान्विता।

श्रोतव्या च तथा श्राव्या जन्मबंध विनाशिनी

वैष्णवाय प्रयच्छंति लिखित्वा पुस्तकं तु ये।

ते वैष्णवा भविष्यंति परमैकान्तिनोऽमलाः।

इति वः कथितं विप्राः चरितं ह्यात्मनो मया।

किं भूयः श्रोतुमुत्कण्ठा मुनयो ज्ञानदर्शिनः । २३०

इति श्री बृहद्ब्रह्मसंहितायां प्रथमेपादे श्रीवत्सचरिते पुरुषसूक्ताराधनं नामत्रयोदशोऽध्यायः।

# इति प्रथमोपादः समाप्तः

# श्रीपाञ्चरात्रे बृहद्ब्रह्मसंहितायाम् द्वितीयो भागः

## अध्यायः - 1

## विष्णुस्वरूपं प्रति प्रश्नः

ऋषयः ऊचुः-

बृह्मन् श्रीवत्सचरितात् संदेहो निगतो हि नः।

विना भागवतंधर्मं वैष्णवी दुर्लभा गतिः।

विष्णुस्वरूपं लोकं च वैष्णवं धर्ममुत्तमम्।

गतिं विस्तरतो ब्रूहि प्रजास्तव पितामह।

बृह्मोवाच-

के वै विमातुं प्रभवंतिविष्णोः स्वरूपलीला विभवंस्तु लोके।

तस्तंभयोविश्वमिदंसमस्तं पादेनचैकेन समस्तसत्वम्।

अहं पुरा नाभिसरोजजातो महाजलौघेश्वसनाव भूते।

न यत्र सूर्येंदु हुताशनायो दिगंतरं तान् गमयां चकार।

अभूतपूर्वं परितोनिरीक्ष्य तमश्चकम्पे मनसाऽहमेकः।

कोऽहं किमेतत् क्वच संस्थितोऽहं कस्याहमत्र प्रकरोमि किं वा।५

एवं विचारेण चिरं विमुह्यन् चैतन्यरूपोपि विमोहितोऽत्र।

अपश्यमत्यन्त विकासमादौ तिरस्कृतानंत दिनेशकांति।

हिरण्मयं पंकजमप्रमेयं सहस्रपत्रं विहसत्सुकोशम्।

स कर्णिकारं सितवर्णमद्भुतं समस्त विश्वस्य निधान भूतम्।

विलोक्यपद्मं परितःप्रवृद्धं कुतोऽस्यमूलं किमिदं व्यतर्कि।

निरीक्ष्य किंचिद्विपरं च तस्मिन्नहं प्रविष्टः परिलब्धमार्गः।

तस्मिन् गतोऽहं न ददर्श पारं न वै पुनर्निर्गमनाय मार्गम्।

एकोहमज्ञान्तरसन्निविष्टः चिंतामनंतां मनसात्व वापम्।

प्रभ्राम्यतो मे निरगादनंतः कालःकलाभिः कलयान्जनायुः।

अण्डं च हैमं विधृतं मुरारेः महौजपातत्र ददर्शचैकः।१०

तदण्डं पंचभूतात्मा भूतंशुद्धमतर्कितम्।

तद्भेत्तुमसमर्थोहं मा समानत वीक्षणः।

तदाहं देवपद्मास्य पुनर्नाळमुपेयिवान्।

तन्मार्गेण गतोभूयोह्यपश्यं कंचिदद्भुतम्।

पुरुषं तत्र संसुप्तं नागभोगे निरामयम्।

यं नाभिलोकपद्मस्य नाळ एष नियोजितः।

यस्य प्रकाशलेशेन नाळरंद्रप्रवर्तिना।

भातं कमलकिंजल्क पत्रकेसरवैभवम्।

कापि तत्रारुणापाङ्गसुंदरी रूपमंजरी।

संश्लिष्टादिव्यवसना चंद्रिकायुतशीतळा।१५

प्रसुप्तपरिवारांता मीषद्विकसितेक्षणाम्।

लीलयालीडहृदयां मातरं वीक्ष्यविस्मितः।

सा मामुवाच जठरे मयापूर्वं चिरं धृतः।

पुरुषानुमते भूयो विश्वसृष्टौ बहिःकृतः।

अनेन नाळमार्गेण कथं पुनरिहागतः।

अजानन्नात्मनोयोनिमिव मध्ये प्रधापसि।

पद्मनाभःपिताह्येष तव पुत्र सनातनः।

संहृत्यलोकान् विश्वात्मा ह्यनिरुद्धसमुद्भवः।

अनिरुद्धांशजोधीमान् पद्मनाभःपुरातनः।

यद्यस्यद्द्रष्टुकामोपि किमप्यस्यद्विलोकय।२०

तदाहं कौतुकाकांक्षी  न तु सत्कृत्याददे वचः।

मातरस्यां तमभ्येतुं यामिमे देहि शासनम्।

विहास्य मामुवाचेदं गच्छ पुत्र यथासुखम्।

“गत्वाहं तत्र मुनयो न्यग्रोधं वीक्ष्यविस्मितः।

वटपत्रपुटे विष्टं पद्मनाभं स पन्नगम्।

कोमलाङ्गं श्रियायुक्तं बालरूपं चतुर्भुजम्।

यस्यनाभिह्रदे पद्ममद्राक्षं भ्रमरोपमः।

तत्रैकां सुंदरीं दृष्ट्वा बद्धपाणीपुटां सतीम्।

अवोचंतामुपेत्याहं कासीकल्याणि सन्निधौ।

कोयं च पुरुषश्शेते वटपत्रे महाद्युतिः।२५

सा मामुवाच विकसद्वदनाविश्वकारिणी।

दुर्गा शक्तिस्समाख्याता पादलीला विहारिणी।

नियोगात्पुरुषस्यास्यं संलब्ध बलपौरुषा।

विष्णोःशक्तिर्महाभाग नान्यं देवं भजाम्यहम्।

शक्याऽभिभवितुं नाहं केनापि पुरुषेण वै।

महाविभूतिसंस्थस्य दुर्गभूता वसाम्यहम्।

विना विष्णुप्रसादेन मामतिक्रम्यकर्मणा।

लीलाभूमिमवाप्नोति कोपि नैव जगत्त्रये।

नचाहं परिघाकारा शैलकानन भित्तयः।

स्वशक्त्या सर्वतोव्याप्ता दुर्गभूतास्मि वैष्णवी।३०

अहं न्यग्रोधरूपास्मि ह्यनिरुद्धांशजानघ।

पश्यैनं तरुराजं च पुरत्संकारणात्मकम्।

यावंतिवटपत्राणि कोटिशो विलसंति हि।

तेषु सर्वेषु मत्स्वामी परमात्मा व्यवस्थितः।

पुटपर्यंक संसुप्ता बालरूपाश्चतुर्भुजाः।

ज्ञानवीर्यबलोपेताः पद्मनाभेति कीर्तिताः।

यथा त्वद्योनिभूतोसौ यस्यन्माभेस्त्वमभ्यगाः।

एवमेतेषु सर्वेषु नाभिर्नाळान् विलोकय।

तेषु त्वमिवब्रह्माणः कोटिशो विचरन्ति हि।

स्वस्य स्वस्य च नाळस्य नांतं गच्छन्ति केचन।३५

मयैवह्यवृतास्सर्वे दुर्गया दुर्गरूपया।

अभिभूयाऽनिरुद्धं मच्छेषिणं परमेश्वरम्।

न गच्छंति त्रिपादस्थं वासुदेवं सनातनम्।

यदि ते संशयोदेव गच्छचान्यत्र पश्य च।

यत्र यत्र महाबाहो गमिष्यसि दिदृक्षया।

पुरुषेण सहैवं मां दुर्गाख्यं परिपश्यसि।

एकैवाहं महाभाग कोटिब्रह्माण्ड वेष्टने।

एकेनाहं च देवेन रक्षिता बहुरूपिणा।

अन्यश्च शक्तयस्तस्य कोटिशः प्रभवंति हि।

दुर्गाख्य कर्मणि तथा दुर्गैकाहं प्रतिष्ठिता।40

ये मामुपासते लोका दुष्करेष्वपि कर्मसु।

तेषां पादविभूतिस्थं कार्यं सर्वं करोम्यहम्।

जगत्येवं नियोगो मे ब्रह्मन् भगवता कृतः।

तदधीनास्मि तच्छक्तिःशक्ताहं नातिवर्तितुम्।

अप्राकृत विहारस्थाश्शक्तयः कमलोद्भव!।
उपासां चक्रिरे विष्णुम् कोटिशस्तदनुज्ञया।
इत्युक्तोहं गतोऽन्यत्र वटपत्रे प्रहृष्ट धीः।
एकाकीनं बालरूपमपश्यं पुरुषोत्तमम्।
पादस्यांगुष्ठमादाय पिबंतं सुंदरस्मितम्।
तमादातुं ममेच्छाभूद्बालं ज्ञात्वा महर्षयः।४५
तावन्मां वारयामास दुर्गादेवी समेत्य च।
नेयं लीला भवद्योग्या बीजभूतान्यसंसृतेः।
अस्या अंतमनालोक्य कथमन्यामुपैष्यसि।
नादिजग्मुः परेपारं ब्रह्मणः काल चालिताः।
एवमुक्तोहमपदं त्वमेकाव्याप्य संस्थिता।
प्रदर्शय महाभागे! स्वरूपं पुरुषस्य ते।
अंतर्हिता तदा देवी सकाशामगमं शिशोः।
तेनाहं स्वास्यमार्गेण ह्यंतर्नीतोस्मि चक्रिणा।
अपारजलधौ तत्र कोटिशो वटपादपाः।
कोटिशःपुरुषातस्तत्र वटपत्रनिवासिनः।50
कोटीनां वट वृक्षाणामनंतपुट तल्पगाः।
अनंताण्डसमाधाराः कोऽवधारयितुं क्षमः।

दुर्गाभिर्दुर्गमास्ते तु सर्वे सत्यमनोरथाः।

स्वीकांविस्मृतवान् योनिं यामपोह्येहचागतः।

यस्यनाभिसमुद्भूत नाळगर्भकृतालयः।

क्वासौ स पुरुषःसाक्षात् अनिरुद्धात्मकःपरः।

क्वच सा सुंदरीदेवी नीलोत्पलविलोचना।

क्वच सा दुर्गमाशक्तिः ययाहं विनिवारितः।

एवं चिंतयमानस्य पुरतो मम सुंदरी।

आविर्बभूव दुर्गाख्या दुर्गमा सर्वदैवतैः ।55

ब्रह्मन्नासादितं पुंसो वैभवं किमियत्तया।

निवारितो मया पूर्वं वचो मे नावधारितम्।

स्वामिनो मम लीलायं पादरूप महात्मनः।

निगृहीतान केनापि त्वद्विधैरवलोकिता।

न माययाभ्रमश्चैषस्वप्नवत् कमलोद्भव।

अनंतानंत रुपेण शक्तिश्चैषा रमापतेः।

“यतोवाचोनिवर्तंते ह्यप्राप्य मनसासह।”

स एव पुरुषस्साक्षादाधारः पुरुषोत्तमः।

अनादिवैष्णवीचैषा पादलीलाऽवधार्यताम्।

अविज्ञातेतियज्ज्ञानं ज्ञानं तदिह कथ्यते।60

मयाज्ञातमितिज्ञानमज्ञानं कमलोद्भव।

अज्ञानेनावृतोजीवो मुह्यत्येवेति मे मतिः।

संप्रार्थ्यश्चैषपुरुषः प्रकृतीं गंतुमात्मनः

विजिज्ञासामितिधियं विनिवर्तयसर्वतः।

एवमुक्तो नयादेव्या बद्धांजलिरहं पुनः।

स्वाभिमानं परित्यज्य बभाषे शरणं गतः।

तस्मिन्नेव महावृक्षे प्राप्तोवक्राद्विनिर्गतः।

अपश्यं वटपत्रस्थं स दुर्गं पुरुषं परम्।

शरीरान्मुनयस्तावत् सुंदर्यौ मम निर्गते।

विलीनानयनेचैका हास्येचैका परात्मनः।65

संशयो मे महानासीन् मुनयस्समवेक्ष्यते।

दुर्गाविहास्य मामाह किमर्थमनुशोचसी।

अयं तु पुरुषस्साक्षात् वटपत्रे पुटेस्थितः।

शक्तयो बहवस्संति तत्रामूच विनिर्गते।

हास्यरूपेण वदने लीलाख्या वसति प्रभोः।

व्यामोहिनी महाशक्तिस्सहासे नयनांबुजे।

लीलया विधृतस्त्वांतु पारंगंतुम्मनोऽकरोः।

मया निवारितोनूनं स बुद्धः कमलोद्भव।

मोहिन्या  मोहितस्त्वंतु व्यस्मार्षीर्योनिमात्मनः।
प्रविष्टे ते शरीरे ते यावन्न शरणागतः।70
मदाज्ञया प्रपन्नस्य शरीरा ते विनिर्गते।
ध्रुतं ते स्वाश्रयं प्राप्ते प्रभोः प्रीतिं विधाय च।
एवं ज्ञानादयोऽनंतारुशक्तयः पूर्णरूपतः।
महाविभूतिलीलायां पादे पादेन संस्थिताः।
कृतं कर्मकरिष्यामो वयमत्र तदाज्ञया।
हरिर्यथा यथा स्वांशै राविर्भूतस्तथा वयम्।
एक एव पुरैवासीद्देवो नारायणःस्वयम्।
स्वांशैरशेषैस्संयुक्तो नामरूपक्रियोज्झितैः।
एवं रमा महाशक्तिः शक्तीनां परमायना।
तस्यामेव वयंसर्वा लयंयामो युगात्यये।75
विलीनाहृदये तस्य या रमेत्यभिधीयते।
यत्रायं रमते नित्यं तस्मादेषा रमा स्मृता।
यावंतश्चेतनाभावाः प्रसिद्यंत्यादि संभवे।
अचेतनसमालीडाः प्रलीयंते निजात्मनि।
वयं च त्वमिमेसर्वे स्वांशैर्शुद्धैःमलीमनैः।
सर्वंनारायण इति परिशिष्येतनापरः।

यथा वटप्रवाळानि स्कंदशाखाः फलानि च।

अदृश्यान्येव तिष्ठंति बीजे बीजस्वरूपतः।

सिसृक्षया पुनस्तस्य रमाक्रीडनकात्मिका।

भूम्या च नीळया साकं भिन्ना भवति पद्मज। 80

भूमिराधाररूपा हि नीळाकाळ्यंकुरोदयम्।

करोति सततं विष्णोः नयनांगण नर्तकी।

रमा तु सर्वरूपेण समस्ताश्रित शक्तिभिः।

विनोदयति भूयिष्टं परिपूर्णानपायिनि।

**भविष्यति रमैवैका कीर्तिकांत्यादि रूपिणी।**

**सरस्वत्यादि रूपेण तदा मत्स्यादिरूपिनी।**

**ब्राह्मी गौरी गिरादेवी सीता सत्या च रुक्मिणी।**

<u>सत्यभामा धरारूपा</u> *नीळागोपसुता भवेत्।

अहमप्यनयार्दासी केळ्यावरणरूपिणी।

महिषादिमहारूपा नाशयिष्येष्वसुरान् बहून्।८५

यदाऽयं पुरुषःपूर्णो वसुदेवाद्भविष्यति।

भारापनोदनार्थाय सुरकार्यचिकीर्षया।

तदाहं नंदभार्यायां यशोदायां महाबला।

मोहनाय भविष्यामि त्वं मां ज्ञास्यसि भूयशः।

ब्रह्माण्डानामनेकेषां सृष्टानां कमलोद्भव।

सर्वत्र वटरूपेणह्यनिरुद्ध समुद्भवा।

तिष्ठामि दुर्गारूपेण दुर्गमाहंदुरात्मनां।

निदानं भगवद्भक्तैः परमैकांतिनां सुखं।

मत्परा तु परा लीलाह्यसंख्याता न संशयः।

नित्यमुक्तजनैस्सेव्या तत्र शक्तिर्न वै मम।90

वैकुण्ठादीश्वरीदेवी लक्ष्मीर्नित्यानपायिनी।

सा समाराधितानूनमंशेन कमलापि वा।

नारायणेनसहिता तदुक्तागमचिंतया।

पादलीलां परित्यज्य गुणत्रय विवर्जितम्।

मुक्तस्सतु महालीलारसं जानाति नापरः।

यथा विश्वसुखं कोपि मामृतेनाधि गच्छति।

एवमुक्त्वा तु सा देवी तत्रैवांतरधीयत।

अहं च नाळमार्गेण कर्णिकायामुपस्थितः।

एवमेषमहालीलो भगवान् भूतभावनः।

वक्तुं द्रष्टुं च विज्ञातुं न शक्यःकोटिजन्मभिः।95

मुनयोबीजभूतं हि स्वरूपं कारणात्मकम्।

कार्यभूतं च वक्ष्यामि यदि वो मनसो रुचिः।

इति श्रीपांचरात्रे बृहद्ब्रसंहितायां द्वितीयपादे

विष्णुस्वरूपप्रश्नं नाम प्रथमोऽध्यायः।

## अथ विष्णुस्वरूप कथनं नाम द्वितीयोऽध्यायः

श्री ब्रह्मोवाच-

संस्कृतोहं यदा विप्राः पारमैकांत्यसिद्धये।

तदा मामवदद्विष्णुः स्वरूपंमेऽनुचिंतय।

चिंतयानस्स्वरूपं मे मां परं सर्वकारणम्।

अभ्येति पुरुषोनूनमात्मानमजमव्ययम्।

तदापृच्छमहं तस्य स्वरूपं ब्रह्मलक्षणम्।

यत् प्राप्य न निवर्तंते पुनस्संसारवर्त्मनि।

श्रीनारायण उवाच -

आनंदलक्षणं ब्रह्म मत्स्वरूपमविक्रियम्।

क्लेशादिभिरसंस्पृष्टं निष्क्रियं निर्विकल्पकम्।

अद्वंद्वमनविच्छिन्नं स्वसंवेद्यं निरंजनम्।

सुसूक्ष्मं स्ववशंस्वैरं स्वयंज्योतिरनादिमत्।५

द्रुवमेकं सदानंदस्वरूपं सर्वगं परम्।

गतागतविनिर्मुक्तं वासुदेवाह्वयं प्रभु।

श्रुत्वेदं संशयमना भूयस्सं पृष्टवानजम्।

सर्वगं च धरं चेति निष्क्रियं निर्विकल्पनम्।

कथंस्याद्भवतोरूपं विरुद्धं प्रतिभाति मे।

निष्क्रियेगमनं कुत्रधारणं निर्विकल्पने।

श्री नारायन उवाच-

अहं तु परिपूर्णात्मा परिच्छेद विवर्जितः।

परिच्छिन्नं मया सर्वं द्वितीयम् यद्विलोक्यते।

ममैव शेष रूपत्वादहमेव तदेव च।

तत्तदाकारतस्तत्र तत्रचान्यत्र संस्थितः।

अचंचलो यथा चंद्रो व्योममण्डलमास्थितः।

चलद्भिर्जलदैर्ब्रह्मन् चलन्निव यथा भवेत् ।

मच्चरीरतया सर्वं श्रुत्या स्मृत्या विनिश्चितम्।

सामानाधिकरण्यं तु तत्कृतं मयिभासते।

तत्सृष्ट्वा तत्प्रविश्याहं सर्वनामतया स्थितः।

अतो मां सर्वगंप्राहुः सर्वं च मयि संस्थितम्।

मदायत्तस्थितित्वाच्च मच्छरीरतयाविधे।

अहमात्मातया धर्ता सर्वस्यास्य महामते।

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्।

नेतुर्विधृतिरित्येवं श्रुतिस्मृत्यवभोदितः। १५

न तदस्तिविनायत्स्यान् मयाभूतं चराचरम्।

अतो मां धारकं प्राहुः स तरंगमिवांबुदिम्।

दृश्यमानमिदं सर्वं चेतनाचेतनांचितम्।

अदृश्यरूपमासाद्य कारणे मयि संस्थितम्।

अक्षरं लीयते तावत्तमसीति श्रुतिर्जगौ।

तमःपरस्मिन् मय्येव नाहमन्यत्र कुत्रचित्।

मत्तःपरतरं नान्यत्किंचिदस्ति मनागपि।

अहं सर्वस्यप्रभवो मत्तस्सर्वमिदं जगत्।

दृश्यरूपदया सर्वं काष्ठादग्निरिवोत्थितम्।

नामरूपक्रियाभिश्च मयि सर्वं प्रतिष्ठितम्। २०

मृद्येवसूक्ष्मरूपेण निर्विशेषतयास्थितः।

विशेषरूपेण यथा मृद्येवोन्मज्जतेघटः।

स घटापि महीपूर्वं निर्घटाह्यनुभूयते।

पश्चात्घटेनसंयुक्ता स विशेषाप्रतीयते।

एवं विकल्पहीनोपि स विकल्पोभवांयहम्।

आधारोहमशेषस्य सर्वावस्थास्थितस्य च।

मय्येव निर्विकल्पत्वं सविकल्पत्वमीक्ष्यताम्।

वटबीजवटोब्रह्मन् वीक्ष्यतेनापि वीक्ष्यते।

सर्वंकार्यमयि व्यक्त मव्यक्तं कारणेमयि।

सर्वमेवाहमेवं च नचाहमहमेव च।२५

सर्वाधारतयाब्रह्मन्नहमेकोऽद्वयः परः।

मदेकायनतस्सर्वमहमेव न संशयः।

द्वैतं नास्तीति बोधेन मनसोद्वैतनाशनम्।

एतदंतो हि संसारो ब्रह्मन्नेवं विचारय।

प्रभवं सर्वभूतानां ईश्वरं पुरुषोत्तमम्।

स्वभावनिर्मलं नित्यं निस्तरङ्गं निराकुलम्।

निर्गुणं तं गुणातीतं सगुणं सर्वकामदम्।

हीनवर्णैरसंसेव्यं ईक्षमाणैरतर्कितम्।

मुनयः पुनरेवाहमपृच्छमकुतोभयः।

न संदेहमभक्वैव जायते कोपि मानुषः।३०

गुणातीतं  हि सगुणं कथं भवितुमर्हति।

हीनवर्णैः कुतोसेव्यं कथमन्येरतर्कितम्।

श्री नारायण उवाच-

स्वभावनिर्मलत्वं मे स्वरूपमवधारय।

कदापि प्रकृतेस्संगान्मालिन्यं नोपजायते।

अंशात्मकस्य मे ब्रह्मन् मालिनांशेतु वै पुनः।

मालिन्यं जायते योगादिति मे निश्चयः प्रिय।

ममैवांशो जीवलोके जीवभूतस्सनातनः।

प्रकृतेः कार्यभूतानि मनः पंचेन्द्रियाणि च।

निजात्मत्वेनगृह्णाति मालिन्यादिति कथ्यते।

अनात्मत्वेन जानाति यदा सोपि मदात्मकः।३५

निर्मलो भवति ब्रह्मन् यदाऽहंपुरुषोत्तमः।

मत्प्रसादादहं तावदात्मैषां नित्यनिर्मलः।

कदापि मलसंयोगो वियोगोनापि मे भवेत्।

चिदचित्प्रकृतौ यद्यप्यंतर्यामितया स्थितः।

लीलार्थमवतारादौ यद्यप्यनुकरोम्यहम्।

जानंत्यनुग्रहीतास्तु मामेक ज्ञानविग्रहम्।

मलिनं मां विजानंति मलिना मम मायया।

तेषां न संगः कर्तव्यो मदीयैर्मोक्षकाङ्क्षिभिः।

कदापि प्रकृतेस्संगो मोहकस्स्यान्न वै मयि।

मत्त एव प्रभवत स्मृतिज्ञान व्यपोहने।४०

स्वभावनिर्मलोहं वै सर्वावस्थासु पद्मज।

अंशो मे जायते ब्रह्मन् नवस्थान्तरभागिह।

बंधावस्थाकृतं तत्र मालिन्यमनुभूयते।

अहमज्ञोब्रह्मणश्च संसारी सुखदुःखभाक्।

ब्रह्मेवास्मीति भोदेन तत्सादृश्यमुपेत्य सः।

निर्मलो भवतिब्रह्मन् मत्तेजोह्यमलं महत्।

द्विविधेपिममैवांशे संसारोह्यवलोक्यते।

लोकदृष्ट्या तु चैकत्र व्यामोहादेकतो मतः।

अवतारस्वरूपे तु लोकदृष्ट्या न मोहतः।

जीवरूपे ममैवांशे मोहतः परिकीर्तितः।45

अंशयोगेन मय्येवं संसारं श्रुतिरुज्जगौ।

स्वभावनिर्मलत्वं हि मतं ह्यावर्तकं द्वयोः।

असंशभूते पूर्णे तु परमात्मनि शेषिणी।

स्वभावतो न मालिन्यं शेषयोर्नापि तत्वतः।

तरंगभूतयोरेतदंशयोः पुरुषोत्तमः।

पृथत्त्वान्निस्तरंगोर्मि संसाराच्च निराकुलः।

समष्टिव्यष्टिदेहत्वान् मानं मे प्रतिभासते।

उभयोरात्मभूतत्वात् निर्गुणं मां प्रचक्षते।

सत्वादि त्रिगुणः प्रोक्तो जीवोंशस्सगुणोमतः।

मोक्षे तु निर्गुणस्सोपि गुणातीतो यदुच्यते।५०

अहं तु निर्गुणो नित्यं प्रकृतेस्संगवर्जनात्।

प्रपन्नस्य ममांशस्य गुणत्रय विमोचकः।

निर्गुणो मम शब्दोयं अंशव्यावर्तको मतः।

नित्यानंद गुणैः पूर्णस्सगुणोहं परात्परः।

एकस्यैव ममांशस्य गुणव्यामोहतो जगत्।

द्वितीयस्यास्य दृष्ट्या तु भासतेनापि बंधनम्।

सगुणानां मदंशानां गुणित्व विनिवृत्तये।

निर्गुणोपि मदंशोऽन्यो गुणवानिव भासते।

हीनवर्णैर्ज्ञानशून्यैरसेव्योहं न संशयः।

त्रिधाभिन्नं स्वरूपं मे न जानंति कदाचन।55

पूर्णरूपमविज्ञेयं ज्ञेयं शब्दानुमानतः।

आधारभूतं सर्वेषां आदेयानां चतुर्मुख।

सर्वतोऽन्यतमश्चाथ सर्वशब्दैर्नबाद्यते।

पूर्णरूपक्रियाभिश्च सर्वेभ्योह्यतिरिच्यते।

अस्त्याधारतया ब्रह्मन् ननभिव्यक्ति कल्पनम्।

स देवसोम्येदमग्र आसीदिति श्रुतेर्बलात्।

स देवो ब्रह्मविज्ञेयं गुरुशास्त्रोपदेशतः।

आसदीतात्म शास्त्राणां हीनानां सुगतिर्मता।

स्वगताशेषसंव्यक्त नानाधेयगुणादिभिः।

प्राकृताः प्राकृतोदेव सर्वरूपो बभूवह।60

द्वितीयं ज्ञानमाख्यातं सर्वं विष्णुमयं जगत्।

व्यक्तादेय विशिष्टं हि त्रितीयमवधार्यताम्।

शुद्धसत्वस्वरूपेण परित्राणाय वै सताम्।

स्वानुकूलयुधानेक विभवेन समन्वितम्।

आविर्भूतं स्वरूपं मे ह्यहमेवाच्युतं परम्।

मदीया एव जानंति ज्ञानिनो मदनुग्रहात्।

यस्मिन्यस्त्यधियो मूढा वैरिणोपि चतुर्मुख।

मद्गतिं प्राप्नुवंतीति सर्वशास्त्रेषु डिण्डिमः।

ब्रह्मात्मकंजगत्सर्वं कारणे जगदात्मकम्।

कार्येब्रह्म महाभाग! सेव्यं सर्वात्मनाबुधैः।65

कार्यकारणरूपेण ब्रह्मैकं हि द्विधास्थितम्।

ज्ञानशून्यैरगंयत्वात् कथंसेव्यं भवेदिह।

अन्यैर्मुमुक्षिभिस्तात ब्रह्मसेव्यमतर्कितम्।

गुरुशास्त्रोपदेशेन संक्षयस्योप संक्षयात्।

अध्येयं ध्येयमाश्चर्यमवाङ्मनस गोचरम्।

षाड्गुण्यविग्रहं सर्वशक्ति स्वाश्रय संज्ञितम्।

इयत्तयाऽनभिध्येयं ध्येयं वस्त्वस्ति वेदनात्।
अदृश्यानेक विषयं निर्विशेषं स्वयं च तत्।
विशेषं न ततो भिन्नं निर्विशेषं न तद्भवेत्।
विशेषादपरोयस्मा द्विजातीय स्वभावतः।70
अतोऽन्यज्ञानमाश्चर्यं वक्तुर्ज्ञातु स्वरूपतः।
विज्ञायात्मस्य शेषेण मूकत्वं वहतिस्सुखम्।
तदुक्त्वाऽन्यद्वचोनैव वदेत्सैवतु पंडितः।
तमास्वाद्य समस्तानां रसानामयनं परम्।
नास्वादयेत मतिमान् मायिकं क्षणभंगुरम्।
अवाच्यं वाच्यतांप्राप्तं वाच्यं याति ह्यवाच्यताम्।
कार्ये च कारणे ब्रह्मन्! तत्वं तदवधार्यताम्।
काष्ठाद्युपाद्यभावेपि लोहपाषाणकादिषु।
प्रकाशदाह संयुक्तो वह्निस्तिष्ठतिनो हिमं।
निरुपाधिकसत्तापि स्वभावान्न विविच्यते।75
स्वाश्रयं षड्गुणव्याप्तं सर्वशक्तिस्वभावतः।
अजस्वभावं ब्रह्मोक्तं ब्रह्मन्! लक्ष्यं मनीषिभिः।
कदाचिद्वाच्यतांयाति कदाचित्यात्यवाच्यताम्।
प्रकृतेर्गुणसंयोगात् यद्वाच्यत्वं प्रजायते।

नैकरूपमनित्यं तज्जहादित्युच्यते विधे।

बृहत्वादिगुणोपेतं सत्यंयज्ज्ञानमद्वयम्।

सर्वज्ञं सर्वशक्त्यै तत्सर्वैश्वर्य समन्वितम्।

नित्य साधारणानेक विशेषेण समन्वितं।

सविशेषमिहप्रोक्तं ध्येयंब्रह्मन् मनीषिभिः।

अनित्यप्राकृतानेक विशेषेण समन्वितम्।८०

स विशेषमिहप्रोक्तं तद्धेयं योगवर्तकैः।

तेनेदं निर्विशेषं हि निर्धर्मकमनामयम्।

काष्ठादि योगजंवह्नेर्दाहकत्वं यथा भवेत्।

अहेयं ज्ञानमैश्वर्यं सर्वशक्त्यादिकं च तत्।

कारणे सत्स्वरूपेण निर्विशेषं विचिंत्यताम्।

तद्विशिष्टं परंब्रह्म सन्मात्रं निष्कळं विधे।

निरंजनं निराधारमद्वयं तमसः परम्।

सत्वादिक गुणैर्युक्तं पादलीलाविहारिणम्।

सगुणं परमात्मानं वैराजादिक संज्ञितम्।

रूपं ममैतत्कल्याणम् मच्छरीरतया विदुः।85

आत्मानमेकमात्मस्थ मजहत्स्वगुणान्वितम्।

ते प्राप्नुवंति मामेव मद्भक्त्या कमलोद्भव!।

सगुणोपासनं तावत्साधनं निर्गुणस्य च।

विविच्य सर्वतोरूपं दिव्यभूषण वाहनम्।

दिव्यायुधधरं दिव्यं नित्यमुक्त निषेवितम्।

दिव्यसद्गुणसंयुक्तं दिव्यलोक निकेतनम्।

महाविभूतिनेतारं निर्गुणं प्रकृतेः परम्।

स्वरूपमिदमेवैकं मम नित्यमकर्मकम्।

ज्ञानभक्त्यैक संप्राप्यं मद्विलास निकेतनम्।

परमैकान्तिनां प्राप्यं सत्वद्रव्यमयं वरम्।९०

ये भजंति महात्मानो मामेकं प्रविशंति ते।

बद्धानां प्राकृतंस्थानं प्राकृत्येक गुणोद्भवम्।

मयैवाधिष्ठितं तात त्वम्मुखैर्गुणनायकैः।

ब्रह्मविष्णुमहेशाद्यैः सृष्टिस्थित्यंतकारिभिः।

मद्व्यूहांशसमुद्भूतैः मत्प्रसादाप्त वैभवैः।

यथा च मद्विहारोत्र प्राकृतैर्महदादिभिः।

तथा दिव्यपदेब्रह्मन्! अप्राकृत विभूतिभिः।

ममैव केवलं तद्धि लीलानिलयमुत्तमम्।

न प्राकृतजनानां च भोग्यमिंद्रादिसेविनाम्।

मत्सादृश्यमिहप्राप्ता निवृत्तिगुणवृत्तयः।९५

भक्त्या मे ज्ञानिनोब्रह्मन् समायांति ममालयम्।

समानभोगिविभवा जगद्यापार वर्जिताः।

मुक्तामदात्मका ब्रह्मन् मद्रूपे निवसंति ते।

दिव्यादिव्याश्रयो ब्रह्मन् नात्मभूतो द्वयोरहम्।

अद्वयं स्वाश्रयं ब्रह्मन् स्वरूपं मेऽनुचिंतय।

भगवान् वासुदेवेति परमात्मेति वै हरिः।

विष्णुर्नारायणश्चेति ब्रह्मेति श्रुतयो जगुः।९८।५

इतिश्रीपाञ्चरात्रे बृहद्ब्र्रह्मसंहितायां द्वितीयपादे विष्णुस्वरूपकथनं नाम द्वितीयोऽध्यायः।

## त्रितीयोऽध्यायः

### अधोलोकवर्ननम्

श्री नारायण उवाच-

ब्रह्मंस्तेऽहं प्रवक्ष्यामि कृपयालोकनिर्णयम्।

यस्य श्रवणमात्रेण  सर्वपापाद्विमुच्यते

आत्मैकःपरमात्मैकः पुरुषोद्विविधोमतः

आत्मामच्छेषभूतोयमहमेव न संशयः।

सच्चितानंद  रूपोयम् नित्यदुःख स्वभावतः।

परतन्त्रोनुरूपश्च व्यापकश्च प्रकाशतः।

भासकोह्यचितस्स्वस्य चितोऽपि ममवल्लभः ।

अहमस्मीतिबोधेन ज्ञानरूपोऽवधार्यताम्।

जानामीति प्रयोगेन ब्रह्मन् ज्ञानगुणस्मृतः।

जीवोयं द्विविधस्तावत् अक्षराक्षरभेदतः।५

क्षरप्रकृतिसंयोगाद् बद्ध इत्युपचर्यते।

अक्षरप्रकृतेर्मुक्तो मुक्त इत्यभिधीयते।

प्राकृतोर्योहमित्युक्तो भावोलोकतयास्स्मृतः।

सर्वं हि प्रकृतेर्जातम् सर्वत्रैव विलोक्यते।

प्रकृतेर्योगतोब्रह्मन्! प्राकृतोऽसौमतो मम।

अतः प्रकृतिलोकोयम् विज्ञेयः प्रथमम् विधे।

ब्राह्मणादिकवर्णोहम् शरीरस्यानुयोगतः।

लोकोयमपरोब्रह्मम् स्मृतियोह्याश्रमाभिध।

यद्यदुत्पद्यते ब्रह्मन् यावत्तत्रावतिष्ठते।

सकलस्सहि वै लोकस्सूक्ष्मदृष्ट्याऽवलोक्यताम्।१०

कर्मणां तारतम्येन प्रकृतेः परिणामतः।

यो यो भावः प्रसिध्येत जीवलोकस्स एव हि।

पाताळतलमाराभ्य यो लोकास्सप्तकीर्तिताः।

बिलस्थात्तामसास्ते तु जीवक्रीडन भूमयः।

स्वर्लोकश्च ततःप्रोक्तो यत्रेंद्रादिविभूतयः।

सात्विका निवसंतीहनम्य राजस तामसः।

स्वर्गादपि महर्लोको जनलोकस्तपस्ततः।

सत्यस्तदुपरि ब्रह्मन्! यत्र यत्रत्वमपि तिष्ठसि।

स्वर्गस्थानां नमस्यास्ते महरादि निवासिनः

मायिकेषुममैवैषा ज्ञेया लोकचतुष्टयी।15

वैष्णवानां निवासाय यावत्तवलय़ो भवेत्।

निर्मितं शुद्धसत्वेनगुणेन प्रकृतेर्मया।

ब्रह्मोवाच-

भगवन् भूतभव्येश! लोकाःप्रकृतिसंभवाः।

क्षरजीव विहारार्थं सप्तलोकाः क्रमात्पुनः।

अंतरा यत्प्रमाणाश्च यादृशा यदधिष्ठिताः।

भूर्लोकः कथितो यावत् प्रमाणोत्सेधविस्तरैः।

सरिच्छैलवनोद्देश वर्षसागरराजिभिः।

तावत्सर्वं समाचक्ष्व विभूतेस्ते रमापते।

भुवर्लोकस्य किं मानं शक्त्या ते विधृतो हि यः।

त्वयि सूत्रेसि तं सर्वमात्मा त्वमसि सर्वशः।20

स्वर्गादीनांस्थितिं ब्रह्मन्! त्रिपदैकपदस्य ते।

लोकं विज्ञात्रुकामोस्मि तव सिद्धांतवर्त्मना।

श्री नारायण उवाच-

भूर्लोकाद्यपधस्ताद्धि लोकास्सप्त प्रकीर्तिताः।

तेषां नामानिमार्यादा ह्यंतराळेन वच्म्यहम्।

अतलं प्रथमं तस्मादधस्तु वितलाह्वयम्।

त्रीतीयं सुतलंज्ञेयं चतुर्थं तु गभस्तिमत्।

पञ्चमं महदाह्वानं सुतलं षष्टमीरितम्।

पातालं सप्तमं यत्र मत्कला विश्वधारिणी

सप्ततिस्तुसहस्राणामुच्छ्रायः कथितो मया।

दशसाहस्रमेकैकं तलं भवति पद्मज!।25

शुक्लकृष्णाऽरुणोपीत शर्करा रौप्य कांचनी।

भूमयो यत्र संत्यंग वरप्रासाद शोभिताः।

तत्र दानवदैतेय जातयश्च सहस्रशः।

संति भोगसमाविष्टाः स्वर्गादप्यधिकश्रियः।

भक्ष्यं भोज्यं तथा पेयं स्वाधिष्टं गुणवत्तरम्।

मणीनांदीपयो यत्र भादंते ध्वान्तसंहतिम्।

नार्कोर्न चंद्रमास्तत्र जनैराकांक्ष्यते क्वचित्।

विहारभूययो यत्र सरित्कासारवापिकाः।

स्वर्लोकाददतिरम्याणि पाताळानि भवंति हि।

अपवर्गसुखं यत्र नेच्छंति मनसापि हि।30

पाताळानामधस्तात्तु सहस्रेषु प्रजापते!।

त्रिंशत्संख्येष्वतीतेषु योजनानामहीश्वरः।

आस्ते संकर्षणस्साक्षात् कर्षकोद्रष्टृदृश्ययोः।

सात्वतीया महाभागा मदीया यमुपासते।

यस्याननात्समुत्पन्नाः शिवस्संकर्षणात्मकः।

यस्यमूर्ध्निमही ब्रह्मन्! स शैलवनकानना।

राजते पुष्पमालेव मध्यपानलसद् दृशः।

सहस्रशिरसिव्यक्त **स्वस्तिका**मल भूषणः।

फणामणिसहस्रेण यस्यमुद्योतयन् दिशः।

सर्वान् करोति निर्वीर्यान् हिताय जगतोऽसुरान्।35

मदाघूर्तनेत्रोसौ यस्सदैवैककुण्डलः।

उपास्यते स्वयं <u>**कांत्या वारुण्या**</u> चैव मूर्तया।

कल्पांते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः।

संकर्षणात्मकोरुद्रो निष्क्रंयाती जगत्त्रयम्।

स्वयं शय्यास्वरूपेण दत्ते मां रमयासह।

अतलादिषु विज्ञेयाः क्रमात्तामसयोनयः।

बलोहरो बलिश्चैव मयःक्रोधवशो गणः।

फणयो वासुकिश्चैते बिलेषु निवसंति हि।

एषामाधारभूतो हि भगवान् शेषसंज्ञकः।

स्थानान्येतानि गच्छंति पुण्यशीला हि जंतवः।40

पापिनां निरयस्थानं निबोध कमलासन।

भूमेरधोजलादूर्ध्वं दक्षिणस्यांदिशिस्थितम्।

स्थानं पितृगणानां च ह्यग्निष्वात्तादयश्चते।

साधयंति हितं स्वानामात्मयोग समाधिना।

कर्मणापितृलोको हि श्रुतिरेषा सनातनी।

तत्रैव पितृराजो हि यमोवैवस्वतस्स्मृतः।

आज्ञया मे महाभाग निरयान् संप्रयच्छति।

धर्मरूपेणपुण्यानां यमरूपेण पापिनाम्।

स्थानं शुभाशुभंदत्ते धर्माणां तारतम्यतः।

तामिस्त्रश्चांधतामिस्त्रो रौरवस्सूकरस्तथा।45

रोधस्तलोविनशनो महाज्वालस्तथैव च।

तथा कुंबोथशबलो विमोहन इति स्मृतः।

रुधिरांदो वैतरणी क्रिमिशःक्रिमिभोजनः।

असिपत्रवनःकृष्णो लालाभक्षश्चदारुणः।

तथावोयवहःपापो वह्निज्वालोह्यधश्शिराः।

नंदंशःकृष्णसूत्रश्च तमश्चावीचिरेव च।

श्वभोजनोंबुपातश्च शूलःप्रोतोऽथ कण्ठकः।

सूचीमुखो दंतशूकक्षोरकर्दम एव च।

रक्षोगणाशनस्था स्ता पर्वता वर्तनस्तथा।

इत्येवमादयश्चान्ये नरकाबृश दारुणाः।५०

गच्छंति पापिनोनूनं विष्णुधर्म विवर्जिताः।

मुनय ऊचुः-

कर्मणायेन येयांति यां यां निरययातनाम्।

तत्सर्वं संयगाचक्ष्व युधानारायणाच्छ्रुतम्।

ब्रह्म उवाच-

स्वस्वरूपमविज्ञाय द्वैविद्यां जायते नृणाम्।

कामस्य वशतां यांति देवानां वशतामुत।

अनिर्जितेंद्रियाकामवशगः पापकारिणः।

तामिस्त्रादि महाघोर निरयेषु वसंति हि।

स्वाचारनिरता देववशगाः पुण्यकारिणः।

ते वै स्वर्गादिभोगेषु निवसंति यथासुखम्।

अहं ममेति येबुध्या भूतेषु द्रोहकारिणः।५५

परवित्तमथापत्य कळत्राणि हरंति च।

बद्धस्ते कालपाशेन यमदूतैर्दुरासदैः।

स्मृतिर्नयत्र यांत्येतेतामिस्रम् नरकं चिरम्।

वंचयित्वापरान्यस्तु धरान् वा पुरुषान्स्तथा।

भुङ्क्तेसचांदतामिस्रेपात्यते बृशदारुणे।

कूटसाक्षी तथा सम्यक्पक्षपातेन यो वदेत्।

अनृतम् वक्ति योमोहात् स नरो याति रौरवम्।

भ्रूणहा पुत्रहंता च गोघ्नश्च कमलोद्भव।

यांति ते नरकम् सद्यश्श्वासनिरोधकम्।

सुरापोबृह्महा हतान् सुवर्णस्य च सूकरम्।60

प्रयांति नरकं यश्च तैस्संसर्गमुपैति वै।

राजन्य वैश्यहंता वै तथैव गुरुतल्पगः।

करोति कर्मिणोयस्तु यश्च खड्गादिकृन्नरः।

प्रयांतिते विनशने नरकेघोरदारुणे।

स्नुषांसुतां चाभिगामि महाज्वाले निपात्यते।

स्वसृगामि तप्तकुम्भे हंति राजभटांश्च यः।

अवमंतागुरूणां यो यस्चाक्रोष्टा नरधमः।

वेददूषयितायश्च वेद विक्रयिकश्च यः।

अगम्यागामियश्चास्या ते यांति शबलाभिदम्।

चोरो विमोहयति यो मर्यादा दूषकश्च यः। 65

रंगोपजीवि कैवर्तः कूण्डाशीगरदस्तथा।

सूची माहीषकश्चैव पर्वगामि च यो नरः।

अगारदाही मित्रघ्नःशाकुनिर् ग्राम दाहकः।

रुधिरां देवतंत्येते सोमं विक्रीण ते च ये।

मधुहा ग्रामहन्ता च याति वैतरणीं नरः।

देव द्विजपितृद्वेषि रत्नदूषयिताच यः।

स याति क्रिमिभक्ष्येवै क्रिमिशेषदुरिष्टकृत्।

असिपत्रवनं याति  वनच्छेदी वृथैव यः।

रेतःपानादिकर्तारो मर्यादाभेदिनश्च ये।

ते कृष्णेयांत्यशौचाश्च कुहका जीव निश्चये।70

पितृदेवातिथिर्हत्वा यश्चाश्नाति नराधमः।

लालाभक्षे सयात्युग्रे शरकर्ता च दारुणे।

वेगीपूयवहंचैको यातिमृष्टान्नभ्ङ्नरः।

शौवभ्रिको मृगव्याधो वह्निज्वाले पतत्ययम्।

याति तत्रैवसततं यश्श्वपाकेषु वह्निदः

असत्प्रतिग्रहीता तु  नरकेयात्यधोमुखे।

अयाज्ययाजकस्सत्रे तथा नक्षत्रसूचकः।

व्रतेषुलोपकोयश्च स्वाश्रयाविच्युतश्च यः।

संदंशयातनामध्ये पततस्थावुभावपि।

लाक्षामांसरसानां च तिलानां लवणस्य च।75

विक्रेताब्राह्मणो याति  तथैव नरकं द्विजाः।

दिवास्वप्नेषु स्कन्धं ते ये नराब्रह्मचारिणः।

अवीचिनरके यांति येऽनृतौ गृहमेधिनः।

पुत्रैरध्यापिता ये च  ते पतंतिश्च भोजने।

अंबुपातेनिपात्यन्ते   तेंबून्यपहरंति ये।

शूलसूत्रैश्च ये जीवान् व्यधयंति प्रलोभनैः।

क्रीडार्थं तेभि नीयंते शूलप्रोते भयावहे।

योभिश्रुत्याधनी विप्रं तिरश्चीनेन चक्षुषा।८०

न प्रयच्छति दुर्मेधा स्ससूचीमुखगो भवेत्।

उद्वेजयंति येजीवान् दंदशूका इवापरे।

ते दंदशूके गच्छंति यमदूतैर्निपातिताः।

हीनवर्णादिभिर्दोषै रुत्तमान्विद्ययायुतान्।

निस्त्रपायेऽवमन्यंते ते यांता क्षारकर्दमम्।

कार्यमुद्यम्य ये मूढा नरमेधेन पर्वणि।

रक्षोगणाशना यांति यजंते मांसभोजिनः।

मनोरथान्विनिघ्नंति वृथानृणांतु ये नराः।

पात्यंते पर्वताद्भूयो नीयंते च पुनःपुनः।

एते चान्येच नरकाः शतशोऽथ सहस्रशः।८५

ये च दुष्कृतकर्माणः पच्यंते यातनागताः।

<u>**वर्णाश्रमविरुद्धं च कर्मकुर्वंति यो नराः।**</u>

<u>**कर्मणामनसावाचा निरयेषु पतंति ते।**</u>

अशुभस्यगतिश्चैषा शुभस्योर्ध्वं प्रकीर्तिता।

गतिर्भागवती या तु सा प्रोक्ता प्रकृतेःपरा।

इति श्रीपाञ्चरात्रे बृहद्बृह्मसंहितायां द्वितीयपादे लोकाख्याने अधोलोककथनं नाम त्रितीयोऽध्यायः।

## <u>अथ चतुर्थोऽध्यायः</u>

## <u>भूलोक कथने बृन्दावनचरितम्</u>

श्रीबृह्मोवाच-

कर्मिणांगतयो विप्रा मया नारायणाच्छ्रुताः।

भूर्लोकं च प्रवक्ष्यामि नारायणाच्छ्रुतम्।

नारायणस्तु मामाह भूर्लोकस्य विस्तरम्।

कथयामि महाभाग यत्राहं च क्रमे गतिम्।

मच्छरीरतया यद्य द्यप्यहमेव व्यवस्थितः।

अवतारस्तु  जीवानां तारणाय मया कृताः।

भूर्लोके ते च सर्वे वै मर्यादां पालयंति हि।

चतुरश्राभवद्भूमिः पंचाशत्कोटियोजनैः।

विस्तीर्णासर्वतोदिक्षूध्यानं वै कोटियोजनम्।५

द्वीपानिसप्तसंत्यत्र तावंतो जलराशयः।

वलयानीव ते सर्वे भूमेरुपरिवेष्टिताः।

जंबूप्लक्षकुशक्रौंच शाकद्वीपं तथापरम्।

शाल्मलीपुष्करंनाम सप्तमं जलधीन् शृणु।

लवणेक्षुरसौ पश्चान्मेरोयं तदनंतरम्।

सर्पिर्दधिपयस्त्वन्य स्ततश्शुद्धोदकं स्मृतम्।

जंबूद्वीपं तु भूमध्ये लक्षयोजन विस्तृतम्।

तादृक्षारांबुधिस्तत्र ततो द्वीपांतरं शृणु।

उत्तरोत्तरमेकैकं द्विगुणायाम विस्तरम्।

द्वीपानिषट्समुद्राश्च ह्युपरिष्ठच्चतुर्मुख।१०

द्वीपंजम्बूसमाख्यातं विभजे नवदा पुनः।

भागे तु मध्यमे मेरुरुच्छ्रायो लक्ष संमितः।

योजनानांक्षितेरंतर्मग्नष्षोडश संख्यया।

चतुरशीतिसाहस्त्रैर्योजनैर् बहिरुच्छ्रितैः।

द्वात्रिंशच्च सहस्त्राणि योजनानां च विस्तृतः।

मूर्ध्निदेशे च विज्ञेयस्सर्वतः कनकाचलः।

भूयश्च कर्णिकाकार स्संस्थितः कमलोद्भवः।

हिमवान् हेमकूटश्च निषदश्चास्ति दक्षिणे।

नीलश्वेतश्शृंगवांश्च पर्वता उत्तरेत्रयः।

लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथा परे। १५

दशांशेन यतोलीना समुद्रांबुनि पद्मज!।

सहस्त्रद्वितयोच्छ्राया स्तावद्विस्तारिणश्च ते।

भारतं प्रथमं वर्षं ततःकिंपुरुषं स्मृतम्।

हरिवर्षं तथैवान्यन् मेरोर्दक्षिणतो द्विज।

रम्यकंचोत्तरं वर्षं तस्यैवासु हिरण्मयम्।

उत्तराःकुरवश्चैव यथा वै भारतं तथा।

नवसाहस्त्रमेकैक मेत्येषां मन्तरं विधे।

इळावृतं च तन्मध्ये सौवर्णोमेरुरुच्छ्रितः।

मेरोश्चतुर्दिशं तत्र नवसाहस्त्र विस्तृतम्।

इळावृतं महाभाग! चत्वारश्चात्र पर्वताः।२०

विष्कंभा रचितामेरोर् योजनायत मुच्छ्रिताः।

पूर्वे तु मन्दरोनाम दक्षिणे गंधमादनः।

विपुलःपश्चिमेभागे सुपार्श्वश्चोत्तरे स्थितः।

चत्वारः पादपास्तत्र ब्रह्मन् केतुवदुच्छ्रिताः।

कदंबोमंदरज्ञेयो जम्ब्वाख्यो गंधमादने।

विपुलि पिप्पलो भोधि स्सुपार्श्वे वटवृक्षकः।

एकादशसमायामो पादपास्सुरसत्तमाः।

जम्बूद्वीपस्य सा जम्बूर्नामहेतुः प्रयुज्यते।

जंब्वाःफलानि दृिश्यंते महागज समानिच।

पर्वते पतितानां च रसेन हि सरिद्वरा।२५

जंबूनाम्नि समाख्याता पीता तत्तीरवासिभिः।

जरांस्वेदं दौर्गन्ध्य मिन्द्रियाणा मपाटव।

हंति रोधसि तन्नीरं वायुनाशोषितं च यत्।

जांबूनदंतद्भवति सुवर्णं सिद्धभूषणम्।

भद्राश्वं कल्पमाख्यातं मेरोःप्राच्यां चतुर्मुख।

पश्चिमंकेतुमालाख्यं तयोर्मध्ये इळावृतम्।

वनंचैत्ररथं पूर्वे दक्षिणे गंधमादनम्।

वैभ्राजं पश्चिमे मेरोः वनं नन्दनमुत्तरे।

तदासरांसि चत्वारि मेरोःपूर्वादिषुक्रमात्।

अरुणोदम्महाभद्रं ससीतोदं स मानसम्।३०

शीतांबश्च मुकुंदश्च कुररीमाल्यवांस्तथा।

वैकंकनामा पंचैते विज्ञेयाःकेसरा जलाः।

त्रिकूटश्शिरसश्चैव पतंगोरुचकाह्वयः।

निषदःपंचमश्चैते दक्षिणे केसराचलाः।

शिखिरासोद वैडूर्यः कपिलोगन्धमादनः।

जारुदिप्रमुखाश्चैते पश्चिमे केसराचलाः।

शंखकूटोऽथऋषभो हंसोनागस्तथाऽपरः।

कालंजरश्च पंचैते उत्तरेकेसराचलाः।

मेरोरनंतराङ्गेषु द्वौद्वौ च परिकल्पितौ।

पूर्वादिक्रमयोगेन तन्मध्ये च महापुरी।३५

जठरोदेवकूटश्च पर्वतावुदगायतौ।

अष्टादशसहस्राणि योजनानि स्थितौ हितौ।

पृथुतुङ्गौद्विसहस्रं तथान्यौदक्षिणांश्रितौ।

पवनःपारिजातश्च कैलासकरवीरकौ।

पश्चिमेचोत्तरेचैव त्रिश्शृङ्गमकराविति।

मध्ये तव महाभाग ब्राह्मीमेरोश्चमूर्धनि।

चतुर्भिर्दशभिश्चैव सहस्रार्योजनैर्मिता।

तस्यां समं ततःपुर्या इन्द्रादीनां यथाक्रमम्।

इन्द्राग्नियमनैऋत्यो वरुणाऽनिलयक्षपाः।

ईशश्चाष्टौ समाख्याताः पुरीणामधिपा इमे।४०

पुरी च पूर्वतो ज्ञेया नाम्नाचैवाऽमरावती।

तेजोवतीतथाग्नेयां याम्यां संयमिनीमता।

रक्षोवती राक्षसी तु श्रद्धावत्यतु वारुणे।

वायोर्गन्धवतीख्याता सौम्याख्याता महोदया।

यशोवती भवस्योक्ता केसराचलभूमिषु।

तामहैश्वर्यसंपन्ना विष्णुनाकलयावृताः।

भित्वाण्डमण्डलं गंगा भगवत्पादसम्भवा।

दिवःपतंति परितो ब्रह्मणस्सदनस्य हि।

सीताचऽलकनन्दा च चक्षुर्भद्राच वै क्रमात्।

पतंति नामभेदेन दिग्भेदेन चतुर्मुख।४५

सीतांतरिक्षगापूर्वं शैलान्निष्क्रम्य निम्नगा।

याति पूर्वेणवर्षेण भद्राश्वेन च संज्ञया।

प्रविष्टा सागरमुखं दक्षिणेन तथाऽध्वना।

भारतंवर्षमभ्येति शैलान् सप्तमुखी ततः।

द्वितीयाऽळकनंदाम्बो निधिंत्रैलोक्य पावनी।

चक्षुस्तु पश्चिमाच्छैलात् केतुमालं प्रयाति हि।

तेनैव वारिधिं याति निम्नगासरितां पतिम्।

आनीलनिषधायामौ माल्यवद्गन्धमादनौ।

अतीत्य वर्षमंबोधिमेति योषिद्यथापतिम्।

भद्रा ततोत्तरगिरी नुत्तरांश्च तथा कुरून्।५०

मध्ये तयोर्मेरुशैलः कर्णिका पंकजे यथा।

भारतं केतुमालां च भद्राश्वं कुरुनामाकम्।

पत्राणिलोकपद्मस्य मर्यादाशैलतो बहिः।

देवकूटश्च निषदो दक्षिणोत्तरमायतौ।

मर्यादा पर्वताज्ञेया कैलासो गन्धमादनः।

अशीतियोजनायामौ पूर्वापर महोदधौ।

निषदःपारियात्रश्च निषधावदि भूभृतौ।

मेरोःपश्चिमभूभागे पूर्वोत्तरधरौस्मृतौ।

त्रिशंगो जारुधिश्चैव मुत्तरौ वर्षपर्वतौ।

पूर्वपश्चिमगावेता वर्णवान्तर्व्यवस्थितौ।५५

इत्येते पद्मज! प्रोक्ता मर्यादागिरयस्तव।

पर्वतानामवस्थान मानंत्यान्न प्रपंच्यते।

शैलानामन्तरद्रोण्य स्सेव्यंते सिद्धचारणैः।

अन्यैश्च पुण्यकृद्भिश्च दैत्यदानवकिन्नरैः।

भौमाःयेताःकृताः स्वर्गादुर्लभाः पापकर्मभिः।

ज्ञानमूर्तिर्हयग्रीवो भद्राश्वे वसतिस्स्वयम्।

वर्षेषु मूर्तियो विष्णोः मर्यादा पर्वतेषु च।

वसंति लोकरक्षायै नानारूपविशेषतः।

यानि किंपुरुषादीनि वर्षेष्वेतेषु संत्यज।

निरातंकाःप्रजाः शश्वन् न शोको न भयं तथा। ६०

न पिपासा बुभुक्षा च नोद्वेगो नायुषःक्षयः।

संति तेषां सहस्राणि वर्षाणि द्वौच विंशतिः।

आयुर् न तेषु देशेषु भौममंभो न वर्षति।

एतेषु न तु भेदोस्ति न कालो युगभेदवान्।

सदा कृतयुगःकालो वर्तते चतुरानन।

धर्मश्चतुष्पात्सकलो ध्यानमेवार्चनं हरेः

पर्वतास्सरितश्चापि संति तत्र पुराणि च।

ग्रामश्चसंति बहवः स्वधर्मनिरतास्सदा।

ब्राह्मणाभूमिपाश्चैव प्रजापालन तत्पराः।

स्वेस्वेकर्माण्यभिरता श्चातुर्वर्ण्य मवस्थितम्।६५

***चातुराश्रम्यमप्येवं यथोक्तमवतिष्ठते।

आदाक्षिणात्यादंबोधे राशैलाच्च हिमालयात्।

देशोयं भारतंवर्षं भूरेषां कर्मिणां नृणाम्।

योजनानि सहस्त्राणि नव विस्तार उच्यते।

स्वर्गापवर्गफलदं कर्मकार्यं नृणामिह।

सह्योमहेंद्रोमलयश्शुक्तिमान् नृक्ष पर्वतः।

विंद्यश्च पारियात्रश्चस्तवैते कुलपर्वताः।

अतस्संप्राप्यते स्वर्गो मुक्तिमस्मात्प्रयांति च।

तिर्यत्त्वंनरकं चापि यांत्यतःपुरुषा विधे।

इहैव क्रियमाणस्य कर्मिणोनरकं फलम्।७०

वर्षेष्वन्येषुसर्वेषु केवलंभुज्यते फलम्।

इहैवचातुराश्रम्य चातुर्वर्ण्य व्यवस्थितिः।

कृतादियुगभेदानां चतुर्णामिह संभवः।

दानं यज्ञं तपो मर्त्याः परलोक पलार्थिनः।

इहकुर्वंति यज्ञेशं यजंते पुरुषोत्तमम्।

श्रेष्ठं तद्भारतंवर्षम् सर्ववर्षान् सु संमतम्।

फलार्थिनः कामयंते कर्मभूमिजनं बुधाः।

सहस्राणि तथैवास्मिन् दिव्यानि सदनानि च।

नद्यस्सहस्रशः पुण्या आस्तेच पुरुषः परः।

नद्यस्तु पर्वतोद्भूता लोकेसंति सहस्रशः।७५

मुख्यास्तानु महाभाग नामतः प्रवदांयहम्।

गिरीयः पावनास्संति बृह्मन्नन्ये कुलाचलात्।

मैनाको मङ्गळप्रस्थ स्त्रिकूट ऋषभस्तथा।

ऋष्यमूको कोङ्कणश्च श्रीशैलो वारिधारकः।

द्रोणऋक्षो देवगिरिः चित्रकुटोथ रैवतः।

गोवर्धनोऽहमेवात्र नीलोपि मम विग्रहः।

गोकामुखोथ ककुभो हरिकील इति स्मृतः।

कामांगो वेङ्कटाद्रिश्च मद्रूपः पापनाशनः।

शतद्रू चंद्रभागाद्या हिमवत्पादनिस्सृताः।

वेदस्स्मृतिमुखाश्चान्या पारियात्रा भवेन्मुने।८०

नर्मदानु रसाद्याश्च नद्यो विंद्या विनिर्गताः।

तापी पयोष्णीनिर्विंद्या प्रमुखाऋक्षसंभवाः।

गोदावरी भीमरथी कृष्णवेण्याधिकास्तथा।

सह्यापादोद्भवानद्याः स्मृताः पापभयापः।

कृतमालाताम्रपर्णी प्रमुखामलयोद्भवाः।

त्रिसामाशेषकुल्याद्या महेंद्र प्रभवास्स्मृताः।

ऋषीकुल्याकुमार्याद्या शुक्तिमुत्पादसंभवाः।

त्रिसामाऋषिकुल्याद्या स्संत्यन्याश्च सहस्रशः।

कळिन्दनगरंभूता काळिंदी लोकपावनी।

क्रीडार्थं मम देवेश नित्यं तत्र वसाम्यहम्।८५

तथैवसरयूःपुण्या यत्र कुत्रावगाहिता।

विशेषेण मम क्षेत्रेत्वयोध्यायां मनीषिभिः।

क्षेत्राणि भारतेवर्षे पुर्यश्च बहुशो विधे!।

स्नानध्यानजपाभ्यासान् मत्प्राप्तिर् यत्र निश्चिता।

मथ्नाति सर्वपापानिराति मे प्रेमवारिधिम्।

चकासि चक्रविस्तारे मत्प्राप्तिर्नाव वेदिका।

मथुरेति पुरीरम्या पुण्यारण्य विभूषिता।

गुप्तोहं निवसाम्यत्र श्वेतद्वीपाभिधे यथा।

कदापि कृतिनां प्रीत्यै द्वापरांते विशेषतः।

प्रग्गुप्तं भावयेब्रह्मन् कल्पेकल्पे तवाज्ञया।90

तत्र बृन्दावनं नाम मत्केळि निलयम् मतम्।

बृंदाभिदानया भक्त्या मूर्तिमत्या निषेवितम्।

निगूडमनवद्यंमे नीळयाप्रियया सह।

निवसामि महाभाग परमानंदसंयुतः।

विमुक्तिनाम्नि जननी तयाक्रोडीकृतोस्म्यहम्।

सुषुम्नायां विहारो मे ब्रह्मन् जानीहि नित्यशः।

विनाज्ञानं विनाध्यानं विना इंद्रियनिग्रहम्।

विमुक्तिवसतां तत्र किं पुनस्त्यजतां तमम्।

बृह्मोवाच-

भगवन् कौतुकंमह्यं प्रतिभाति वचस्तव।

कथं बृन्दावनं नित्यं केळिभूतं तव प्रभो।९५

---

का बृन्दा का विमुक्तिस्तु परमानंदसंज्ञकः।

कोयं कमलपत्राक्ष का नीळाख्या च सुंदरी।

का सुषुम्णा त्वया प्रोक्ता मुक्तिर्निवसितां कथं।

श्री नारायण उवाच-

निर्गुणायास्तु लीलाया यद्यंतो न विद्यते।

आविर्भावस्तरोभावो ह्यास्तिकेनापि हेतुना।

गोलोक गोकुलोद्भूत श्वेतद्वीपादिकेळिवत्।

नित्यासूक्ष्मस्वरूपेण कल्पांते चापि वर्तते।

ये जीवाःक्पिया विष्णोः वीक्षितास्सुरसत्तम।

वसंति रसमार्गीया नित्यलीलाभिकाङ्क्षिणः।

तेषामाराधनार्थाय प्राप्य भोगातयास्थितः।100

भगवान् निजरूपेण कोटिमन्मथ मन्मथः।

रसमार्गेण यो देव मीक्षंते परिशीलितुम्।

तेषां भूमावपि निजं स्थानमाविष्कृतं मया।

सुदर्शने महाचक्रे मायामय निवारके।

दुर्लभे साधनैरन्यैर्विना प्रेमामृतौषधम्।

स्थानेपि परमैकांत प्रेमनिर्भिन्न चेतसाम्।

निवासाय सदा यत्र किशोरो नित्ययौवनः।

सदा रासरसाविष्टो वेणुवाद्यधरो हरिः।

मयूरपिंछाभरणः कोटिकन्दर्पसुंदरः।

गीयमानो मुदायुक्तो नित्यमुक्तवधूजनैः।१०५

सेवितांघ्रिसुधासारो नित्यानंदगुणांबुधिः।

सर्गादा परमज्योतिः स्वानंदैक निकेतनम्।

एकमेवाद्वितीयाख्यं स देवस्पदभोदितम्।

निजाधारं निजाभास मवाङ्मनस गोचरम्।

निस्तरङ्गांबुधिरिव निजानंदनिकेतनम्।

नांतरं न बहिस्तत्र नांबरं नावनीतलम्।

कारणं सर्वसत्वानां निदानं बीजमव्ययम्।

लीलेच्छादिसदायुक्तं दिव्यानंदगुणास्पदम्।

संकल्पमकरोत्तत्र कदापि परमंमहः।

एकेनत्रिगुणांमायां तस्मान्निर्गमनं बहिः।110

बद्धानां सुखभोगाय लीनानां प्रकृतौ पुरा।

द्वितीयेनविमुक्तानां नित्यानां नित्यलीलया।

गुणैकनिलयां नित्यं शक्तिं निर्गमयन् बहिः।

ज्ञानानंदमया साक्षादेकरूपा निरामया।

त्रिगुणप्रकृतेर्भिन्ना निर्गुणा प्रकृतिस्त्वियम्।

ब्रह्मैव सगुणासाक्षा दानंदरसदायिनी।

प्राकृतावरणाद्भिन्ने दिव्याकाशे परात्परे।

सृष्टिं वितनुतेस्वस्य दिव्याममल रूपिणीम्।

यस्यामानंदनिलयः साक्षादुपनिषत्तनुः।

रमते रमयासाकं नित्यमुक्तैरुपाश्रितः।115

नात्रकालगतिस्सक्षादिच्छैका परमात्मनः।

निर्माय द्विविधं सर्गं प्राकृताप्राकृतं हरिः।

पुनस्संकल्पयन् देव्या वीक्षितश्श्रीनिकेतनः।

श्रीदेव्युवाच-

अति दूरतरं दिव्यमवाङ्मनसगोचरम्।

दाम ते परमेशान नित्यानंदमनश्वरम्।

अविदित्वा सुखंचास्य प्राग्जीवस्य कथं रुचिः।

स्वामिन्नुत्पद्यतेजंतुर् नित्यलीलासुखांबुधौ।

त्वयि सर्वं रमेशान श्रूयते दृश्यते च यत्।

विलीनं जायते सर्वं वयांसीव दिनात्यये।

त्वदधीनमिदं सर्वं चिदचिच्छब्द संज्ञितम्।१२०

उद्भोदयसि सर्वाणि त्वमेव पुरुषोत्तम।

उन्मज्जन्मज्जदेवैत न्नैकरूपेण तिष्ठति।

त्वमेकरूपस्स्वायत्त आत्मभूतस्सनातनः।

यथा प्राकृतमेवेद मतीत्य तव विष्टरम्।

न मा भाति महाराज नात्रेदममलद्युते।

श्रीभगवानुवाच-

त्वमप्येतन्न जानासि नित्ये कमलसंभवे!

रहस्यं पश्य यल्लोके प्राकृतेपि प्रकाशितम्।

एवं प्रजल्पतस्तस्य कर्पूरक्षोद पाण्डुरा।

सुंदरीदक्षनयना दुदतिष्ठत्क्षणादिह।

बृंदशो रसिकान्नीत्वा विलीनान् प्राङ् निजानने।125

तामुवाचरहो देवो विहास्य जलजेक्षणः।

संविशस्व महाभागे प्राकृते मम वेश्मनि।

नीत्वा मदनुरागार्थं विलीनान् त्वयिसुंदरी।

त्वं तु बृंदाभिदा भक्तिं बृंदेशस्त्वमुपाश्रिता।

विनोदाय मम प्रीत्या वनरूपस्त्वमावह।

यथाऽत्र त्वं गवांलोके तिष्ठसि प्राणवल्लभे।

तथैव प्रतिभासेन स्वांशेन प्रविशास्वगाम्।

इयं तु विरजादेवी वैकुण्ठद्वारवाहिनी।

सूर्यमार्गेण निर्याता जंबूद्वीपं विशेषतः।

कळिंदगिरिमसाद्य काळिंदीनाम निम्नगा।130

अभिषिंचतु ते वीधीमरविंदजलैर्मुदा।

सुषुम्नैव द्वयोर्मध्ये दैवे पैत्रे च वर्त्मनि।

विमुक्तवपुषां नेत्रे गोलोके मम वेश्मनि।

इडया सूर्यरूपिण्या देवलोकं न सम्शयः।

पितृलोकं पिङ्गळया कर्ममार्गेण याति हि।

योगेसन्यस्त देहानां देवयानेन गच्छताम्।

सुषुम्नायां प्रविष्टानां भक्तानां वैष्णवीगतिः।

यमुनेयं सुषुम्नैव संलग्ना मम मंदिरे।

श्रद्धयाने वनादस्या जनो मल्लोकमाप्नुयात्।

एष वै प्राकृतोरत्न राशिर्गोवर्धनाभिदः।१३५

अंशेनमद्विलासार्थं या तु दैवत्वमाप्नुयात्।

नासाया मध्यभागोयं सुषुम्ना यत्र तिष्ठति।

अंशेन मद्विलासार्थं या तु दैवी सरिद्वरा।

यस्या विलोकानात्सद्य सास्वाधोऽभि जायाते।

रसिकानां विनोदार्थं शारदीचंद्रिका शुभा।

सदैकरूपाविशतु दिव्या किरणचामरैः।

मुक्तिं विना न मत्प्राप्ति सा तु भक्त्यैक संश्रया।

सा तु बृंदे त्वयानेया परानंदेन संयुता।

भक्तिस्त्वं वनरूपेण यशोदा मुक्तिरूपिणी।

नंदोऽयं परमानंदोह्याविर्भवतु भूतले।140

नाविर्भावस्थिरोभावो नित्या या वनसंपदः।

आविर्भावस्थिरोभावो दृश्यायास्तु युगे युगे।

रूपं नीलासमीपस्था सदानंदस्वरूपिणी।

स्वांशेन शक्तिभिस्साकं यातु बृन्दावने वने।

नीलया लालितोहं च करिष्येऽस्या विनिश्चितम्।

स्वतन्त्रोपि समर्थोपि सर्वज्ञोपि निरंतरम्।

नीलामेवा सु वर्तिष्ये लीलाभंगोन्यथा भवेत्।

लीलायामपराधं तु नाद्रियंते मनीषिणः।

नीलासंगं न त्यजामि न मां नीलालिमुंच्ति।

अहं नीलामयस्साक्षा न्नीलादेवी तु मन्मयी।145

यावंति मम रूपाणि नीलातावत्स्वरूपिणी।

नानाभिदानैरन्यत्र राधा बृन्दावने वने।

अपराधैश्च नीलायाः पूजनं मम जायते।

क्षत्रियाणीं यथा युद्धे सायकैर्मम पूजनम्।

नीळा लीलां न संधत्ते निरानंदस्तदाह्यहम्।

निर्मितेयं मयाशक्तिः लीलार्थं चैव केवलम्।

करोमि नीलया सर्वं प्राकृताप्राकृता जगत्।

तिष्ठामि नीलयायुक्तो निरुद्धोपि सदाह्यहम्।

सूक्ष्मरूपेण मां नीला कदापि न विमुंचति।

स्थूलरूपेण मामेकमुपास्ते सर्व कर्मसु।150

योहंसा ममनीला तु या नीलासोस्म्यहं पुनः।

अंतरं नैव पश्यामि यथा वै शेष शेषिणोः।

नित्यश्च शक्तयोस्यस्य ललिताद्यास्सुमङ्गलाः।

अष्टा नित्यविहारस्य रसज्ञाः कौतुकोज्ज्वलाः।

आविर्भवंतु नीलायां सूक्ष्मरूपेण संस्थिताः।

आसामपि पराह्यष्टौ प्रत्येकैकं व्यवस्थिताः।

चतुष्षष्टिर्मुदायुक्ताः आविर्भाव विचक्षणाः।

नृत्यज्ञानकलाभिज्ञा वाद्याऽभिनय निम्नगाः।

यौवनारंब लिप्तांग्या श्रीमत्यश्श्री परिग्रहः।

तवाज्ञामनुवर्तिन्यो नीलेसंतु सहस्रशः।155

मयासह विनोदार्थं येषामस्ति मनोरथः।

तेषामिहसमावासो नित्यं बृन्दावनेस्तु च।

द्विपरार्धाऽवसानोयं कालस्वावयवै रिह।

नैवशक्तोऽभि भवितुं नित्यलीलारसोत्सवम्।

यथा वैकुण्ठभक्तानां श्वेतद्वीपनिवासिनाम्।

वयोवस्थाकृता भेदो नैव द्वेषादि वैभवम्।

जरामरण दौर्गंद्य स्वेद वीर्यादि संक्षयाः।

तथाऽत्र द्विपरार्धांत मेकरूपत्वमेव हि।

दृश्यादृश्य विभेदेन लीला मे द्विविधात्वियम्।

अदृश्यात्वेकरूपेण सुदर्शन समाश्रिता।160

दृश्या तु त्रिविधासैव रसिकानां तु साधनम्।

साद्याऽदृश्या समाख्याता रसिकानां न संशयः।

जगद्धिताय लोकेस्मिन् यथादृश्य तयास्थितम्।

नंदगोप स्वरूपेण परानंदो नराकितिः।

जातामुक्तिस्समायाता यशोदा रूपधारिणी।

अंशेन च गवांबृन्दं समायातां मदांतिके।

गोवर्धनादिभिश्शैल स्समुन्मग्नश्च तत्क्षणात्।

अदृश्यत घनश्यामा सुषुम्नाऽमृतवाहिनी।

कालिन्दी सूर्यतनया मम मार्गविरोधिनी।१६५

भ्रमद्भ्रमरझंकार मंदारतरु मारुतम्।

श्रीमद्बृन्दावनं नाम कालिन्दीकुल केतनम्।

दृश्यं भविष्यति क्षिप्रं महापुण्यवतां नृणाम्।

पंचयोजनविस्तीर्णां रसधामैव केवलम्।

नीले त्वं च विलासार्थं गोपकन्यत्वमाप्नु हि।

सखीभिःकोमलांगाभिः दृश्य लीला महोत्सवे।

अदृश्येयमपि श्यामे नास्तिकानां कलौयुगे।

कामक्रोदाभिभूतानां नानादेवैक सेविनाम्।

परद्रोह परोद्वेग पराणां विषयात्मनाम्।

अभाग्यानामधन्याना मसतामधिकारिणाम्।170

गोपायतिजनान्यस्मात् प्रपन्नानेव दोषतः।

अतो गोपीतिविख्याता नीलाख्या परदेवता।

त्वयाचाराधितो यस्मा दहं कुंजमहोत्सवे।

राधेति नाम विख्याता रासलीला विधायिका।

विनाश्रीमन्त्रराजेन श्रीचिंतामणि संज्ञिका।

विनाद्वयानुसंधान मनन्यशरणं विना।

विनाचार्यप्रसादेन विना वन निषेवया।

श्रीनारायण संभोग लीलानैवावलोक्यते।

दृश्या लीला द्वितीया तु मथुरायां भविष्यति।

जन्मना मम देवेशि यत्र कंसो निपातितः।175

(जन्मना तु मम द्वेषी यत्र कंसो निपातितः।?१७५)

जातोहं निगमात्सक्षाद् वासुदेवाभिदात् प्रिये।

देवक्यां बृह्मविद्यायाम् बलेन बलिना सह।

मल्लोक प्राप्तुकामानां प्रपन्नानां नृणामिह।

मथ्नाति सर्वपापानि मथुरेति निगद्यते।

त्रितीया दृश्यरूपा तु द्वारकायां प्रकाशिता।

श्रीभूमिभ्यां सहिता यत्र निवसामि वरानने।

अहं तु कृष्णरूपेण रुक्मिणी त्वं भविष्यसि।

भूदेवी सत्यभामोयं नीलेंदीवरलोचना।

आवाभ्यां रचितंकर्म ध्यात्वा दृष्ट्वा मनीषिणः।

यास्यंति मद्गतिं धीरा माविषाद् पराभव।180

इति श्रीपाञ्चरात्रे बृहद्ब्रह्मसंहितायां द्वितीयपादे

लोकाख्याने श्रीबृन्दावन चरितं नाम चतुर्थोऽध्यायः।

## अथ पंचमोध्यायः

## बृन्दावनचरिते युगळाराधनम्

श्रीरुवाच-

रसिकानां सदोपास्यो नीलया सहितोभवन्।

कथं ध्येयाविशालाक्षी श्रीमद्बृन्दावने वद।

मन्त्रंचिंतामणिंब्रूहि द्वयं च शरणागतिम्।

किं स्तोत्रं किं च पीठस्थे किमावरणकल्पनम्।

श्री भगवानुवाच-

शृणुसुंदरि वक्ष्यामि नीळया सहितस्य मे।

पूजनंमन्त्रराजं च द्वयं च शरणागतिम्।

रहस्यानां रहस्यं च गुह्यानांगुह्यमुत्तमम्।

मन्त्रश्चिंतामणिर्नाम सान्निध्यं मे प्रयच्छति।5

एषांपंचपदी विद्या द्वयमित्यभिधीयते।

उभाभ्यां मन्त्रराजाभ्यां जायते प्राणवल्लभे।

*नमो गोपिजनेत्युक्त्वा वल्लभाय वदेत्ततः।

द्विपदी दशवर्णेयं विद्यायाः खण्ड उच्यते।

*गोपीजनपदंचोक्त्वा वल्लभेति पदंततः।

चरणौ शरणं पश्चात् प्रपद्येतु पदं पुनः।

त्रिपदीषोडशार्णोयं विद्याखण्डोद्वितीयकः।

एवं पंचपदीविद्या विद्येया युगळात्मिका।

एतां पंचपदीविद्यां श्रद्धया धारयेत्तु यः।

कृष्णप्रियाबृन्दमध्ये गच्छत्येष न संशयः।10

न पुरश्चरणापेक्षा नापि न्यास विधिर्मतः।

न देशकालनियमो नारिमित्रादि शोधनम्।

सर्वेऽधिकारिणश्चात्र चण्डालांताश्च सुंदरी।

स्त्रियाशूद्रादयश्चापि जडमूकांध पङ्गवः।

आंद्रहूणकिराताश्च पुळिन्दाःपुल्कसास्तथा।

आभीरायवनाः कंकाः खसाद्याः पापयोनयः।

दम्बाऽहंकारपरमाः पापपैशून्यतत्पराः।

गोब्राह्मणनिहंतारो महापातक संयुताः।

ज्ञानवैराग्य रहिताः श्रवणादि विवर्जिताः।

मयाभिकाङ्क्षिनोये तु ते तु सर्वेऽधिकारिणः।15

यदि भक्तिर्भवेदेषां नीळयाराधितेमयि।

बृन्दावन महालीला परमोत्सव दर्शने।

नान्यद्वाराभवेदेषा लीला परम पावनी।

तस्माद्युगळ मन्त्रेण स नीळंमामुपाश्रयेत्।

याज्ञिको दाननिरतः सर्वतीर्थोप सेवकः।

सत्यवादिर्यतिर्वापि वेदवेदांग पारगः।

बृह्मनिष्टकुलीनो वा तपस्वीव्रततत्परः।

द्वयाधिकारी न भवेत् कृष्णभक्तिर्विवर्जितः।

अङ्गन्यास करन्यासाव चक्राद्यैः प्रकल्पयेत्।

अथवा दीर्घबीजेन न्यसेद्वय मथाचरेत्।20

ओमित्येवभवेद्बीजं नमश्शक्तिरुदाहृता।

गोपीजनप्रियःकृष्णो देवताऽत्रप्रकीर्तिताः।

अन्तर्यामित्तु ऋषिरहं देवो नारायणः प्रिये।

भविष्यंति तथाचान्ये शिवोबृह्मा च नारदः।

प्रवर्तनाय   यूयं तु सर्गादौ च प्रयोजयेत्।

स तत्र तदृषिप्रोक्तसर्वागम विशारदैः।

सर्वेषां देविमन्त्राणां बीजानां च विशेषतः।

अहमेवऋषिर्मुख्यो वेदामच्छ्वास संभवाः।

नारदादि ऋषीणां च ह्यन्तर्यामितयाह्यहम्।

तत्र् तत्रास्मिदयिते वासुदेवः परात्परः।25

त्वं देवी नादरूपेण बीजरूपेणचास्म्यहम्।

आवयोरेवयोगेन सर्वेमन्त्राः प्रकीर्तिताः।

सकृदुच्छारणादस्य कृतकृत्यो न संशयः।

तथापि दशधानित्यं जपेदर्थं विभावयन्।

**अथ ध्यानं प्रवक्ष्यामि मन्त्रस्यास्य प्रियात्प्रिये।**

*''पीताम्बरं घनश्यामं द्विभुजं वनमालिनम्।

बर्हिबर्हकृतापीडं शशिकोटि निभाननम्।

घूर्णायमान नयनं कर्णिकारावतंसिनम्।

अभितश्चंदनेनाथ मध्ये कुंकुमरेखया।

रचितं तिलकंफाले बिभ्राणं कमलाकरे।30

तरुणादित्यसंकाशं कुण्डलाभ्यां विराजितम्।

घर्मांबु कणिकाराजद् दर्पणाभ कपोलकम्।

प्रियामुख विदुन्यस्त लोचनं चोत्तरभ्रुवम्।

नासाग्रविस्फुरन्मुक्ता शुद्धांशु विलसन्मुखम्।

दशनज्योत्स्नया राजत् पक्वबिम्बफलाधरम्।

केयूराङ्गदसद्रत्न मुद्रिकाविलसत्करम्।

बिभ्रतं मुरळीवाद्यं पाणौपद्मं तथापरे।

कांचीदामस्फुरन्मध्यं नूपुराभ्यां लसत्पदम्।

रतिकेळिरसावेश चपलं चपलेक्षणम्।

हसन्तं प्रिययासार्धं हासयन्तं च तां मुहुः।35

इत्थं कल्पतरोर्मूले रत्नसिह्मासनोपरि।

बृन्दारण्ये स्मरेत्कृष्णम्  संस्थितं प्रियया सह।

वामभागेस्थितां तस्य राधिकां संविचिन्तयेत्।

**नवीन नीलवसनाम् ध्रुतहेमसमप्रभाम्।

पटांचलेनावृतार्धसुस्मेराननं पंकजाम्।

कांतवक्त्रसुधाधाम चकोरायुत लोचनाम्।

अङ्गुष्ठतर्जनीभ्यां च निजप्रियमुखाम्बुजे।

अर्पयन्तीम् पूगफलं पर्णाचूर्णसमन्वितम्।

मुक्ताहारोल्लसच्चारु पीनोन्नत पयोधराम्।

क्षीणमध्यां पृथुश्रोणीं किंकिणीजालशोभिताम्।40

रत्नहाटककेयूर मुद्रावलय धारिणीम्।

रणत्कटकमंजीर रत्नपादांगुळीयकाम्।

लावण्यसारमुग्दाङ्गीं सर्वावयवसुंदरीम्।

आनंदरसमग्नां च प्रसन्नां नवयौवनाम्।

सख्यश्च राधिकाया वै तत्समानवयो गुणाः।

तत्सेवनपराभाव्या श्चामर व्यजनादिभिः।

जानासि हृदयावासे तथापि कथयामि ते।

अन्येषां च प्रबोधार्थं मन्त्रार्थममलं प्रिये।45

दशाक्षरेण संयुक्ता तथेयं षोडशाक्षरी।

श्रीराधाकृष्णयोर्विद्या बृन्दारण्योपसेवने।

रसिकानां सदा जप्या जन्मव्यय विनाशिनी।

महारसमयीलीला दिव्या नित्यानपायिनी।

आकल्पांतेकरूपेयं शुद्धसत्वमयि प्रिये।

अनयाप्राप्यतेभद्रे सत्यं सत्यं निशामय।

बहिरंगैर्भयं तस्य स्वीयैर्मायादि शक्तिभिः।

अन्तरङ्गैस्तथानित्य विभूतेस्ते चिदादिभिः।

गोपनादुच्यते गोपी श्रीनीळाराधिकाबिधा।

देवीकृष्णामयिज्ञेया राधिका परदेवता।50

सर्व लक्ष्मीस्वरूपा च श्रीकृष्णानंद दायिनी।

अतस्साह्लादिनी शक्तिर् नानाकेळिविशारदा।

तत्कलाकोटिकोट्यांशा दुर्गाद्यास्त्रिगुणात्मिकाः।

यथालक्ष्मीस्त्वमेवासि तथानीळाच गोपिका।

अहंनारायणःकृष्णो बृह्माण्डायुत नायकः।

सर्वस्य कारणं नीळामय्येव च कृताश्रया।

यथाहं व्यापकोदेवी तथेयं मम वल्लभा।

यथा यथा स्वरूपोहं ज्ञेयां नीळा तथा तथा।

चिदचिल्लक्षणंसर्व मावाभ्यां पूरितं जगत्।

सैषा हि राधिकागोपीजनस्तस्यासखीगणः।55

वल्लभौ तत्समूहस्य संप्रोक्तौ प्राणनायकौ।

राधाकृष्णौ तयोःपादौ शरणम्स्यादिहाश्रयः।

प्रपद्यगतवानस्मि जीवोऽहंभावदूषितः।

सोऽहंतच्छरणंप्राप्तो हित्वाऽन्यत्साधनं महत्।

प्रयोजनांतरंहित्वा संबन्धान्तरमेव च।

भोगं मे युगळानंदो नित्यस्सर्वावधिस्तु यः।;

अनन्यसाधनंत्वाह नमश्शब्दो दशाक्षरे।

चतुर्थीत्वाह कल्याणी तथाऽनन्य प्रयोजनम्।

ममत्व माह मश्शब्दो न शब्दस्तषेधनम्।

ममत्वं सर्वतस्त्यक्त्वा दर्पं च शरणागतः।60

मन्त्रार्थः कथितस्त्वेष संक्षेपेण वरानने।

युगळार्थस्तथा न्यासः प्रपत्तिश्शरणागतिः।

आत्मावर्णमिमे पंचपर्यायास्ते मयोदिताः।

रासलीला मयासाकं श्रीमद्वृन्दावने तु या।

भविष्यति महाभागे तत्रेच्छातव यास्यति।

द्वारकायां तथा भद्रे रुक्मिणीरूपिणीस्वयम्।

प्रजप्यैतां महाविद्यां यास्यसि त्वरितासुखम्।

श्रुत्वाभवोपि मल्लीला मद्दृश्यं भुवि मानवैः।

तपसा मां समाराध्य मत्तो विद्यामवाप्स्यसि।

शंकरान्नारदो योगीचांबरीषस्ततो नृपः।65

अवाप्यति वरारोहे मन्त्रं दीक्षापुरस्सरः।

एवं परंपराभागैः विद्या भविष्यति।

जीवाःपापंतरिष्यंति नाहंदूरेऽनयाऽनघे।

गृहीत्वा परमांविद्यां वैष्णवंधर्ममाचरन्।

आजीवमुपतिष्ठेत मम क्षेत्रं वरानने।

श्रीरुवाच-

संक्षेपा देवदेवेशविनाशनम्। भवभीति !

धर्मंभागवतं ब्रूहि येन कृष्णःप्रसीदतु।

श्रीभगवानुवाच-

कल्याणि श्रूयतां धर्मो लोकानां हितकाम्यया।

शङ्खचक्रांकनं कृत्वा प्रपन्नोयं समाचरेत्।
गुरुं च परयाभक्त्या सेवमानो निरंतरम्।70
तत्कृपां भावयेद्विद्वानात्मनो विनिवृत्तये।
स्वेष्टदेवधियानित्यं वैष्णवान् परितोषयेत्।
ताडनं भर्त्सनंकामी भोगत्वेन यथास्त्रियाः।
गृह्णाति वैष्णवानां च तद्वद्गृह्यं सदाबुधैः।
ऐहिकामुष्मिकींचिन्तां नैवकुर्यात्कदाचन।
ऐहिकं तु सदाभाव्यं पूर्वाचरित कर्मणा।
आमुष्मिकं तथा कृष्णः स्वयमेव करिष्यति।
अतो हि तत्कृते त्याज्यः प्रयत्नस्सर्वदा नरैः।
सर्वोपाय परित्यागः कृष्णोपायत्वमाचनम्।
सुचिरं प्रोषितेकान्ते यथापतिपरायणा।75
प्रियाऽनुरागिणीदीना तस्यस्वंगैक काङ्क्षिणी।
तद्गुणान् भावयेन्नित्यं गायत्यपि श्रृणोति च।
तथा श्रीकृष्णलीलादेस्मरणादि समाचरेत्।
न पुनस्साधनत्वेन कार्यं तत्तु कदाचन।
चिरं प्रोष्यागतंकान्तं यथाप्रोषितभर्तृका।
चुंबन्तीवांगमालिङ्गे न्नेत्राभ्यां पिबतीव च।

बृह्मानंदं गताचामुम् सेवते परयामुदा।

श्रीमदर्चावतारेषु तथा परिचरेद्धरिम्।

अनन्यशरणो नित्यं तथैवानन्य साधनः।

भवेदनन्यसम्बंध स्तथाऽनन्यप्रयोजनः।80

नान्यं च पूजयेद्देवं न नमेन्नस्मरेदपि।

न च पश्येन्नगायेच्च न च निंदेत् कदाचन।

नान्यूच्छिष्टं तु भुंजीत नान्यशेषं च धारयेत्।

अवैष्णवानां सल्लापं वन्दनादीन्विवर्जयेत्।

विष्णोर्वा वैष्णवानां वा निंदा न श्रृणुयान्मनाक्।

कर्णापिधाय गन्तव्यं शक्तोदण्डं समाचरेत्।

आश्रित्यचाऽथ किं वृत्तिं देहपातावधिप्रिये।

द्वयार्थं भावयेन्नेव तिष्ठेदित्येव मे मतिः।

सरस्समुद्र नद्यादीन् संत्यजंश्चातको यथा।

तृषितो म्रियमाणो वा याचते वै पयोधरम्।85

एवमेव प्रयत्नेन साधनानि परित्यजेत्।

स्वेष्टदेवौ सदायाच्यौ गतिस्तौ मे भवेदिति।

स्वेष्टदेव तदीयानां गुरोरपि विशेषतः।

आनुकूल्ये सदास्थेयं प्रातिकूल्यं विवर्जयेत्।

सकृत्प्रपन्न रक्षादि कल्याण गुणतांतयोः।

विचिंत्य विश्वसेद्देवौ मामपश्य मविष्यतः।

संसारसागरान्नाथौ पुत्रमित्र गृहाकुलात्।

गोप्तारौ मे दयासिंधू प्रपन्नभयभंजनौ।

योऽहम्ममास्ति यत्किंचि दिहलोके परत्र च।

तत्सर्वं भवतोरद्य चरणेषु मयार्पितम्।90

अहमस्म्यपराधाना मालयस्त्यक्त साधनः।

अगतिश्च गतोहं वा शरणं भजतांगती।

तवास्मि राधिकाकांत कर्मणामनसा गिरा।

कृष्णकांते तवैवास्मि युवा मेव गतिर्मम।

शरणं वां प्रपन्नोस्मि करुणा निकरा करौ।

प्रसादं कुरु तां दास्यम् मयिदुष्टेऽपराधिनि।

इत्येवं जपतां नित्यं स्थातव्यं वद पंकजे।

अचिरादेव दास्यामि वांछितं कमलालये।

बहिरेवमथोमध्ये सखीभावेन भावयेत्।

श्रीराधाकृष्णयोर्नित्यं लीलायोग्यः प्रजायते।95

पीठेसमर्चयेद्विद्वान् नित्यमावरणैस्सह।

भावयेत्केळिसंदोह ममलं प्रकृतेःपरम्।

नित्यंस्मरामि तां नीलां त्वया संलालितोप्यहम्।

अपूर्वरूपसंदोहं कस्मरेन्न विलोक्यताम्।

कैशोरं रूपमनघे वेणुवाद्य विभूषितम्।

कस्यस्यात्स्मृतये भद्रे कोटिकाम कलोदयम्।

इति श्रीपाञ्चरात्रे बृहद्ब्रह्मसंहितायां द्वितीयपादे

लोकाख्याने बृन्दावनचरिते युगळाराधनकथनं नाम पंचमोऽध्यायः।

द्वितीयपादे-अध्यायः-6

मन्त्रद्वयाराधन विधिः।

किं पीठं किं च तद्रूपं येनमुह्यंति सूरयः।

किमावरणमाख्या हि का नीलारस रूपिणी।

श्रीभगवानुवाच-

पीठं तयोःप्रवक्ष्यामि समस्तावरणैस्सह।

रूपं च नीलयायुक्तं शक्तोनैवास्मि भाषितुम्।

गोलोके पश्यपद्माक्षी सनीलं कधनेन किम्।

इतःकोटिगुणंरूपं भूमौ बृन्दावने कृतम्।

द्वापरांते कलेरादौ यदुवंशे महेश्वरी।

आविर्भूय करिष्यामि त्रिविधां केळिमुज्ज्वलाम्।

नित्यैकां दृश्यरूपेण दृश्यैकां कमलालये।

गोपकन्या हितार्थाय पंचयोजन मण्डले।-5

त्वदर्थं तु त्रितीयां च द्वारकायां विशेषतः।

करिष्ये तत्र दृष्टासि राधिका सहितं च माम्।

तत्रत्या मृत्तिकाऽद्यपि गोपीचंदन संज्ञिता।

पुनाति सकलान् लोकानूर्ध्वपुण्ड्रेण धारिता।

षट्कोणाष्टदळं बाह्ये चतुष्षष्टिदळं पुनः।

चतुरश्रं तदुपरि चतुर्द्वार समन्वितम्।

मध्ये तु कामबीजं स्यात् षट्कोणेकामकीलकम्।

कोणाग्रेषु विचिंत्यानि श्रियोबीजानि मानिनी।

द्वयं तु चिंतयेन्मध्ये कर्णिकायां समं ततः।

दळाष्टके सखीस्थाने सखीनामष्टकं जपेत्।10

अष्टावष्टौ प्रतिदळे चतुष्षष्टिदळेषु वा।

सुगंधद्रव्यभूषाभिः भक्ष्यैर्भोज्यैश्च पूजयेत्।

त्रिकोटिसुंदरीबृन्दपरीतं परिभावयेत्।

तासांद्वयोर्द्वयोर्मध्ये मामेकमनुचिंतयेत्।

कर्णिकायाम बालेंदुमण्डले जलदाकृतिम्।

**सुवर्णवर्णयादेव्या राधया परिवेष्टितम्।

कोटिकंदर्पमुग्धांगङ्ग मरविंदनिभेक्षणम्।

मयूरपिंछाभरणं स्फुरन्मकरकुण्डलम्।

बंधूकजलविभ्राजत् पाणिपादतलाधरम्।

त्रिभंगसुंदरग्रीवं वेणुवादन तत्परम्।15

कुटिलालकमापीन भुजदण्डविभूषितम्।

वलयांगदमाणिक्य मयूख विलसत्तमम्।

स्फुरन्मुक्ताफलोदार द्युतिपूरित वक्षसम्।

श्रीवत्सकौस्तुभोरस्कं रणत्कांची कलापकम्।

मञ्जु मञ्जीर निर्घोष दृष्टपादसरोरुहम्।

वधू कदंबमध्यस्थमुदारगुणमण्डितम्।

वीणावादनतत्वज्ञं गानमोहित मन्मथम्।

**पार्श्वे विचिंतयेद्देवीं राधिकां परदेवताम्।

कामकेळिकलाभिज्ञांउन्निद्र जलजेक्षणाम्।

क्षीणमध्यामनिंद्याङ्गिं मुग्धहासां महच्छविम्।20

गीतकाव्य कथालाप विदग्धां सुंदरोदरीम्।

किशोरीं शैशवक्रीडा परमव्यंजितस्तनीम्।

नीलशाटिपरीधानां पंककाश्मीर पंकिलाम्।

पङ्कजांदोळितकरां काळिंदी केळि लंपटाम्।

श्रीकृष्णांस समासक्त पाणीमाहूत षड्पदाम्।

कौमुदिवल्लभांकान्तां बृन्दावनविलासिनीम्।

नित्यानपायिनीं विष्णोः भावयेद्रसदीर्घिकाम्।

कर्णिकाबाह्य वलये राधाविद्यां लिखेत्सुधीः।

प्रणवंकामबीजं च दीर्घवह्निं च राधिकाम्।

संमोहोनीं कामधातृ भूसमेतां च विन्यसेत्।25

कामकेळि च नीळे च तथा लावण्यरूपिणी।

नमोनमस्ते च पदं राधाविद्येति कीर्तिता।

श्रीराधायै नमोवेति मन्त्रोऽन्योऽयं षडक्षरः।

संपूज्याःपरितोदेवीं ललिताद्याश्च शक्तयः।

व्याख्यास्वरूपवर्णानि ह्युपरिष्टाद्वरानने।

स्तोत्रेणानेन विधिवत् संस्तुवीत विचक्षणः।

पूजांते रसिकानंद पूजितांपरदेवताम्।

जयतिश्रीपरानंद कृष्णपादपवल्लरी।

"श्रीकृष्णवदनांबोज मधुपान मधुव्रती।

श्रीकृष्णनयनानंदरस कर्पूरवर्तिका।30

श्रीकृष्णानन पूर्णेंदो राधिकाचारुचंद्रिका।

श्रीकृष्णरूप पाथोधि लहरी हेमवैभवा।

श्रीकृष्णमालतीहार सुगन्धवरभूषणा।

श्रीकृष्णपरमानंदसरः पंकजकुण्डला।

श्रीकृष्णयामिनीरम्य चंद्रोदयमुखोदया।

श्रीकृष्ण हृल्लतामूल विकासामलदोहदा।

श्रीकृष्णबाल्य कौमार केळिरूपायशस्विनी।

श्रीकृष्णभवकैशोर सकेळिकलाप्रिया।

श्रीकृष्णलोलनयन विलोलामलतारिका।

कृष्णपानःकृष्णहृच्च कृष्णचैतन्य रूपिणी।35

कृष्णानंदा कृष्णमुखी कृष्णोद्भव भयापहा।

कृष्णहासा कृष्णरसा कृष्णलीलकिशोधरी।

कृष्णप्रिया कृष्णभरा कृष्णा कृष्णविलासिनी।

कृष्णकान्ता कृष्णदैवा कृष्णांगी कृष्णजीवना।

कृष्णतृट् कृष्णभोग्या च कृष्णक्षुत् कृष्णसाधना।

कृष्णाश्रया कृष्णपरा कृष्णाभा कज्जलप्रिया।

कृष्णशेषा कृष्णसाध्या कृष्णजीमूत चातकी।

कृष्णकेळीकलाभिज्ञा कृष्णपादपमंजरी।

कृष्णकासारमकरी कृष्णमातंग संगिनी।

कृष्णतुष्णा कृष्णपुष्टा कृष्णतोषविधायिनी।40

कृष्णनेत्रा कृष्णकेशी कृष्णकुन्तळ मण्डिता।

कृष्णगीता कृष्णपरा कृष्णनृत्या रसेश्वरी।

कृष्णपूज्या कृष्णभक्ता कृष्णलीला कलावती।

कृष्णविद्या कृष्णबुद्धिः कृष्णसंकल्प सिद्धिदा।

कृष्णमानसकल्लोल स कृष्णमानस पंकजा।

कृष्णमान्या कृष्णवंद्या कृष्णसंताप चंद्रिका।

कृष्णसंगीतगमना कृष्णस्तोभ विधायिनी।

कृष्णाननाब्जमार्ताण्ड कृष्णनेत्रांजन प्रभा।

कृष्णलावण्यनिलया कृष्णसौभाग्यशेवधिः।

श्रीकृष्णाकर्षिणी कृष्ण कथारसनिषेविका।45

कृष्णतल्पा कृष्णकल्पा कृष्णकुल्याकलास्वना।

कृष्णकेळिपियाकृष्णकेळिनंता नदोहदा।

कृष्णशुद्धा कृष्णबुद्धा कृष्णमुग्धाकळंकिणी।

कृष्णभामा कृष्णवामा कृष्णकामा मनोहरा।

कृष्णैश्वर्या कृष्णवित्त कृष्णस्मित विघूर्णिता।

कृष्णाधररसाभिज्ञा कृष्णकौतुकसाधना।

कृष्णक्रीडासुधासिंधुः कृष्णनाम परायणा।

कृष्णश्रीकृष्णभूतिश्च कृष्णधीःकृष्णमङ्गळा।

कृष्णवेणी कृष्णगतिः कृष्णाकामधुघा हिता।

कृष्णमूला कृष्णशाला कृष्णहृत्पद्म कर्णिका।50

कृष्णजीवातुका राधा वृषभानुतनूद्भवा।

इति श्रीराधिकानाम स्तवराजमनुत्तमम्।

संपठेत् प्रेमदंदिव्यं कामदंपुण्यवर्धनम्।

पूजावसाने संजप्यं युगळध्यान संयुतम्।५२

प्रणवाद्यमिदं देवी देवानामपिदुर्लभम्।

**कृषिर्भुवाचकश्शब्दो णश्चानंदविदायकः।**

**सदानंदसमावेशः कृष्ण इत्यभिधीयते।**

सच्चिदानंदरूपाय कृष्णायाक्लिष्टकारिणे।

नमोवेदांतवेद्याय ब्रह्मणे परमात्मने।

अनयाराध्यते कृष्णो भगवान् हरिरीश्वरः।५५

लीलयारसवाहिन्या तेन राधा प्रकीर्तिता।

राधिकापि पराशक्तिः कृष्णेचानंद रूपिणी।

नित्या च नित्यसत्यस्मिन् स्वाधारे पुरुषोत्तमे।

राधागानप्रियो राधा संगीताहृतमानसः।

राधालावण्यनिलयो राधा प्रेमसरोरुहा।

राधाश्रृङ्गारपुलको राधाश्रृङ्गार कारकः।

राधामुखाब्जमधुपो राधास्मित निरीक्षकः।

राधाऽधरसुधामोदी राधाकण्ठविभूषणः।

राधामनस्सरो हंसो राधामान विमोचकः।

राधाविलासगर्विष्टो राधारूपासवोन्मदः।60

राधारूपलताबृङ्गो राधाचंद्रचकोरकः।

राधारससरोमंदी राधासर्वांग संश्रयः।

राधारत्नावळीकण्ठो राधासौभाग्य मंदरः।

राधागंभीरतत्वज्ञो राधाजीमूत चातकः।

राधाविद्योदितोरस्को राधितोराधिकाप्रियः।

नित्योक्षरोनरोराधा निर्गुणोनीरदच्छविः।

निराकारोहरोहारी विहारविपिनप्रियः।

वेणुविस्फूर्जितमुखो विशुद्धस्मित भूषितः।

गुंजावळी विभूषाड्यो बर्हिपिंछविभूषणः।

गोवर्धनधरो गोपिमण्डली मध्यगोहरिः।65

गोपालोगोकुलस्वामि गोविंदो गोकुलेश्वरः।

त्रिभंगसुंदरग्रीवो मधुघूर्णितलोचनः।

रक्तोष्ठो रक्तचरणो रक्तनेत्रोरसायनः।

रसप्रियोरसाविष्ठो राकाचंद्रविनोदकृत्।

त्र्य्यंतबोधितो वेदवेद्यो निद्याविनोदकृत्।

विवेकगंयादौरेया धरणीबृद्धनाधिपः।

क्षामोदरःक्षामसारोऽधीनो दामोदरोदमी।

दयार्द्रचित्तः श्रीवक्षाः श्रीधरःश्रीकरो हरिः।

दिव्यलोकगतो दिव्यो दिव्यायुधोऽच्युतः।

नित्यमुक्तजनाराध्यो जगदानंदकारकः।70

कल्याणनिलयःकल्यः कल्प पादपसंश्रयः।

काळिंदी केळिकृत्कंस बलविध्वंसकृत् कृती।

कळंकरहितःकामी कामिनीकेळिदक्षिणः।

बृन्दावनस्थोगोबृन्द बालको बालकेळिकृत्।

बलभद्रप्रियश्रीमान् वारणोद्धूननो बलः।

ताण्डवी पाण्डवप्रेष्टो माधवो नंदनंदनः।

जनार्दनो जनावासो वासुदेवो जनेश्वरः।

वंशीवटी नटोनादी दानाकृष्ट जगत्त्रयः।

दातीतो नदीकूलकेळिकृनाद्दूळिदूसरः।

नारदोदित संगीत सामगानःप्रियःकलः।75

इति नामशतं नित्यं जपतां किं सुदुर्लभम्।

स्वापकाले प्रबोधे च पुण्याहे पुण्यकर्मणि।

पुण्यक्षेत्रे प्रजपतः सद्भक्तिरनपायिनी।

एतन्नामामृतस्तोत्रे श्रीराधाकृष्णयोःप्रिये।

पठेद्विचिंतयन्नर्थमचिराद्विंदते हि मां।

इति श्रीपाञ्चरात्रे बृहद्बृह्मसंहितायां द्वितीयपादे

लोकाख्याने बृन्दावन चरिते मन्त्रद्वयाराधननिरूपणं नाम षष्ठोऽध्यायः।

## सप्तमोऽध्यायः

## लोकनिरूपणम्

श्री नारायण उवाच-

एवं चतुर्विधा देवी ममपुर्यो भवंति हि।

माधुरे मधुरापुण्या तत्र बृन्दावनं वरम्।

अयोध्या कोसलेदेशे सरयूपुळिनेस्थिता।

यत्र राजीवपत्राक्षो रामोदशरथात्मजः।

परमात्मासमभवन् जानकीरूपया त्वया।

तयोर्लीनानुसंधानां मुक्तिर्भवति सद्गतिः।

श्रीराममन्त्रराजस्य माहात्म्यं गिरिजापतिः।

जानाति भगवान् शंबुः ज्वलत्पावकलोचनः।

रामोजेंतो वह्निपूर्वो नमोन्तस्यात्षडक्षरः।

तारको मन्त्रराजोयं संसारविनिवर्तकः।5

रमंते योगिनोनंते सत्यानंदे चिदात्मनि।

इति राम पदेनासौ परंब्रह्माभिधीयते।

रामेति किलवर्णाभ्यां ब्रह्मेति प्रतिपाद्यते।

कारणं सर्वभूतानामवधिः परिकथ्यते।

बृहद्गुणानामाधारो रहितःप्राकृतैर्गुणैः।

एषसर्वस्य विधृतिः सेतु श्रुत्या प्रकीर्तितः।

यदा यदा हि धर्मस्य ग्लाणिर्भवति भारत।

अभ्युत्थानमधर्मस्य तदात्मानं सृजत्यसौ।

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय जातोदशरथात्मजः।10

रामेनीलोत्पलश्यामे वामेकोदण्डभूषिते।

भक्त्याभ्येतिपरंस्थानं वैकुण्ठाख्यं सुदुर्लभम्।

चतुर्थीचात्रनिर्धिष्टातादर्थ्ये कमलोद्भव।

अभ्येति तेन रामं हि संत्यज्यास्य प्रयोजनम्।

साधनांतर संत्यागं नमश्शब्दो हि शंसतिः।

अनेनशरणापत्तिः परमैकांतिनां मता।

सर्वधर्मान् परित्यज्य मामेकं शरणंगतान्।

मोक्षयिष्यामि सर्वेभ्यः पापेभ्योनात्रसंशयः।

दासोस्मीति च संधाय चात्मानं परमेश्वरी।

अभयं तस्य दास्यामि यो मामेति निरंतरम्।15

गच्छंस्तिष्ठन् स्वपन् भक्त्या नमन्योगुरुदेवयोः।

दासोस्मीति निजम् रूपं स्मरन् मुच्येत बंधनात्।16

नारायणस्य ये भक्ताः शांताविसत मानसाः।

तेषां दासस्यदासोहं इति संचिंतयेद्धिया।17

शंखचक्रोर्ध्वपुण्ड्राद्यैः दासवेषं विधाय च।

दासवद्देवदेवेशं भक्त्यापरिचरेद्धरिम्।18

स सर्वसिद्धिमासाद्य ह्यंते रामपदं व्रजेत्।

चिंतयेच्चेतसा नित्यं श्रीरामश्शरणं मम।19

चिद्रूपस्यात्मनो रूपं पारतन्त्र्यं विचिंत्य च।

चिंतयेच्चेतसा नित्यं श्रीरामश्शरणं मम।20

आत्मादारं स्वतन्त्रं च सर्वशक्तिं विचिंत्य च।

चिंतयेच्चेतसा नित्यं श्रीरामश्शरणं मम।21

नित्यात्मगुण संयुक्तो नित्यात्म तनुमण्डितः।

नित्यात्म केलि निलय श्रीरामश्शरणं मम।22

गुणलीलास्वरूपेषु मितिर्यस्या न विद्यते।

अतो वाङ्मनसावेद्य श्रीरामश्शरणं मम।23

कर्ता सर्वस्यजगतो भर्ता सवस्य सर्वगः।

संहर्ताकार्यजातस्य श्रीरामश्शरणं मम।24

वासुदेवादि मूर्तीनां चतुर्णां कारणं परम्।

चतुर्विंशतिमूर्तीना माश्रयश्शरणं मम।25

नित्यमुक्तजनैःपुष्टो निविष्टःपरमेपदे।

परमंपरमभक्तानां श्रीरामश्शरणं मम।

महदादिस्वरूपेण संस्थितःप्राकृतेपदे।

बृह्मादिदेवरूपैश्च श्रीरामश्शरणं मम।26

मन्वादि नृपरूपेण श्रुतिमार्गं बिभर्ति यः।

यः प्राप्यते स्वरूपेण श्रीरामश्शरणं मम।27

ऋषिरूपेण यो देवो वनवृत्तिमपालयत्।

योऽन्तरात्मा च सर्वेषां श्रीरामश्शरणं मम।28

योसौ सर्वतनुस्सर्व स्सर्वनामा सनातनः।

अलिप्तस्सर्व भावेषु श्रीरामश्शरणं मम।29

बहिर्मर्त्यादि रूपेण सद्धर्ममनुपालयन्।

परिपातिजनान् धीनान् श्रीरामश्शरणं मम।30

यश्चात्मा संपृथक् कृत्य भक्तप्रेमवशं गतः।

अर्चायामास्थितो देवः श्रीरामश्शरणं मम।31

सर्वावतार रूपाणां दर्शनस्पर्शनादिभिः।

दीनानुद्धरतेयोसौ श्रीरामश्शरणं मम।32

कौसल्या शुक्तिसंजातो जानकी कण्ठभूषणः।

मुक्ताफल समोयोसौ श्रीरामश्शरणं मम।33

विश्वामित्रमुखत्राता ताटकागति दायकः।

अहल्याशापशमन श्रीरामश्शरणं मम।34

पिनाक भंजनश्रीमान् जानकी प्रेमपालकः।

जामदग्न्यः प्रतापघ्नः श्रीरामश्शरणं मम॥35

राज्याभिषेक संहृष्टः कैकेयी वचनात्पुनः।

पित्रादत्तवनक्रीड श्श्रीरामश्शरणं मम।

जटाचीरधरो धन्वी जानकीलक्ष्मणान्वितः।

चित्रकूट कृतावासः श्रीरामश्शरणं मम।

महापंचवटी लीला संजातपरमोत्सवः।

दण्डकारण्यसंचारी श्रीरामश्शरणं मम।

खरदूषण संछेदी दुष्टराक्षस भंजनः।

हृतशूर्पनखा शोभ श्रीरामश्शरणं मम।

मायामृगविभेत्ता च हृतसीता सु तापकृत्।

जानकी विरहाक्रोशी श्रीरामश्शरणं मम।40

लक्ष्मणानुचरो धन्वी लोकयात्रा विडंबकः।

पंपातीरे कृतान्वेषः श्रीरामश्शरणं मम।

जटायु त्राणकर्ता च कबंद् गति दायकः।

हनुमत्कृतसाहित्य श्रीरामश्शरणं मम।

सुग्रीव राज्यदश्श्रीशो वाली निग्रहकारकः।

अंगदश्वासनकरः श्रीरामश्शरणं मम।

सीतान्वेषणनिर्मुक्ता हनुमत्प्रमुखव्रजः।

मुद्रानिवेशितबलः श्रीरामश्शरणं मम।

हेलोत्तारित पाथोधिः दूतनिर्धूत राक्षसः।

लंकादाहकरो धीरः श्रीरामश्शरणं मम।४५

रोषसंबद्धपाथोधिर् लंकाप्रासाद् रोधकः।

रावणादिप्रभेत्ता च श्रीरामश्शरणं मम।

जानकीजीवनत्राता विभीषण समृद्धिदः।

पुष्पकारोहणासक्तः श्रीरामश्शरणं मम।

राजसिह्मासनारूडः कौसल्यानंदवर्धनः।

नामनिर्धूतनिरयश् श्रीरामश्शरणं मम।

यज्ञकर्ता यज्ञभोक्ता यज्ञभर्ता महेश्वरः।

अयोध्यामुक्तिदश्शास्ता श्रीरामश्शरणं मम।

प्रपन्नस्सर्व धर्मज्ञो मामेकं शरणं गतः।

पठन्निदं ममस्तोत्रं मुच्यते भवबंधनात्।50

मन्त्रश्चाष्टाक्षरो देवी श्रीरामश्शरणं मम।

सिद्धोपायोक्षरविदां भावना परिकल्पितः।

रामेति द्व्यक्षरं मन्त्रं मरणे यदि संस्मरेत्।

नरो न लिप्यते पापैः पद्मपत्रमिवांभसा।

रामभद्रो रामचंद्रो मन्त्रोयं चतुराक्षरः।

शुद्धोजिंतो नमःपश्चात् सप्तवर्णोपि मुक्तिदः।

अष्टाक्षरो बीजपूर्वो बीजं तु प्रणवो भवेत्।

नानाकामवशाद्देवी बीजान्यन्यानि संति हि।

षडक्षरो वह्निपूर्वास्तारकस्त्वभिधीयते।

महापातकिनां पापदहने दहनोपम।55

हुंजानकीवल्लभेति जेंतो वह्निप्रिया ततः।

दशाक्षरो महामन्त्रो जपतां कल्पपादपः।

**श्यामं वारिजपत्रनेत्रममलं प्रज्ञानमूर्तिं हरिम्।

विद्युद्दीप्तपिशंग रम्यवसनं भास्वत्किरीटोज्ज्वलम्।

कर्णालंबित हेमकुण्डललसद् ब्रूवल्लिमत्यद्भुतम्।

श्रीमन्तं भगवन्तमिंदुसहितं श्रीजानकीशं स्मरेत्।**

श्रीरंगाख्यपरंधाम मम मानिनि भूतले।

वैकुण्ठवैभवं सर्वं मया तत्र नियोजितम्।

कावेरी विरजा यत्र प्रभुपादांबुजाश्रया।

श्रीमुक्तिमण्डपं नाम मंदिरं मे वरानने।60

त्वयासह सदा देवी निवसामि महीतले।

श्रीरंगशायी भगवान् यत्रास्ते गरुडध्वजः।

द्राविडेषु महापुण्यं श्रीरङ्गाख्यं निकेतनम्।

शिलारूपेण तिष्ठामि यत्राहं कमलप्रिये।

कावेरी तोयरूपेण मामवेहि निरन्तरम्।

यत्तोयपानादनघे निष्पापो जायते नरः।

सह्यपुण्यवतां देवी मन्निकेतोप लंभनम्।

साधनांतरनिष्ठानां भवतीत्यवधारय।

यत्र मे लोककल्याणकारिणी परमाकला।65

द्विजरूपेण भविता यातु संकर्षणाभिधा।

द्वापरांते कलेरादौ पाषण्डप्रचुरे जने।

रामानुजेति भविता विष्णुधर्म प्रवर्तकः।

श्रीरङ्गेशदयापात्रं विद्धि रामानुजं मुनिम्।

येन संदर्शितःपंथा वैकुण्ठाख्यस्य सद्मनः।

परमैकांतिकोधर्मो भवपाशविमोचकः।

यत्राऽनन्यतया प्रोक्तामावयोःपादसेवनम्।

कालेनाच्छादितोधर्मो मदीयोयं वरानने।

तदा मया प्रवृत्तोयं तत्कालोचितमूर्तिना।70

विष्वक्सेनादिभिर्भक्तैः शठारिप्रमुखैर्द्विजैः।

रामानुजेनमुनिना कलौसंस्थामुपेष्यति।

श्रीशैलो वेंकटाद्रिश्च रङ्गाख्यं दाममामकम्।

यैर्नदृष्टं सुदृष्टंतैः वैवस्तगृहाजिरम्।

चतुर्थंद्वारकाख्यं हि मद्दामसुरवंदितम्।

श्रयतां परमाभक्त्या नाहं दूरे कदाचन।

यत्राहं हेतिनासाद्धि  तापयामि तनुं नृणाम्।

येनपूता भविष्यंति कलौ मंदाधिकारिणः।

गोमत्यासंगमो यत्र सागरेणमहात्मना।

मृतास्तत्र भविष्यंति पापिनोपि चतुर्भुजाः।75

कलिकाले महाघोरे नोपायोविद्यते परः।

विना द्वारतवतीयात्रां गोमत्यांचाभिषेचनम्।

द्वारकामृत्तिकालेपान्निर्लेपः पापकर्दमात्।

जायते पुरुषो लोके  कलिकाले विशेषतः।

तुळसीमालिकायुक्ताद्वरका मृत्तिकांकितः।

मम ध्यानरतोजंतु रहमेव न चेतरः।

एवं पुण्यतराः पुर्यः क्षेत्राण्यायतनानि च।

मदैकांतिक भक्तानां मत्पदप्रापकाणि च।

धर्मस्थानमयोध्याख्यां रङ्गंमुक्तिप्रदं स्मृतम्।

द्वरका भक्तिकृत्स्थानं रसस्थानं तु माधुरम्।80

एवं प्रकाशितं देवि भक्तानां हितकारणात्।

प्राकृतेपि पदंमुक्तैःमागाशोकंमनागपि।

इति श्रुत्वा महादेवि विष्णुपत्नी मुदान्विता।

स्वतन्त्रे  कथयामास भक्तिं षोडशधा हरेः।

स्थानानि मत्प्रयुक्तानि ब्रह्मन्नुपदिदेशया।

निवासार्थं विष्णवा नाम प्राकृतपदं यथा।

इति ते कथितं बृह्मन् प्रसंगान्निज वैभवम्।

प्राकृते प्राकृतम्स्थानम् चतुर्थात्ववतारितम्।

पद्मोपदिष्ठं ते सर्वमाख्यानंपावनम् महत्।

स्थानं बृन्दावनं नाम पद्माद्यायति नित्यशः।85

कथम् निवसताम् मुक्तिरित्युक्तम् यत्त्वयाऽनघ।

तदिदं सर्वमाख्यातं विमुक्तिपदकारणं।

बृह्मोवच-

मुनयोभगवानेवं प्राकृतेः क्षितिमण्डले। !

मामुवाच निजंस्थानं दिव्यमोक्षैकसाधनम्।

मुनय ऊचुः-

भुवर्लोकादिकं सर्वं श्रुतं विष्णुमुखाद्यथा।

तथानो वद विश्वात्मन् प्रपन्नान् शरणागतान्।

बृह्मोवाच--

श्रूयतां मुनयःपुण्यं भगवद्वचनामृतम्।

कृपया करुणासिंधु यथामामवदत्पुरा।

श्रुत्वाहं भूमिलोकं च स रहस्यं जनार्धनात्।

भुवःप्रभृति लोकानांअपृच्छं रूपमद्भुतम्।90

श्री नारायण उवाच-

यावत्प्रमाणापृथिवी विस्तीर्णा परिमण्डला।

तावद्भुवस्थलंबृह्मन्! विस्तीर्णपरिमण्डलम्।

उपरिष्टात् क्षितोव्योम्नि लक्षयोजनसंमिते।

रविस्तिष्ठति तिग्मेस्स्वैरंशुभिर् भासयन् जगत्।

रथमास्थाय भगवान् बहुयोजन विस्तृतम्।

वामपार्श्वेस्थितं त्वेकचक्रं दिव्यं  प्रतिष्ठितम्।

वहंती सप्तयस्सप्त च्छंदासिस्यंदनं महत्।

सारथिश्चारुणस्सर्वा नस्वान्वाहयति स्स्वयम्।

मानसोत्तरशैलस्य मूर्ध्नि स्यंदन पद्धतिः।

विभागहेतुरुषसा मह्नमपि गतिक्रमात्।95

योगिनांपरमःपन्था स्मृतःक्लेशपरिक्षये।

मोक्षमाणाःपथा येन यांति विष्णोःपरंपदम्।

उदयास्तमनौयैव भानुस्सर्वत्र संमुखः।

दर्शनादर्शनेभानौ रुदयास्तमयौ मतौ।

यैर्यत्र दृश्यते भानुः सतेषामुदयस्स्मृतः।

यदा यत्रतिरोभावः तदास्तमयधीनृणाम्।

दूरीभवंति पूर्वाह्णे रश्मयोह्यस्यसंतताः।

ह्रस्वी भवंति पश्चात्तु यावत्तेषामदर्शनम्।

वर्जयित्वापुरींदातु सर्वतो मेरुभूतले।

पतंतिभानवोभानूस्तिर्यगूर्ध्वं मदस्तताः।100

सभां तु ब्रह्मणो गत्वा प्रत्यगच्छंति ते पुनः।

बृह्मणस्तेजसा तेन नान्यत्रावर्तनं भवेत्।

भानोर्ययोंतराळं भुवस्तलमुदाहृतम्।

विद्याधरश्च गन्धर्वा सिद्धाश्च सह दानवाः।

वसंति मुदितास्स्वेषु प्रदेशेषु पृथक् पृथक्।

लक्षे दिवाकरस्थाना च्छशिनस्थानमीरितम्।

तस्योपरिष्ठात्तिष्ठंति नक्षत्राणि यथा तथा।

लक्षत्रयमतीत्योर्ध्वं बुधस्यस्थितिरुच्यते।

उशना तु ततो लक्षद्वयमुत्तीर्य तिष्ठति।

तद्योजनान्यतिक्रम्य भौमस्तिष्ठति सर्वदा। 105

तावत्प्रमाणेनऽवस्थानं गुरोस्तस्योपरिस्थितः।

शनैश्चरस्तत्प्रमातीत्योर्ध्वं रवेस्सुतः।

सप्तर्षीण्मण्डलं तस्माल्लक्षमेकं सुरेश्वरः।

सप्तर्षिभ्यस्सह्स्राणां शतादूर्ध्वं व्यवस्थितः।

ततो ध्रुवस्थितस्थाने दुरारोहे महर्षिभिः।

मेदीभूतस्समस्तस्य ज्योतिश्चक्रस्य पद्मज।!

द्वादशारं महच्चक्रं नेमिद्वे तस्य नाभयः।

तिस्रस्संति वसंताद्या ऋतवो येद्व येद्घरेषु ते।

मेषादयोष्वरेष्वेव मीनांता द्वादशस्मृतः।

मासाद्वादशचैत्राद्या वसंतप्रमुखास्तथा। 110

ऋतवष्षद्क्रमाच्चैव विषुवाऽयनयोर्द्वयम्।

सितासितौ च पक्षौद्वौ युगभेदाश्च वत्सराः।

त्रुट्यादयःकालभेदाश्चक्रधारानुनिस्थिताः।

ध्रुवस्थितो नाभिमध्ये प्रवरायेतु राशयः।

प्रसव्येनग्रहास्सर्वे चरंति गतिरीदृशी।

कुलालचक्रमध्यस्थ मृत्पिण्डसदृशो ध्रुवः।

भ्रमंति परितस्सर्वे ध्रुवंज्योतिर्गणास्सदा।

आदित्यध्रुवयोर्मध्ये देशस्स्वर्ग समाह्वयः।

वसंति तस्मिन् गीर्वाणा विमानेषु पृथक् पृथक्।

असंख्याता नित्यतृप्ताः ज्योतिर्मयवपुर्धराः।115

तेषां गंगाजलं सेव्यं पुष्पाणि सुरभूरुहम्।

वनानि चिंतामणयः स्त्रियश्चाप्सरसस्स्मृतः।

लोकोयंक्रतुभिस्साध्यो यत्र राजा शतक्रतुः।

उपेन्द्रमूर्तिर्भगवानासीनस्तत्र सर्वदा।

रक्षति स्वर्गनिलयान् देवादीन् स्वेनतेजसा।

भूर्भुवस्त्रयोलोका लक्षाःपंचदशस्मृताः।

तत्र भागवतावासं नेच्छंति मनसापि च।

येषां वैकुण्ठपादाब्जरति रस्त्यनपायिनी।

न ते स्वर्गसुखं भौमं ब्राह्म्यं वांछंति कर्हिचित्।

ततः परं महर्लोकः कोटियोजनयामतः।120

सनंदनाद्यामुनयो निवसंति च कोटिशः।

ततःपरो जनोलोकः पुरस्ताद्विगुणायतः।

ततःपरम्ह्यष्टकोटी योजनं तु तपस्स्मृतम्।

कोटित्रयायतं तस्मादूर्ध्वं धातुःपुरं स्थितम्।

तद्ब्रह्मलोकं मुनयो घृणंति कमलासन।

लक्षयोजन विस्तीर्णं शालाप्रासादसंकुलम्।

उत्तरेणबृह्मलोकं लक्षापंचदशस्मृतः।

तत्र सत्यमितिख्यातो विष्णुलोको निरामयः।

पंचचत्वारिंशत्कोटियोजनाःपरिकीर्तितः।

सर्वात्मभगवानूर्ध्वम् पंचपंचदशस्थितः।125

परमेष्टी स भगवान् प्रपञ्चे विष्णुतुष्टये।

अद्यस्ते भगवान्नित्यं शंखचक्रगदाधरः।

पंचशक्तिमयो विष्णुः कोटियोजनसम्मिते।

आस्ते श्रीभूमिसहितो वैनतेयेन सेवितः।

अंडभित्तिरुपर्यस्य स्थिता कोट्यर्धयोजने।

एष तेह्यूर्ध्वलोकानां निवासःकथितो मया।

एतदावरणोभूतमण्डं विद्धिहिरण्मयम्।

एतानांडकटाहेन लोकास्सर्वे समावृताः।

उपर्युपर्यमीलोकाः कपित्थफलवत्स्थिताः।

तद्दशोत्तरसंख्येन वारिणापरिवेष्टितम्।130

आवृत्याण्ड यतावारि स्थितंतद्ववत्तदग्निना।

स वायुना तद्वदेव वायुश्च नभसावृतः।

सर्वंदशोत्तरं विद्या तद्योम महतावृतम्।

महांश्चाद्यप्रधानेन प्रधानं तमसावृतम्।

तदनंतं तमसस्तस्य संख्यानं नैवविद्यते।

हेतुभूतमशेषस्य तमसःप्रकृतिःपरा।

अण्डानामीदृशानां च सहस्राण्ययुतानि च।

बहुनावा किमुक्तेन संख्या वक्तुं नशक्यते।

अण्डानि तानिसर्वाणि व्याप्यनारायणस्थितः।

अतश्च तेषां भगवान् सर्वाधारः परःपुमान्।135

बहिश्च साक्षीवत्सर्वमीक्षमाणोवतिष्ठते।

महतस्तमसो बृह्मन् द्युलोका बहुयोजनाः।

चत्वारः क्रमशस्संति चतुर्भिस्समदृष्टिताः।

व्यूहैः क्रमेण लक्ष्यास्ते ह्वनिरुद्धोऽपरोमतः।

प्रद्युम्नोऽनंतरं तस्य संकर्षण समाह्वयः।

वासुदेवस्ततःपश्चाद्व्यूहाख्यःकमलासन।

विभवाख्यो वासुदेवः तदनंतरमीरितः।

अनाधिर्वासुदेवश्च स्वस्वलोके प्रतिष्ठितः।

ततो नारायणस्यापि लोकस्तन् निकटे स्थितः।

एकैकस्यान्तरंकोटि योजनानामुदीरितम्।140

तावानेवच विस्तार स्तेषामति मनोहरः।

तेभ्यो बहिस्थितोलोको यत्रास्ते भगवानजः।

आधारभूतस्सर्वेषामनादिःपुरुषोत्तमः।

शेषभोगासनेदिव्ये श्रीभूम्यांसहितस्थितः।

यो व्याप्ताभिस्तथाऽष्टाभिः शक्तिभिःपरिवारितः।

वालव्यजन हस्ताभिः सेवमानाभिरंतिके।

सेनेशाद्यैःपारिषदैः चण्डाद्यैरायुधैरपि।

प्रणमद्भिस्सेव्यमानः सामीप्ये परितस्थितैः।

मुक्तैश्च पंचकालज्ञैः सिद्धैःकिंकरतांगतैः।

उपास्यमानस्सततं द्वादशाक्षरचिंतकैः।145

अष्टाङ्गयोगसंसिद्धैर् बहुभिर्भगवन्मयैः।

मन्त्रद्वयानुसंधानपरैर् भागवतोत्तमैः।

तापादिकृतसंस्कारैर्यः पूर्वं पर्युपासितः।

सर्वलोकावधिश्शेषी भगवान् सद्गुणादयः।

वैकुण्ठाख्यो हि मे लोको नित्योयम् कमलासन।

कथितःकृपया तुभ्यं त्रिगुणात्परतःपरः।

एष सर्वावधिश्शेषी भगवान् सद्गुणालयः।

सच्चिदानंदरूपोसौ सर्वकारणकारणम्।

भक्त्यापरमया ग्राह्यो दीनानां परिपालकः।

यद्गत्वा न निवर्तंते तद्ब्रह्मो परमंपदम्।150

इति ते कथितं धातः स्थानं यद्विविदं स्मृतम्।

प्राकृताऽप्राकृता नाम किं भूयः श्रोतुमिच्छसि।151

इति श्रीबृहद्ब्रह्मसंहितायां द्वितीयपादे लोकनिरूपणं

नाम सप्तमोऽध्यायः।

# द्वितीयपाद समाप्तः

************************************************************

श्रीः

श्रीमतेरामानुजाय नमः

# त्रितीय भागे प्रथमोऽध्यायः।

## <u>गोलोक वर्णनम्</u>

बृह्मोवाच-

उपासकानां यदिदंनिरूपितं स्थानं त्वयाऽप्राकृतमेकमव्ययम्।

कथं तदेतत्पुरुषःप्रयाति सर्वं समाख्या हि रहस्यमेतत्।

मध्येकृतनिवासाये स्थानानि च सरांसि च।

वनानि पुरुषाः के वा नद्यस्तत्र भवंति च।

व्यूहस्थानं च विभवस्थानमायतनानि च।

भोगं च नित्यमुक्तानां देव विस्तरतो वद।

श्री नारायण उवाच-

लोकाश्चतुर्दशप्रोक्ता मया ते कमलोद्भव।

अधस्सप्तसमाख्याता ऊर्ध्वं सप्तप्रकीर्तिताः।

उक्तास्सावरणा स्सर्वे नाशशीला भवंति ते।5

बृह्मणोंतेविलीयंते लोकाये च चतुर्दश।

प्राकृतास्ते समाख्याता लीलारूपा रमापतेः।

कालेनैव विलीयंते कालेनैव भवंति हि।

आद्यंतयास्त्वमेवैषां हेतुभूतः प्रजापते।

त्वया सह भवंतीह लयं यांति त्वया सह।

'लोकास्तु प्रकृतौयांति त्वंतु मय्येव मत्परः।

दृश्यमानमिदं सर्वमनित्यमितिचोच्यते।

प्राकृतं कार्यभूतं हि मदनन्यत्रयास्थितम्।

अहमात्मा च सर्वेषां माधारः पुरुषःपरः।

क्रीडार्थं देवदेवेश मयैव प्रकटीकृतम्।10

लोकैश्चतुर्भिः दशभिःसागरैर्दीपसंयुतैः।

भूतैश्चतुर्भिः दशभिःभूधरैश्च महोत्सवैः।

परिपूर्णमिदंरम्यमण्डं प्रकृतिसंभवम्।

दशोत्तरैरावरणैः पुष्टं वस्त्रपुटैरिव।

योजनानां षष्टिकोटिमुन्नतं विस्तरेण तु।

पंचाशत्कोटिगुणितं प्राकृतंत्वण्डमेव च।

एतदण्डकटाहेन तिर्यगूर्ध्वमधःक्रमात्।

कृष्टेसस्यं यथाबीजं सर्वतो वै समावृतम्।

यथा कपित्थंबीजानि समाकृष्यावतिष्ठ्ते।

तथाऽण्डमेतदाधारं चेतनाचेतनानि हि।15

कोटियोजनमानेन पृथिव्यावरणं स्मृतम्।

दशकोटिप्रमाणेन जलावरणमुच्यते।

शतकोटिप्रमाणेन वह्नेरावरणं स्मृतस्म्।

सहस्त्रकोटिमानेन वायोरावरणं विधे!।

दशसाहस्त्रकोट्योक्तमाकाशावरणं महत्।

लक्षेणाऽहंकृतेस्तात! दशलक्षंमहत्स्मृतम्।

प्रकृत्यावरणं यत्तदनंतं हि तदुच्यते।

प्रकृत्यावरणांतानि दह्यंते कालवह्निना।

अण्डावरणभूतानि प्रकृतौ लयमाप्नुयुः।

सा सर्वजगदाधारा प्राकृतिर्मत्समाश्रया।20

तया जगत्सर्गलयौ करोमि कमलासन।

क्रीडार्थं त्रिगुणादैवी मय्यैवोद्भाविता पुरा।

“दैवीह्येषागुणमयी मममायादुरत्यया।

मामेव ये प्रपद्यंते मायामेतां तरन्ति ते।”

इयं भागवती माया कारणे सत्स्वरूपिणी।

गुणत्रयवतीनित्या नित्यानंतगुणाश्रया।

अव्यक्ता शाश्वती सर्वबीजभूता प्रतिष्ठिता।

कार्यानुमेया प्रकृति श्चिच्छरीरतया मता।

स्वाश्रयव्यतिरेकेण स्थातुंगंतुमुनीश्वरा।

तच्छरीरतयानैव तदायत्तगुणक्रिया।25

तथैवांकुरवदात्मास्थ मेतद्युक्तमलक्षिता।

अवस्थान्तरमापन्ना नैवभाति न चापरा।

व्यक्तामायाकार्यरूपा नैकरूपा प्रजापते।

सर्वदानैकरूपेयं परिणाम स्वभावतः।

अनित्याह्यसतीमिथ्या वस्तुभूतापि दुर्ग्रहा।

दुस्तरादुष्प्रदर्षा च दुरुडादुर्विचेष्टिता।

मद्धार्या मत्तनूरेषा न मत्तोऽन्यामनगपि।

भिन्नोऽहमेव देवेश निरपेक्षो निराश्रयः।

मदनन्या महभाग! कार्यकारणोरियम्।

चेतनःपुरुषश्चान्यो मच्छरीरतया मतः।30

सच्चिदानंदरूपोयं न मे भोदमनागपि।

भोक्ता निरंजनो माया गुणहीनोऽक्षरःपरः।

परिणामकृताकार नामरूपविवर्जितः।

निर्विकारोगुणैर्व्याप्तो मद्वाच्यो मन्निकेतनः।

अजोऽव्ययोऽच्युतोसाक्षी प्रकृत्यात्मसुखात्मकः।

एकरूपोनित्यवस्तु परमार्थसदात्मकः।

मायापरतरोमायी मच्छेषो मद्गतिस्स्मृतः।

मद्भोक्ता मत्परोनित्यो मदनन्यस्थितिर्मतः।

माया यवनिकाच्छन्नो मायाऽहंकारितो यदा।

माया भोक्ताशरैर्विद्धो मायागतिनिरीश्वरः ।35

आबृह्मभूतस्त्रिगुणो मलिनो दुःखभाजनः।

जीवोयं मत्स्वरूपो हि  संसारेह्यवसीदति।

बृह्मात्मकमिदम्सर्वं चिदचिन्मिश्रितम् जगत्।

विज्ञायात्मनि मय्येव कृतभावस्तु यःपुमान्।

अविद्यातिमिरंतीत्वान् मद्भावमुपलभ्य च।

मामुपैति महाभाग! मदेक शरणागतः।

स एतां त्रिगुणांमायामर्चिरादि गतिंगतः।

भित्वा सकार्यांमतिमान् याति सत्वगुणास्पदम्।

नित्यमप्राकृतंधाम स्वप्रकाशमनामयम्।

भक्त्यैकलभ्यममलं कालप्रळयवर्जितम्।40

न तद्भासयते सूर्यो न शशांको न पावकः।

यद्गत्वा न निवर्तंते तद्धाम परमं मम।

मायिकं यन्मयाप्रोक्तं निबिड ध्वांतसंकुलम्।

तस्योर्ध्वभागे विरजा निस्सीमाविद्यते नदी।

साचावरणभूता हि विश्वस्यपरतो विधे!।

प्रधानपरमव्योम्ना रंतरे विरजानदी।

वेदांगस्वेदजनिततोयैः प्रस्त्राविता शुभा।

तस्यास्तीरेपरेव्योम त्रिपाद्भूतं सनातनम्।

अमृतंशाश्वतं नित्यमनन्तं परमं पदम्।

शुद्धसत्वमयं दिव्य मनंतं ब्रह्मणः पदम्।45

अनेककोटिसूर्याग्नि तुल्यवर्चसमव्ययम्।

सर्ववेदमयंशुद्धं सर्वप्रलयवर्जितम्।

असंख्येयमजरंनित्यं जाग्रत्स्वप्न विवर्जितम्।

हिरण्मयम् मोक्षपदम् बृह्मानंद सुखाह्वयम्।

समानाधिख्यरहित माद्यन्तरहितं शुभम्।

एवमादिगुणोपेतं तद्विष्णोःपरमंपदम्।

व्यूहलोकात्परतरो विभवाख्यस्तु यस्स्मृतः।

वासुदेवोमहाभाग! तस्यलोकं वदामि ते।

अयोध्याख्यापुरीचैका द्वितीया मथुरास्स्मृता।

मत्स्यादीनां तथा पुर्यः परितस्संप्रकीर्तिताः।50

तत्राऽयोध्यापुरीरम्या यत्र नारायणो हरिः।

रामरूपेणरमते सीतयापरया सह।

मणिकांचन चित्राड्या प्राकारैस्तोरणैस्स्मृता।

चतुर्द्वारसमायुक्ता तुङ्गगोपुर संयुता।

चण्डादिद्वारपालैस्तु कुमुदाद्यैस्सुरक्षिता।

नित्यमुक्तजनोपेता नित्योत्सवमनोहरा।

चण्डप्रचण्डौ प्राग्द्वारे याम्ये भद्रसुभद्रकौ।

वारुण्यां जयविजयौ सौम्ये धातृविधातृकौ।

कुमुदःकुमुदाक्षश्च पुण्डरीकोऽथवामनः।

शंकुकर्णस्सर्वनेत्रः सुमुखस्सुप्रतिष्ठितः।

एते दिक्पतयःप्रोक्ताः पूर्वास्याश्चतुर्मुख।55

कोटिवैश्वानरःप्राख्य गृहपङ्क्तिभिरावृतम्।

आरूड यौवनैर्नित्यैः दिव्यनारी नरैर्युतम्।

अंतःपुरं तु देवस्य मध्येपुर्यां मनोहरं।

मणिप्राकारसंयुक्तं वरतोरणशोभितम्।

विमानैर्गृहमुख्यैश्च प्रासादैर्बहुभिर्वृतम्।

दिव्याप्सरोगणैस्त्रीभिः सर्वतस्समलंकृतम्।

मध्ये तु मण्डपंदिव्यं राजस्थानं महोत्सवम्।

माणिख्यस्तम्भसाहस्त्र जुष्टं रत्नमयं शुभम्।

धर्मादिदैवतैर्नित्यैः वृतं वेदमयात्मकैः।60

अधर्माज्ञानवैराग्यानैश्वर्यैः पादविग्रहैः।

ऋग्यजुस्सामाथर्वाख्यरूपैर् नित्यैर्वृतं क्रमात्।

शक्तिराधारशक्तिश्च चिच्छक्तिश्च सदाशिवा।

धर्मादि देवतानां च शक्तयःपरिकीर्तिताः।

वसंति मध्यगास्तत्र वह्निसूर्यसुधांशवः।

कूर्मश्च नागराजश्च वैनतेयस्त्रयीश्वरः।

छंदांसि सर्वमन्त्राश्च पीठरूपत्वमास्थिताः।

सर्वाक्षरमयंदिव्यं योगपीठमितिस्मृतम्।

तन्मध्येऽष्टदळंपद्ममुद्यार्क समप्रभम्।

तन्मध्येकर्णिकायां तु सावित्र्यां शुभदर्शनः।65

ईश्वर्यासह देवेश तत्रासीनःपरःपुमान्।

इंदीवरदळश्यामः कोटिसूर्यप्रकाशकः।

युवाकुमारस्स्निग्धाङ्गः कोमलाऽवयवैर्वृतः।

फुल्लरक्तांबुजनिभ कोमळाङ्घ्रिसरोजवान्।

प्रबुद्धपुण्डरीकाक्षः सुभ्रूवल्लियुगांकितः।

सुनासस्सुकपोलाढ्य स्सुशोभमुखपंकजः।

मुक्ताफलापदन्ताढ्य सुस्मिताधरविद्रुमः।

परिपूर्णेंदुसंकाश सुस्मितानन पंकजः।

तरुणादित्यवर्णाभ्यां कुण्डलाभ्यां विराजितः।

सुस्निग्धनीलकुटिलकुंतळैरुप शोभितः।70

मन्दारपारिजातादि कबरीकृत केशवान्।

प्रातरुद्यत्सहस्रांशुनिभ कौस्तुभ शोभितः।

हारस्वर्णस्रगासक्त कंबुग्रीव विराजितः।

सिह्मस्कंधनिभैःप्रोच्छैः पीनैरंसैर्विराजितः।

पीनवृत्तायतभुजै श्चतुर्भिरुपशोभितः।

अंगुळीयैश्चकटकैः केयूरैरुपशोभितः।

बालार्ककोटिसंकाशैः कौस्तुभाद्यैस्सुभूषणैः।

विराजित महावक्षा वनमाला विभूषितः।

विधातुर्जननस्थान नाभीपंकजशोभितः।

बालातपनिभश्लक्ष्ण पीतवस्त्र समन्वितः 75

नानारत्नविचित्राभ्यां कटकाभ्यां विराजितः।

सज्योत्स्न चंद्रप्रतिम नखपङ्क्तिभिरावृतः।

कोटिकन्दर्प्रलावण्य सौंदर्यनिधिरच्युतः।

दिव्यचंदनलिप्तांगो दिव्यमालाविभूषितः।

<u>चतुर्भुजराम ध्यानम्(भद्राचलम्)</u>

**गृहीत शंखचक्राभ्यामुद्बाहुभ्यां विराजितः।

कोदण्डबाहु हस्ताभ्या मितराभ्यां तथैव च।

वामांके जानकीदेवी  किशोरीकनकोज्ज्वला।

कैवल्यरूपिणी नित्या नित्यानंदैक विग्रहा।

सर्वलक्षणसंपन्ना यौवनारंब विग्रहा।

रत्नकुण्डलसंस्निग्ध नीलकुंचित शीर्षजा।80

ज्ञप्तिमात्रात्मकानंदा सर्वैश्वर्य रसोत्सवा।

अर्धमात्रात्मिका नित्या च ओंकाराक्षरसंभवा।

सर्वशक्तिमयीरम्या सर्वेषां शक्तिदायिनी।

जननीसर्वभूतानां योगिनामपि मोहिनी।

सेयं सीताभगवती ज्ञानानंदस्वरूपिणी।

योगिनां रमणेरामे रमतेरामवल्लभा।**

रामाविर्भावसमये ह्याविर्भवति सर्वदा।

निष्प्रपंचे निष्प्रपंचा निरीहात्मगुणक्रिया।

आदिभूतामहालक्ष्मी सीता तु विभवे मता।

आविर्भावेक्षितौजाता जानकी दिव्यरूपिणी।85

यातुधानक्षयकरी पातिव्रत्य परायणा।

पालिनी सर्वसत्वानां धर्मस्थापनकारिणी।

संहारे समनुप्राप्ते तामसीशक्ति रुत्तमा।

महाकाळीकरळास्या कल्पांतक्षयकारिणी।

पूर्णरूपेण साकेते नित्यलीलारसोत्सुका।

मयारामेण रमते क्षणविच्छेदकातरा।

साकेतनगरद्वार सरयूकेळिकारिणी।

कोटिगन्धर्वकन्याभिराशीभिर् भातिभामिनी।

इयमेव नदीविष्णोः परमप्रीतिदायिनी।

भूमौभाति सुषुम्नेति वैकुण्ठपद दायिनी।90

कृतावतारः श्रीरामो ह्यनया केळिभूतया।

नेष्याम्ययोध्यामखिला मनायासेन मत्पदम्।

तत्र संतानकंनामवनंदिव्यं ममप्रियम्।

यत्र सीताभिधालक्ष्मीः वितनोति महोत्सवम्।

अंतःपुरे तु देवस्य रामलीलानुभाविनः।

दिव्याःपारिषदाः संति सुग्रीवाद्या महाबलाः।

दिव्यांबरधरास्सौंय दिव्याभरणभूषिताः।

दिव्यगंदानुलिप्तांगाः दिव्यमाल्या विभूषिताः।

यज्ञसूत्रगुणोपेताः लसन्मौळिकिरीटिनः।

सिह्मासने समासीना ललनायुत सेविताः।95

<u>श्रीराम परिवार कल्पनं-</u>

**गदेषुचापशैलाग्र तरुहस्ताव्यवस्थिताः।

सुग्रीवराक्षसाधीशांगदमारुत नंदनाः।

“पूर्वद्वारे तु सुग्रीवो दक्षिणे पवनात्मजः।

पश्चिमे राक्षसाधीशो वालिपुत्रस्तथोत्तरे।

हनुमान् गरुडश्चोभौ निशामय वदामितौ।

गरुडो विनतायां च ह्याविर्भवति भूतले।

निशामयमहाभाग गरुडं तत्वमुत्तमम्।

अप्राकृतोयंपुरुषो नित्याप्राकृत देहधृत्।

गरुडःपक्षिणामिंद्रो वाहको बलिनां वरः।

वासुदेवादिमूर्तिभ्यां छंदोमूर्तिरजायत।100

चतुर्णामंशभूतोयं विहंगेशस्सनातनः।

अंशेन विनतायां वै संभवोऽस्य युगेयुगे।

तथा किंपुरुषोयं वै हनुमान्नामतो बली।

महाशंबुरितिख्यातो रामरूपमुपाश्रितः।

संकर्षणसमुद्भूतो महाशंबुश्च शाश्वतः।

अंशो भगवतस्साक्षात् च्छुद्धसत्ववपुर्धरः।

श्रीराममन्त्रतत्वज्ञः श्रीरामानुचरोबली।

नित्यो महाविभूतस्थ ऐशान्यांदिशि संस्थितः।

मामनन्यतयाबृह्मन् नुपास्ते प्रेमलंपटः।

महानंदैकभुक् श्रीमान् महाशक्ति समाश्रयः।105

स एव शिवरूपेण शंतनोति चतुर्मुख।

अनन्योपासनंलोके सात्विकं प्रतिपादयन्।

श्रीविष्णुपार्षद्परो विष्णुवेषधरोऽव्ययः।

चतुर्भुजो महोत्साहो महादेवो महेश्वरः।

सचात्मानं द्विधाकृत्वा प्राकृतेऽप्राकृतेस्थितः।

रुद्ररूपेण संजातो बृह्मणो बृकुटीतटात्।

सचैकादशधात्मानं व्यतनोद्धीमदर्शनः।

त्र्यक्षःकल्पांतकर्तायं तामसस्तामसप्रियः।

आज्ञया वासुदेवस्य महाशंबुर्हरिप्रियः।

रौद्रंरूपं समास्थाय विश्वहा समपद्यत।110

रुद्र एव पुनःप्रोक्तो विष्णुना प्रभविष्णुना।

पाषण्डशास्त्रंव्यतनो मध्यमांसप्रशंसकम्।

शैवं शाक्तं पाशुपतं डावरोड्डीशशाबरम्।

नानादेव प्रधानं च मत्तो वैमुख्यकारणम्।

भूयःशम्बुर्हरेःप्रीत्यैः वानरं रूपमुद्वहन्।

रामलोके दक्षिणस्यां दिशिवीरो विराजते।

काकुत्स्थोराघवोजातो रामोराजीवलोचनः।

“अंजनीगर्भसंभूत आंजनेयो बभूव सः।

महाभागवतो वीरो हेलोल्लंघित वारिधिः।

आजन्म ब्रह्मचारी च जानकी प्रीतिभावनः।115

सीतादत्तमहाहारा शोभितं स महाभुजः।

श्रीरामवाहकः श्रीमान् प्रपन्नाकांक्षितःप्रदः।

सत्यसंधो महासत्वो लंकाप्रासाद भंजनः।

जानकीजीवनो जेता मौंजी यज्ञोपवीतवान्।

वीराधिवीर दोर्दण्ड खण्डिताराति मण्डलः।

चीत्कारगर्भसंहारी कौपीनंद्दतवान् शिखी।

एवम् स्वपार्षदैर्युक्तो नित्यमुक्तैर्विराजते।

लक्ष्मीनारायणस्साक्षात् भक्तानुग्रहकाम्यया।

साकेतपश्चिमे भागे **गोलोकाख्ये** मनोरमे।

महाकल्पतरूद्यान मथुरेति पुरीमता।120

कोटियोजनविस्तीर्णा नित्योत्सव समाकुला।

बृन्दावनं गोकुलं च तत्पार्श्वे चतुरानन।

ऊर्ध्वं तु सर्वलोकेभ्यो गोलोके प्रकृतेः परे।

वाङ्मनोगोचरातीतं ज्योतिरूपं सनातनम्।

नित्यं गुणमहोत्साहं नित्योत्सवगुणान्वितम्।

सौभाग्यनिलयंकान्तम् आनंदकरमंदिरम्।

नित्यानंदमयं रम्यं गुणोत्पत्ति महोदयम्।

सर्वर्तुगुणसंयुक्तं प्रमदागणसेवितम्।

पुण्यद्विजसमाजुष्टं जुष्टं च परमर्षिभिः।

सरितांजलकल्लोल विलोल नळिनीकुलम्। 125

तुळसीकुंजसौभाग्य नितांतवनमोहितम्।

वासंतीचंपकाशोक पारिजातमहोदयम्।

मालतीयूधिकांबोज कुंदमंदारसेवितम्।

केतकीमल्लिकाहासं कदंबवनमण्डितम्।

दिव्यरत्नसमाकीर्णं हरिवंशसुरक्षकम्।

विमानावळिभिर्व्याप्तं नित्यक्रीडारसाश्रयम्।

तत्र बृन्दावनं नाम युतंकामदुघैर्द्रुमैः।

द्वात्रिंशद्वनराजीभिः परितं रसनिर्झरम्।

तत्र रत्नमयीभूमिः दिव्यकांचनवेदिका।

कर्पूरवालुकोपेत पुळिनाच्छ नदीवहम्। 130

साकेतात् पश्चिमे तत्र पुरं माथुरसंज्ञितम्।

योषिद्रत्नमणिस्तंब प्रासादायतसेवितम्।

दिव्यचामरसंयुक्तं मुक्तादामविलंबितम्।

चंद्रातपघनच्छायं हेमकुंबपुरस्कृतम्।

आबद्धबालद्युमणि द्युतिरश्मिवितानकं।

पताकातोरणैरम्यं सुधाधारघनाचलम्।

गोवर्धनगिरिज्योतिर् विद्योदित नभस्थलम्।

श्रृङ्गोद्यतविमानाग्र मृदंगमधुरस्वरम्।

यत्र गोवर्धनोनाम शैलः परमपावनः।

निर्मितो  गोपरूपेण केळयेकलयात्मनः।135

नीलवैडूर्यखचितोल्लसत्कांचन वेदिकः।

तुङ्गश्रृङ्गाग्रविलसत् स्वच्छस्फटिककुट्टिमः।

सर्वतोनिपतद्दिव्यसुधाशीकर निर्झरः।

रत्नसंबद्धकासार फुल्लांभोजवनस्थलः।

पारिजात तदिव्याप्त सुगंधाऽनिलसेवितः।

दिव्यदेवांगनागीत मुखरीकृतकंदरः।

गळत्कुसुममध्यस्थ मधुसंतान निर्झरः।

मिळिंद्ललितोद्गीत तिरोहित विपंचिकः।

शुककोकिलदात्यूह निर्ह्लादाह्लदकारकः।

स्वच्छांगणमणिव्रात बद्धश्रृंगाटकेषु च।140

दिव्यचंद्रकराक्षिप्त कोटिनक्षत्रवैभवः।

लीलानिकेतसौधाग्र चंद्रकोटि मरीचिभिः।

सुधांबुनिर्झरोद्भूत कासारविपुलोदरः।

मंदारकुंजकुहर विनिर्मित निकेतनः।

तुळसीकाननामोदविमोहित वधूजनः।

श्रीकृष्णवदनांबोज स्मितचंद्रकशीतळः।

गोपिकाचरणांबोज नखचंद्रचमत्कृतः।

उत्पतत्कामिनीरम्य नृत्यमण्डलमण्डितः।

कोटिदिव्यांगणापूर्व कलकण्ठस्वरोद्गमः।

केळिपद्मांगणाबद्ध मणिगर्तेषु सर्वतः।145

जलयंत्रोच्चलद्वारी निपात परमोत्सवः।

केळिनिर्मित नीलाभ्र वितानपटचंचलः।

सुधाशीकरसंसिक्त चंद्रस्वच्छोद भूतलः।

शिलातलसमाविष्ठ मृगनाभिसुवासितः।

सुंदरीचरणासक्त कौतुकोद्रेखसंयुतः।

आदित्यकासुगोबृंद शतपङ्क्तिविराजितः।

हारिण्मणिमयूखाभ दूर्वाकाण्डप्ररोहितः।

कैवल्यवाहिनी यत्र काळिंदीविमलोदका।

सुवर्णपंकजोद्भूत परागपटपिंजरा।



www.kriyasagaram.in

तटरत्नमयूखैश्च स्पृशंती गिरिकेतनम्।150

दैवीर्नीराजयंतीव वीजयंतीव चामरैः।

तीरसारसनिर्ह्रादैः भोदयंतीव गोपतिम्।

गोवर्धनशिखासद्म संसुप्तवनमालिनम्।

निशंयगीतममलं समुत्थित जलेच्छया।

आदर्शमिवचात्मानं दर्शयंती रमापतिम्।

वेणुनादमृतोन्मत्त मयूरनटनोदया।

दर्शयंतीवचात्मानं प्रेमसंवर्तितोत्सवम्।

तत्र रासस्थलं रम्यं कोटिचंद्रसुशीतळम्।

यत्र बृंदाभिधाशक्तिरास्ते श्रीकृष्णवल्लभा।

प्रेमभक्तिसमाख्याता बृंदातल्लोकपालिका।155

भक्तिमंतोऽभिगच्छंती काननं कामितप्रदम्।

एवं गोलोकसौभाग्यं वर्णितुं कः क्षमोजनः।

यत्राहं प्रियया‌साकं रमेरसमय स्सदा।

श्रीबृह्मोवाच-

भगवन्नरविंदाक्ष वैकुण्ठपुर मण्डन!।

गोलोकाख्यमिदं नाम नित्यलीलालयं स्मृतम्।

कस्माद्रूपं पृथक् कृत्य स्थितमत्रजनार्दन।

केनरूपेणभवता का लीलाऽत्र वदस्व मे।

श्री भगवानुवाच-

वैकुण्ठारव्यंपरंस्थानमुक्तं यत्प्राकृतेःपरम्।

पंचोपनिषदालीड मवाङ्मनसगोचरं।

सत्वद्रव्यमयं सर्वं मयाकृतमनामयम्।160

तारतम्यं नचैवात्र सर्वं ब्रह्मात्मकंस्मृतम्।

कालक्रियातिरिक्तं तत्सर्वमानंदमंदिरम्।

नित्यमुक्तजनैर्जुष्टं मत्कृपापांग वीक्षितैः,

मल्लीलासुकृतं तत्र तारतंयं तथापि हि।

लीलायास्तारतम्येन प्रीत्यातिशयितो मया।

गोलोकोयं मयाक्लृप्तो रासलीलाबुभुक्षया।

तत्तेहं संप्रवक्ष्यामि श्रृणुचैकमना विधे।

सर्वावधितयास्थान मपारममलप्रभम्।

महावैकुण्ठनिलयं यत्र श्रीरङ्गमंदिरं।

यतोनावर्तते भूयो गन्तव्यं नाति तत्परम्।165

अन्येषां तत्र गन्तव्यमाश्रितानां ततो जगुः।

बृह्मन्! वैकुण्ठमध्ये च बाह्याभ्यंतरभूतयः।

विभवव्यूहलोकाश्च शुद्धसत्वैकरूपिताः।

एवंचाप्राकृते लोकादावैकुण्ठनिकेतनात्।

अवांतरविभागैश्च वैकुण्ठ इति चोच्यते।

विगतज्ञानवैकुण्ठ शुद्धसत्व निकेतनात्।

आहुर्वैकुण्ठनिलयं साक्षाद्ब्रह्मैव पद्मज।

गोलोकाख्यस्यदेशस्य प्रवृत्तिं प्रवदाम्यहम्।

यतोऽस्य संस्थितिर्भिन्ना परव्योम्नि महामते।

ज्ञानानंदस्वरूपोयं शक्तिर्या परमा रमा।170

सासूते द्वे महाशक्ति नित्ये मे सुखदित्सया।

यद्यप्येते मयैवास्थां तथाप्येतां रमासखे।

रमालीलाविनोदार्थं तदधीनतयास्थिते।

तत्रैकाधारशक्तिर्हि लीलाख्या द्वितीया मम।

प्राकृताप्राकृतं सर्व मुभाभ्यामेव रक्षितम्।

प्रकृतिर्महदादीनां धारणात्साधरास्स्मृता।

आकूर्माद्यखिलंविश्वं दत्ते सादृश्यरूपिणी।

एवंमद्रोमकूपेषु यावत्यण्डानि पद्मज।

तानंत्येका ततो देवी शक्तिराधार लक्षणा।

दत्तेतेनैवरूपेण यथाहं पुरुषोत्तमः।175

कूर्ममण्डूक शेषादीनभि व्याप्यविराजते।



www.kriyasagaram.in

तस्योपरि पुनस्सैव पद्मिनी पत्रवज्जले।

आभाति धरणीदेवी सशैलवनकानना।

सा मयाक्रोडरूपेण विद्दता दशनांतरैः।

सा द्वितीयावतारेण दत्ते विश्वम् रमाज्ञया।

गोरूपा साभवन् देवी यथा वृत्तिर्नृणामभूत्।

देहादिधारणं पुम्सां जायते येन सुव्रत।

एवं प्रज्ञां च मेधां च यजनं सत्वसंस्थितिम्।

क्षीरेण या वितनुते वृष्टिं पुष्टिं प्रजामृतम्।

महोक्षरूपैस्संतानैः प्रजानां कर्षणेन च।180

कृषिं प्रयच्छति बृह्मन्! ययाऽन्नानि भवंति हि।

अन्नं हि प्राणिनांप्राणो ह्यन्नाद्वीर्यं प्रजायते।

वीर्यप्रजननं तस्मादन्नं पृथ्वीं श्रुतिर्जगौ।

एवं वृत्तिप्रजानेन प्रकृतिर्गुणयोगतः।

प्रयच्छतित्वथः स्थानं संसाराख्यं सुदुस्तरम्।

एवं तया महादेव्या प्राकृतं सकलं जगत्।

धृतं सर्वप्रकारेण जीवानां कर्मभुक्तये।

तथैव कर्महीनानां नित्यमुक्तात्मनां मम।

मच्छुद्धसत्व संविष्टा धत्तेचाप्राकृतं जगत्।

आत्मनःपदमारभ्य ह्यनन्तं धाममामकम्।185

मितिहीनं ज्ञानरूपं सदानंदमहोज्ज्वलम्।

निरावरणकंशश्वत् कालातीतमगोचरम्।

लक्ष्मीलीलास्पदं सर्वं मयैव विधृतं सदा।

लीलाविष्टहृदादेवी कदाचिज्जलजेक्षणा।

धरयाविधृतं धृष्ट्वा धरां धृष्ट्वा च पार्श्वगाम्।

सोल्लासवदनं धृष्ट्वा कान्तस्य मम कामिनी।

मन्दंजहास रुचिरापाङ्गेन परमेश्वरी।

नित्यमाक्रीडितं नृत्य गानमानरसोदयैः।

आचकांक्षे रमादेवी रमणेन यदृच्छया।

वैकुण्ठलीला विच्छेदो दासानां यत्र संगमः।190

न भवेच्च यदा स्वैर लीलाभंगो न जायते।

कथं द्वयं भवेत्तत्र स्थलांतरमभीप्सति।

तदा विज्ञातसंकल्पो  देह्या विश्वकृदीश्वरः।

द्विधाकरवमात्मानं धरया च श्रिया सह।

धरा गोलोकरूपेण गोपीरूपेण सा प्रिया।

गोपरूपधरोहं वै गोविंद इति विश्रुतः।

गोवर्धनाभिदं रूपं द्वितीयं मे प्रकाशितम्।

धरापि द्विविधाजाता गोरूपा भूमिरूपिणी।

गावो भवन्त्यनंतास्तु कामदोहमनोरमाः।

दिशंति मणिरत्नानि मध्यदिष्ठतमं विधे।195

भक्ष्यभोज्यान्नपानादि क्षीरमत्यद्भुतं वसु।

यासांदुग्धाधनेनैव कायक्लेश न विद्यते।

जरामृत्यु भयोद्वेग तृष्णा ध्यानभवंति हि।

गोरूपेण धरादेवी गोवर्धनमुपाश्रिता।

प्रवर्तयंती पयसा नदीमानंदरूपिणीम्।

आस्वादयंति गोविंद मुरळीनाद सद्रसम्।

क्षरंति गाव आनंदसंदोहं क्षीररूपतः।

श्रीकृष्णवदनांबोज दत्तलोचन पङ्कजः।

गोवर्धनाद्रिकुंजेषु विचरंति सहस्रशः।

तत्र नीलांबुधश्यामो वल्लवीबृंदवेष्टितः।200

शिखिपिंछकृतापीडो नटवेषधरो हरिः।

वन्यपुष्पधरोधेनु पालको नीलकुंतलः।

किशोरःकेळिकलितः कदंबतरु संश्रयः।

चलच्चामीकराक्रांत पीतांबर विभूषितः।

स्थूलमुक्ताफलोदार हारभूषितकंदरः।

स्फुरत्कुण्डलरम्यास्यो हास्यमोहित मन्मथः।

दम्मिल्लमल्लिकामोद विभ्रान्तकनकालयः।

अप्राकृतनिशानाथ ज्योत्स्ना दौतनिशामुखे।

मंदारमण्डलेदिव्य रासभू वलयो मुदा।

गीयमानो गुणावासो गोपिकापरिरंबितः। 205

संगीतनिरतोनित्यं लास्यभेद विशारदः।

तत्रैका परमाशक्तिः गोपीरूपधरा रमा।

आत्मानमष्टधा कृत्वा रेमे गोपतिना सह।

ललिताद्याश्चतास्सख्य श्रीराधानुगता मताः।

योगपीठेमहास्थाने संस्थितास्स्वानुरूपतः।208 ½

इति श्री पांचरात्रे बृहद्ब्रह्मसंहितायां त्रितीय भागे

गोलोकवर्णनंनाम प्रथमोऽध्यायः।

## अथ द्वितीयोऽध्यायः

## ऊर्ध्वलोकवर्णनम्

श्री बृह्मोवाच-

देवदेवेश लक्ष्मीश गोलोकनिलयो हरेः।

गोविंदाख्यस्यदेवस्य योगपीठं वदस्व मे।

आत्मलीलाविनोदार्थं पृथक् कृत्य प्रकाशितम्।

गोपरूपं च ते देव श्वतं गोपिकया सह।

श्रीभगवानुवाच-

बृह्मन् न लौकिकंह्येतत् त्वया पृष्टं मम प्रियम्।

योगिनामपि दुर्लक्ष्यं शांतं मे परमं पदम्।

बृन्दावन विधानेन सोहमेव नचेतरत्।

यमुनातीर संशोभि फुल्लमंदारपादपैः।

सहस्त्रपत्रकमलाकारं माधुरमण्डलम्।

ममैवाविष्कृतं बृह्मन्! धरया कलया मम।5

ममैवाकाङ्क्षितं स्थानं श्वतिमृग्यं निरन्तरम्।

योगिभिर्मुनिबृंदैश्च सदा ध्यातं च मत्परैः।

दिव्याप्सरोभिर्गंधर्वैः नृत्यगीतविभूषितम्।

श्रीमद्बृन्दावनंरम्यं पूर्णानंदरसाश्रयम्।

भूमिश्चिंतामणिस्तोय ममृतंरसपूरितम्।

वृक्षास्सुरद्रुमास्तत्र सुरभीबृंदमण्डितम्।

सदाकिशोररूपैश्च तरुणीतरुणैर्युतम्।

मयांशैर्नित्यपुरुषैः लक्ष्म्यंशैः स्त्रीजनैर्वृतम्।

मंदानिलविविर्धूत पद्मरेणुतमोमयम्।

वसंतर्तुकृतोद्रेक विहङ्गकुल निस्वनम्। 10

अशोकंदुःखरहितं जरामरणवर्जितम्।

अक्रोधनममात्सर्यमभिन्नं निरहंकृतिम्।

गुणातीतं महद्धाम प्रेमभक्तिस्वरूपकम्।

बृन्दयाचावनं यस्मात् तस्माद्बृन्दावनं स्मृतम्।

गुह्याद्गुह्यतमंगूडं गोलोके तत्प्रतिष्ठितम्।

बाह्याभ्यंतरभेदेन भूमावपि पितामह!।

सहस्रदळपद्मस्य ज्ञेयमेतद्वराटकम्।

अक्षरंनित्यमानंद स्वरूपस्थानमुत्तमम्।

शुद्धसत्वेनहरिणा प्रविश्योत्तंभितं विधे।

तत्र गोविंदरूपेण स्वयंक्रीडतिराधया। 15

एवं बृन्दावनं विद्धि गोवर्धनसमन्वितम्।

तस्मिन् बृन्दावनेरण्ये मध्ये मत्पीठमुत्तमम्।

सप्तावरणकंस्थानं श्रुतिमृग्यं निरन्तरम्।

माणिक्यमण्डपं तत्र वितानध्वजमण्डितम्।

तन्मध्ये योगपीठे तु नानारत्नैर्विराजितम्।

तदष्टकोणनिर्माणं दर्पणाभमनोपमम्।

सहस्रस्तम्भसंबद्ध मणिकांतप्ररोहकम्।

मुक्ताच्छगुच्छविलसत् तोरणांताति सुंदरम्।

तस्योपरिस्थमाणिख्य मध्यसिह्मासनं महत्।

दळाष्टकं तु तत्रैव कर्णिकाकेसरोज्ज्वलम्।20

गोविंदस्यप्रियस्थानं किमन्यस्य महिमोच्यते।

श्रीकृष्णचरणांभोज सुखसंस्पर्शन क्षमम्।

तस्मिन् वीरासने बृह्मन् ! ध्येयं तेजोऽद्वयं परम्।

“गौरश्यामात्मकं नित्यं वेणुपंकजहस्तकम्।

शिखिपिंछकृतापीडं नीलपीतवटावृतम्।

मंदस्मितोज्ज्वलमुखं लोलताटंककुण्डलम्।

कुंचितालकवक्राब्जं कस्तूरी कुंकुमांचितम्।

नासाग्रविलसन्मुक्तं केशपाश कृतोत्सवम्।

संगोपित चतुर्बाहुं विकासित चतुष्टयम्।

अङ्गदाश्लिष्टवलये द्दीप्तमम्लानमालकम्।25

दाडिमीबीजदशनम् पक्वबिम्बफलाधरम्।

काश्मीर रंजितोरस्कं किंकिणीनिनदोत्सुकम्।

अंसार्पितभुजं चारु चरणालक्तकप्रभम्।

अभिन्नरूपमद्वैत तत्वमंबोजलोचनम्।

ज्ञानानंदैकनिलय मवाङ्मनस वैभवम्।



www.kriyasagaram.in

प्रेमसंसक्तहृदयम् प्रेमार्णवविनोदकम्।

प्रेमकल्पलताबीजं प्रेमपादपसत्फलम्।

*गौरं तु राधिकारूपं राध्या ते पुरुषोऽनया।

सर्वावस्थासु देवेश श्रियोरूपांतरम् हितत्।

यथा च चंद्रिकाचंद्रे प्रभाभानौ हुताशने।30

यता मधुरिमा नीरे स्पर्शनं मारुते यथा।

गंधः पृथिव्यामनघो राधिकेयं तथा हरौ।*

आश्रयः पुरुषः पूर्णो गोविंदो नित्ययौवनः।

कर्णिकायां स्मरेदेतत् गोपिकाकृष्णयोर्द्वयम्।

दळेषु ललिताद्याश्च शक्तयोऽष्टौ प्रकीर्तिताः।

सम्मुखे **ललितादेवी श्यामळा** पीतवाससा।

उत्तरे **श्रीमतीज्ञेया** त्वैशाने **श्रीहरिप्रिया**।

**विशाखा** च तथा पूर्वे **शैभ्या** चाग्नेयके मता।

**पद्मा** च दक्षिणे **भद्रा** नैऋते परिकीर्तिताः।

तत्पार्श्वदळ भूभागे पुनरष्टौ प्रकीर्तिताः।35

**चंद्रावळीचंद्ररेखा बृंदावनदसुंदरी।**

**श्रीप्रियाश्रीमधुमती शशिलेखा च कुंजरी।**

**सुमुखा** चक्रमद्दिक्षु विदिक्षु च यथा तथा।

षोडशःप्रकृतिश्रेष्ठाः प्रधानाःकृष्णवल्लभाः।

बृंदावनेश्वरी राधा तथा चंद्रावळिप्रिया।

अष्टौ तथा चतुष्षष्टीगणौ नित्या प्रकीर्तिताः।

मुक्तानां ये गुणाःप्रोक्ताः त्रिकोट्याःकमलोद्भव!।

आराधितःपरानंदो भगवान् गोकुलेश्वरः।

श्रुतयश्श्रीश पादाब्ज रसपान पिपासया।

सखीरूपत्वमापन्ना स्साधनाभ्यासयोगतः।40

विहरंति सदाविष्णोः रासलीलामहोत्सवे।

एवं च देवकन्यानां गणोपि हि पितामह।

तथैव मुनिकन्याश्च कोटिकोटिप्रमाणतः।

सेवंते परमेलोके नित्यं निर्गुणसंज्ञके।

कामिनीनां त्रिकोट्यास्तु नानाकर्मपरायणाः।

गोविंदरसनिर्भिन्ना गायंत्यःप्रेमविह्वलाः।

नाना वैदग्ध्यनिपुणा दिव्यवेषांबरान्विताः।

सौंदर्याश्चर्यलावण्य कटाक्षाऽतिमनोहराः।

एकांताश्रितगोविंदा स्तदंगस्पर्शनोत्सुकाः।

तदंतरेचह्यात्मानं कृत्वा नवनवाकृतिम्।45

वेणुना मोहयन्विश्वं हरिर्नृत्यतिमण्डले।

मंदिरस्य ततो बाह्ये प्रियपारिषदावृते।

तत्समानवयोवेषाः समानबलपौरुषाः।

समानरूपाभरणा स्समानमानघर्मिणः।

समानगुणसंगीत वेणुवादन तत्पराः।

**श्रीधामा च सुधामा च वसुधामा च कंकणी**।

विज्ञेयाःपूर्वतोह्येते क्रमाद् द्वारचतुष्टये।

स्तोककृष्णसुभद्राद्या गोपालाश्च तथाऽपरे।

शृङ्गवेत्रविषाणाढ्या स्सर्वे चारु चतुर्भुजाः।

तत्पश्चात्सुरभीबृन्दं परमानंद संकुलम्।50

क्षरत्पयोभिर्गोविंद मनुसंसृज्य तिष्ठति।

तद्बाह्ये फुल्लमंदारो वेदिकाभिर्विराजते।

गोलोके रमते दिव्ये नित्यमेवहरि स्स्वयम्।

गोलोकं पट्टवस्त्रे वा मण्डले वा सुधामये।

विलिख्य ये पूजयंति ते यांति परमंपदम्।

वृक्षेबृन्दावनं कृत्वा शारध्यांनिशिपद्मज।

अनुकुर्वंति ये लीलां ते यांति परमंपदम्।

राधाकृष्णाभिधांकंतु कारयेत्प्रतिमासु च।

दम्पत्योर्वापरंभक्त्या सखीनां तु विशेषतः।

रासलीलोत्सवं पश्येद् ध्यायेद्वा प्रेम संप्लुतः।55

अंते गोलोकमायाति संत्यज्य प्राकृतं तनुम्।

इत्येतद्विभवस्थानं व्यूहात्परतरं मतम्।

तस्मात्परं तु वैकुण्ठस्थानं नारायणस्य हि।

अनंतपारं तत्स्थानं यत्र श्रीरंगमंदिरम्।

वेंकटाद्रिरितिख्यातो यत्र नारायणात्मकः।

गोविंदात्तु ह्यधस्थानं वासुदेवस्य पद्मज।

स्वर्णरत्नमयीभूमि र्दिव्यमाणिक्यवेदिका।

रत्नसिंह्मासनं तत्र पदाष्टक विनिर्मितम्।

संस्थितो रमयासाकं वासुदेवश्चतुर्भुजः।

इंद्रनीलमणिश्यामो नीलकुंचितकुंतलः।60

पद्मपत्रविशालाक्षः स्फुरन्मकरकुण्डलः।

शंखचक्रगदापद्म वनमाला विराजितः।

श्रीवत्सकौस्तुभज्योतिः विद्योतित भुजांतरः।

पीतांबरधरस्त्रग्वी तुळसी मालयावृतः।

वात्सल्यादिगुणोपेतः सच्चिदानंदविग्रहः।

रुक्मिणीसत्यभामा च शैभ्या चैव स लक्षणा।

मित्रविंदा सुनंदा च तथा जाम्भवतीमता।

सुशीला चाऽष्टमीह्येता वासुदेवस्य शक्तयः।

वासुदेवादथो दातः संकर्षण उदाहृतः।

शुद्धस्फटिकसंकाशो रक्तांबुजदळेक्षणः।

नीलाम्बरधरश्रीमा नेककुण्डलमण्डितः।65

दिव्यगंधविलिप्तांगो मधुपानविघूर्णितः।

सहस्रफणमाणिख्य ज्योत्स्ना नीराजितांबरः।

**रेवती** सेवितपदो हलहस्तश्चतुर्भुजः।

यम रुद्र महाकाल रूपधृक् हृदिसंस्थितः।

शेषोयं वासुदेवस्य ह्यनंतोनंत विक्रमः।

संहर्ता सर्वलोकानां स्वयंसर्वंकरोति हि।

संकर्षणो महाविष्णुः **विद्या** बलसमन्वितः।

कालस्य सर्वभूतानां रुद्रस्य च यमस्य च।

अंतर्यामित्वमास्थाय जगत्संहरते प्रभुः।70

स्वयं तु साक्षाद्देवस्य शय्यारूपो हि रूपधृक्।

संकर्षणादधस्साक्षात् प्रद्युम्नं मण्डलं मतम्।

**रत्यास्**वर्णमये पीठे संस्थितो भगवन्मनाः।

जगन्मोहनसौंदर्यः किशोरोऽरुणलोचनः।

दिव्यालंकार संयुक्तो वशीकृत जगत्त्रयः।

तव प्रजापतीनां च कालस्य च यमस्य च।

अंतर्यामित्वमास्थाय प्रद्युम्नश्च करोति हि।

अनिरुद्धस्ततोप्यर्वाग् दिव्यसिंहासनस्थितः।

ईश्वरस्सर्वलोकानां **शांत्या**देव्या समास्थितः।

मनूनां पार्थिवानां च कालस्य च यमस्य च।75

अंतर्यामित्वमास्थाय स्थिति मातनुतेऽनुजः।

एवं बृह्मन्! हरेर्लीलां शुद्धसत्वमयी स्थिता।

अप्राकृते परेव्योम्नि लोकास्संति च भूयशः।।

वासुदेवादिमूर्तीनां व्यूहस्थानं प्रकीर्तितम्।

मत्स्यादीनां तु मूर्तीनां विभवस्थानमुत्तमम्।

भूमावपि चतुर्व्यूहास्संति पंकजसंभव!।

वैकुण्ठं परमोलोको विष्णुलोकस्त्वनुत्तमः।

श्वेतद्वीपं सु रम्यं तु क्षीरसागर उत्तमः।

एवं चतुर्धाव्यूहास्तु ममैव प्रकटीकृतः।

जलावरणमध्ये तु वैकुण्ठं प्रथमं स्मृतम्।80

कोटिवैश्वानरप्रख्यं परमंधाम चाव्ययम्।

तस्मिन् **देवमतीनाम**पुरं रम्यमनुत्तमम्।

चतुर्द्वारसमायुक्तं चण्डाद्यैरभि रक्षितम्।

सहस्त्रयोजनोत्तुङ्गैः प्राकारैरुपशोभितम्।

समानरूपाःश्रीविष्णोः यत्र संतिस्त्रियोजनाः।

मन्त्राष्टाक्षरसंसिद्धा भक्त्याषोडशरूपया।

यांति तत्प्रथमंव्यूहं यद्गत्वा न निवर्तंते।

मोदंते विष्णुनासाकं भक्तास्तेशाश्वतीस्समाः।

पुनस्तेनैव यास्यंति तत्पदं प्रकृतेःपरम्।

य याता वैष्णवोलोके भक्त्या ते न पतंति हि।85

ऊर्ध्वादूर्ध्वं प्रगच्छंति कर्मिणोऽथः प्रयांति हि।

न कर्मबंधनंजन्म वैष्णवानां च विद्यते।

विष्णोरनुचरत्वं हि मुक्तिर्मे सद्गतिर्मता।

न दास्यं परमेशस्यबंधनं परिकीर्तितम्।

सर्वबंध विनिर्मुक्ता हरिदासा निरामयाः।

यत्राहं रमयासार्धं सर्वलक्षणलक्षितः।

वैष्णवोऽष्टाक्षरं जप्त्वा तत्रचैति न संशयः।

तस्मिन् मणिमयस्तंभे सहस्त्र रविवर्चसि।

विमाने सुशुभे दिव्ये संस्थितो भगवान् हरिः।

तत्र चाधारशक्त्यादि धृतेपीठे हिरण्मये।90

अष्टपत्रांबुजे लक्ष्मी बीजाद्ये कर्णिकालये।

तत्र नारायणोदेवो दक्षपार्श्वे रमापतेः।

स्वर्णवर्णद्रव्यपात्र मातुलुंग करांबुजा।

वामतः पृथिवीदेवी नीलोत्पलदळप्रभा।

नानालंकारसंयुक्ता विचित्रांबरभूषिता।

रक्तोत्पलं करद्वंद्वे धान्यपात्रं शुभं तथा।

दधानाऽधःकराब्जाभ्यां धरित्री विश्वसुंदरी।

दक्षाग्रे च समासीना सचामरकरांबुजा।

विमलाद्या शक्तयश्च सर्वलक्षणशोभिताः।

श्रीमदष्टाक्षरेमन्त्रे सिद्धानां वै मनीषिणाम्।95

गम्यस्स वैष्णवोलोको नेतरेषां कथंचन।

वैकुण्ठं प्रथमं लोकं इति ते प्रतिपादितम्।

द्वितीयं वैष्णवं व्यूहं श्रृणु वक्ष्यामि सुव्रत।

योऽयं नित्य इति ख्यातो लोको वै वैष्णवस्स्मृतः।

स लोको विमलःपुण्यः शुद्धसत्वमयश्शुभः।

मध्याह्नसूर्यसाहस्त्र युगपद्भासितस्सदा।

कल्पांतेपि न लीयेत सत्यलोको महत्तरः।

मणिबद्ध महास्वर्ण प्राकारपरिशोभितः।

कल्पधृमलता मध्ये सुधाकासार शोभितः

स्वर्णपंकजसंपुष्ट सरिद्भिःपरिवेष्टितः।100

विमुग्ध सुंदरीगीत विनादितदिगंतरः।

तन्मध्ये नगरीरम्या मणिप्राकारशोभिता।

कोटियोजनविस्तीर्णा द्वारकानाम नामतः।

तन्मध्येऽन्तःपुरं रम्यं वासुदेवस्य शोभितम्।

तन्मध्ये कल्पवृक्षस्य छायायां परमासनम्।

चतुर्द्वार समायुक्तं हेमप्राकार शोभितम्।

विचित्रश्रेष्ठपर्यंकं शुभास्तरण संवृतम्।

तस्मिन् मनोरमे दिव्ये समासीनश्श्रिया सह।

ईश्वर्यासह देवेशो वासुदेवस्सनातनः।

पांचजन्यरथांगाभ्यां बाहुयुग्मेविराजितः।१०५

इतराभ्यां श्रियोगात्र माश्लिष्याभि विराजते।

अत्राष्टशक्तयो मुख्या स्तनवः परितस्थिताः।

रमा च रुक्मिणी सत्यभामा पद्मालया शिवा।

सुलक्षणासुशीला च रतिकामप्रदा तथा।

आयुधैः परितोरक्ष्यं द्वितीयं व्यूहमब्जज।

**<u>द्वादशाक्षरमन्त्रं हि</u>** ये जपंति निरंतरम्।

ते प्राप्नुवंति सततं शाश्वतं पदमव्ययम्।

न वेदयज्ञाध्ययनैः सर्वतैश्चोपवासकैः।

प्राप्यते वैष्णवोलोको विनादास्येन कुत्रचित्।

अथ स्तृतीयं व्यूहं तु श्वेतद्वीपमितीरिते।११०

महतां सनकादीनामात्म वैभव दृष्टये।

**सनकश्च सनंदश्च तृतीयश्च सनातनः।**

**सनत्कुमारो जानुश्च वूडुःपंच शिखस्तथा।**

**सप्तैते ब्राह्मणःपुत्रा योगिनस्सुमहौजसः।**

विरक्तास्सर्व भोगेषु शुद्धसत्वगुणास्सदा।

भगवद्दर्शनोद्भूत सुखैकरस सेविनः।

महाभागवता विष्णोः दास्यवर्त्मनि संस्थिताः।

नरनारायणाद्याश्च श्वेतद्वीपे वसंति ते।

तेषां संदर्शनार्थाय तत्र सन्निहितो हरिः।

सुधांशुकोटिसंकाशे नानावर्णमहिज्ज्वले।115

श्वेतद्वीपे महायोगी सेविते हेयवर्जिते।

तन्मध्येनगरीरम्या नाम्नाचैरावती शुभा।

नानारत्नमयैर्दिव्यैः विमानैरुपशोभिता।

दिव्यस्त्रीपुंभि राक्रांता बहुप्रासाद संकुला।

उद्यानानिविचित्राणि यत्रसंति सुरद्रुमैः।

तन्मध्येऽन्तःपुरम् रम्यं तन्मध्ये मणिमण्डपम्।

सिम्हासनं च तन्मध्ये सूर्यवैश्वानरप्रभम्।

तन्मध्येऽष्टदळंपद्मं चंद्रबिंबमिवांपरम्।

तन्मध्ये कर्णिकायां तु समासीनो जनार्दनः।

शुद्धजांबूनदप्रख्यो मुक्ताहार विभूषितः।120

शंखचक्रगदा पद्म शक्तिहस्त चतुष्टयः।

हारकेयूरकटकैः अंगुळीयैश्च भूषितः।

सुवर्ण पंकजप्रख्य पद्मयुग्म विराजितः।

षोडशाब्दवयोरूप यौवनेनविराजितः।

विशालफालदेशे तु कुंकुमेन सुगंधिना।

रचितेनोर्ध्वपुण्ड्रेण सीमंतेनापि शोभितः।

मधितामृतफेनाभ शुक्लवस्त्रेण वेष्टितः।

मुक्तामयाभ्यां शुक्लाभ्यां कुण्डलाभ्यां विराजितः।

पद्मासनसमासीनो जगन्मोहन विग्रहः।

वामांकसंस्था भूदेवी तस्य देवस्यरूपिणी।125

दक्षिणेश्रीश्च तस्यैव सदृशीगुणभूषिता।

वसुपात्रं मातुलङ्गं दर्पणं हेमपंकजम्।

दोर्भिश्चतुर्भिर्बिभ्राणो तथाऽन्याभिस्समावृताः।

ईशावाच्या महादेवी जाह्नवी कमलालया।

सावित्री सर्वगा पद्मा शक्तयः परिकीर्तिताः।

श्रद्धा मेधाधृतिःप्रज्ञा धारणा शांतिरेव च

श्रुतिस्स्मृतिर्मतिर्धन्या वृद्धिर्वृष्टिर्मनीषिणी।

दास्यस्त्वेताश्श्रियः प्रोक्ता सर्वकैंकर्य कारिकाः।

अनंत वैनतेयादि दैवता नित्यकिंकराः।

साद्यमारुद्गणाश्चात्र सेवंते नित्य दैवताः।130

येन विष्णुमन्त्र जप्तारः सततं श्रद्धयान्विताः।

ये द्वादशीव्रतेयुक्ता स्तत्पदं यांति तेऽव्ययम्।

**<u>विष्णोष्षडक्षरंमन्त्रं</u>** प्रणवाद्यं तु ये जनाः।

जपंति कृतसंस्कारा हेतिभिर्गुरुणा तनौ।

तेषां मदेकचित्तानां मामेकं पदमुत्तमम्।

विष्णुलोकेतिविख्यातं नान्यसाधनकोटिभिः।

न वेदैर्नच दानैश्च न यज्ञैर्नव्रतैस्तथा।

प्राप्तुं न शक्यतेलोको विना विष्णुप्रसादतः।

भक्त्याचाऽनन्ययाप्राप्तुम् शक्यं विष्णुपदं नृणाम्।

तस्मात्संपूजयेन्नित्यं भक्त्यादेवं जनार्दनम्।135

चतुर्थं त्वपरंव्यूह मवधारय पद्मज!।

दिवौकसां च रक्षार्थं दुग्दाब्धौपारमेश्वरम्।

सुधांशुकोटिसंकाश सहस्राक्षेनशोभितः।

पुरंदरैस्सयूधैस्स प्रार्थ्यते दुग्धवारिधौ।

तस्मिन्ननंतपर्यंके शेते सौविस्तृतोच्छ्रिते।

दिव्यासनसमासीनः पद्मनाभोऽच्युतो हरिः।

नीलजीमूतसंकाशः पद्मपत्रायतेक्षणः।

विवस्वत्कोटिसंकाश किरीटेन विराजितः।

नानवर्णोज्ज्वलद्दिव्यकुण्डलाभ्यां विराजितः।

बालार्कसदृशज्योतिः पीतवस्त्रेण वेष्टितः।140

शंखचक्रगदाशार्ङ्ग खङ्गहस्तैर्विभूषितः।

दिव्यभूषायुधाक्रीड यान पारिषदैर्वृतः।

सदृशी तस्य देवी तु रूपशीलगुणादिभिः।

तप्तकांचनसंकाशा तप्तकांचन भूषणी।

शुक्लांबरधरा सुभ्रूः कुसुमांचित शीर्षजाः।

कस्तूरितिलकोपेता रत्नसीमंतशोभिता।

बिभ्रतीचोर्ध्वबहुभ्यां हेमपद्मयुगं शुभम्।

इतराभ्यां समाश्लिष्य भर्तारम् निभिडम्सदा।

आलोकयंती सततं त्रिदशान् स्वकटाक्षकैः।

संगीतानंदनपरैः सिद्धचारणकिन्नरैः।145

दैतेयैर्बाध्यमानैस्तु बृह्मरुद्रादि दैवतैः।

संस्तूयमानस्तत्रेशो देवानामभयं ददौ।

देवानामभयंदत्वा सर्वदेवेश्वरो हरिः।

निहंतिराक्षसान् दुष्टान् क्षीराब्धिकृतकेतनः।

अधऊर्ध्वविभागेन व्यूहाष्टकमितीरितम्।

नवमं तत्र गोलोको यत्र पुर्योप्यनेकशः।

महद्भुतं ततश्चोर्ध्व मनंतमविकल्पितम्।

निस्सीमममलंधाम वाङ्मनोगोचरं परम्।

मुक्तिस्थानं बृह्मपदं स्थानातीतं च निर्मलम्।

मूलं संसारवृक्षस्य कारणं मन्निकेतनम्।

मामेकं शरणंप्राप्ता मदनुध्यानमास्थिताः।

मामेव ते प्राप्नुवंति नावर्तंते पुनश्च ते।१५१

इति-श्री पांचरात्रे बृहद्बृह्मसंहितायां त्रीतीयपादे

ऊर्ध्वलोकवर्णनं नाम-द्वितीयोध्यायः।

श्रीः

श्रीमतेरामानुजाय नमः

# त्रितीयोऽध्यायः

## ऊर्ध्वलोकवर्णनं (अर्चिरादिमार्ग कथनम् -1)

श्रीनारायण उवाच-

बृह्मन्नूर्ध्वनिवासस्यसंति स्थानानिभूयशः।

तान्यहं तेभिदास्यामि यदि ते श्रवणेस्पृहा।

शुभाशुभलतोद्भूत सुखदुःखफलानि वै।

भुंजन् जनो यदा याति ह्यवशस्वरथस्तदा।

श्रीमन्नारायणस्यैव प्रसादोजायते यदा।

निर्हेतुकदयालभ्य आचार्यं संश्रयेत्तदा।

आचार्याल्लब्ध संस्कारो दासत्वमवलंभ्य च।

कैंकर्यतत्परोब्रह्मन् देहिकैर् नोपलिप्यते।

राजभृत्यो यदा लोके राजार्थेह्यशुभं वहन्।5

नैवोपालभ्यते तद्वदेकांतीमत्परो मुनिः।

मयिचादाय कर्माणि संगं त्यक्त्वा करोति यः।

लिप्यतेन स पापेन पद्मपत्रमिवांभसा।

ज्ञात्वात्मलोकममलं नित्यमक्षरमव्ययम्।

निर्विकारमनौपम्य मानंदज्ञान संश्रयम्।

आत्मानंदरसास्वाद निवृत्ताशेषलालसः।

त्यजेज्ज्वलनवत्सर्वं आत्मेतरदिदंजगत्।

देहादहंकृतिं हित्वा ममत्वमितरेषु च।

केवलं बृह्मभावत्व मात्मनोह्यनुभावयन्।

ब्ऱह्माहमिति यो ब्रूयाद् ब्ऱह्मभ्येति विचक्षणः।

देहोऽहमिति भावेन यथा मायामुपैति हि।10

इयमण्डात्मिका माया सप्तावरण संयुता।

कार्यरूपा समभ्येतिदेहेऽहंकारिणम् नरम्।

देहेऽहंकार निर्मुक्तं बृह्मशेषत्व भाविनम्।

बृह्मभ्येति परंसाक्षाद्धेयवस्तु विवर्जितम्।

प्रधानात्परतस्साक्षात् ब्ऱह्मैवानेकरूपतः।

तदाभ्येति नरोब्रूते तवाहमिति यो मयि।

प्राप्यंभोग्यं परंबृह्म येषामात्मा च पद्मज।

बृह्मविद्बृह्मभवति बृह्मभाग् ब्राह्मणोऽच्युतः।

अतो देहात्परस्स्वात्मा देहभूतःपरात्मनः।

तमात्मानमनुध्याय विमुक्तो जायतेऽब्जज।15

विजित्य प्राणमक्षाणि प्राणायामेन साधकः।

आत्मस्थमात्मपुरुष मादेहांत मनुस्मरन्।

अंते विष्णुमनुसृज्य सुषुम्णावर्त्मनायतिः।

शिरःकपालं संभिद्य मामेति परमं पदम्।

अग्निर्ज्योतिरहश्शुक्लः षण्मासा उत्तरायणम्।

तत्र प्रयाता गच्छंति बृह्मबृह्मविदो जनाः ।

बृह्मण! मद्भक्तियुक्तो यद्यंतकाले ऽर्चिषाव्रजेत्।

उत्सवो जायते भूया नूर्ध्वलोक निवासिनाम्।

आयास्यति हरेर्दास इहमार्गवशादिति।

मंदिराजिरसौदाग्र संस्कारो जायतेभृशम्।20

सौदाग्रेषु वितन्यंते पताका भानुभिस्वराः।

विस्तार्यंतेवितानानि हैमानि परितोदिशः।

आस्तीर्यंते विमानेषु स भानुभवनेषु च।

कोमलानेकर्वणाढ्या महार्हास्तरणानि च।

निर्यांति जालरंद्रेषु मुक्तादाम विलंबिषु।

कृष्णागरु महामोद धूमदारसरिद्धरा।

उत्तुंगरत्नखचित वेदिका मणिमण्डपे।

सिह्मासने चलच्चारु चामराणि लसंति हि।

चंदनागरु कस्तूरि जलैरानंद वर्धिभिः।

सिच्यंते राजवर्त्मानि हरिदासानुतुष्टये।25

मृदंगवीणापणव भेर्यानक वरूदकाः।

वाद्यं ते कुसुमासारा निपात्यंते महीतले।

रागनृत्यस्तवोद्गार करणायसहस्रशः।

तिष्ठंति चोत्सुका बृह्मन्! गंधर्वाप्सरसोऽनुगाः।

एवमूर्ध्वप्रदेशेषु सर्वतो राजवर्त्मसु।

ऊर्ध्वं गच्छत्सु भक्तेषु चोत्सवस्संप्रवर्तते।

पुत्रोत्सव इति बृह्मन्! निस्सीमस्सं प्रवर्तते।

**सुदर्शनश्शंखवर्ण स्तथाज्ञान निकेतनः।**

**प्रियंकर इति ख्याता श्चत्वारो विष्णुपार्षदाः**।30

आयांति प्रभुणाज्ञाप्ता नेतुमेकांतिनं जनम्।

शिथिलावयवैर्युक्त यत्र भागवतस्थितः।

सुहृद्वद्दर्शनं दत्वा प्रतोष्यामृत जल्पनैः।

वियोज्यभाह्यकरणै रंतस्संयोज्य वृत्तिभिः।

कृत्वांतःप्राणसंयुक्तं प्राणांश्चिति नियोज्य च।

चेतनं भूतसूक्ष्मस्थं नयंत्यूर्ध्वं हरिप्रियाः।

हृदयाननतो नीत्वा सुषुम्णायां निवेश्यतैः।

गंतव्यदेशान् संस्मार्य नीतो जीवो हरिप्रियैः।

<u>**वासुदेवतरुच्छायां**</u> विश्रमाय विचिंत्य च।

पाथेयं भगवन्नाम पुण्डरीकाक्ष संज्ञितम्।35

मन्त्रं द्वयं च पाथेयं श्रीरङ्गं च सहायकम्।

विश्रामदेशं विरजां तिलवृक्षं तथैव हि।

लक्ष्मी पद्मासरश्चैव सह्यकाशं रत्नमडपम्।

विचिंत्य चेतसाधीरो देवमानाय चोद्यतः।

विद्याभ्यास बलेनैव भित्वा बृह्माण्डमण्डलम्।

तत्संभंद्यर्करश्मीनां सहयोगमुपेत्य च।

*प्रणवं रथमारुह्य बुद्धिसारथिनाधृतम्।

मनःप्रग्रहवान् धीरो यातिविष्णोःपरंपदम्।*

नाड्यासूर्यमतीत्याथ चंद्रंभित्वाऽमृतात्मकम्।

तेनैव सत्कृतो याति स्थूलं देहं विहाय च।40

सूक्ष्मं शरीरमालंब्य गमनायतमुद्यतम्।

नमंति स्वस्व सीमांत मर्चिरादिमुखास्सुराः।

अर्चिर्दिनं शुक्लपक्षं षण्मासाश्चोत्तरायणम्।

संवत्सरोथ वायुश्च भास्करश्चंद्र विद्युतौ।

वारुणेंद्रप्रजाधीशा एते मार्गाधि दैवताः।

नमंति स्वस्वसीमांतं सत्कृत्यभगवत्प्रियम्।

नानोत्सवाननुभवन् सुकृतिप्रत्युपस्थितिम्।

स्वस्वचाव्याहतैश्वर्य माकलय्य प्रसादजम्।

धन्योयं दासभावोस्ति येनदासीकृता इमे।

मदाज्ञामनुवर्तंते बृह्मेंद्रादि पुरस्सराः।45

एवं भोगान् क्रमप्राप्तान् भुंजानोऽयं यदृच्छया।

भगवच्चरणांबोजरस चिंतनतत्परः।

बृह्माण्ड भित्तिमभ्येति पृथ्वीतत्वकृताकृतिम्।

पृथिव्यादि महातत्वा न्याविद्य पुरुषैर्युतः।

निर्याति तेनमार्गेण बृह्मन्! मार्गान्तरं विना।

मुक्तिद्वारमिदं ह्येकं विद्धि पद्मसमुद्भव!।

तदूर्ध्वगमनेकाले त्रयस्संतिपयोधयः।

तानुल्लंघ्य प्रयातस्य पुण्यतीर्थेति नामतः।

नद्यस्स्समुपतिष्ठंति तमूर्ध्वगमने पुनः।

एको मोक्षपदंनाम मार्गस्तिष्ठति पद्मज!।50

पुण्यवृक्षसमाकीर्णो ह्याश्रमो मुक्तिसन्निभः।

भोग्यं मनोहरं यत्र देवानामपि दुर्लभम्।

अयं तु पूर्वमार्गेभ्यः स्थितश्शतगुणादिकः।

तमुल्लंघ्यस्थितश्चान्यः कोटियोजनवान् परः।

तंभुक्त्वा पुनरभ्येति भगवत्कीर्तन ध्वनिः।

निस्सीमानंदमासाद्य तस्मिन्नाश्रय मण्डले।

तं पिबन्नेव संयाति योजनानिह्यनेकशः।

ततस्तु विष्णुलोकोस्ति पूर्वोक्तात्सर्वलोकतः।

सहस्रगुणितो भूत्वा स्थितोऽयं परमाद्भुतः।

अत्युन्नतो महोत्साहो महाश्चर्योऽतिशोभितः।55

यत्र रत्नोज्ज्वलाभूमि र्माणिक्यस्तम्भ संचिता।

हेमप्रासाद विभवो निस्सीमसुखसंगतः।

वनैरुपवनैश्चैव कासारैस्स्वर्णपंकजैः।

भ्रमद्भ्रमरझंकार मधुरैर्नित्यरूपधृत्।

चतुर्द्वार समायुक्तो द्वार नामानि वै श्रृणु।

आत्मप्रकृतिकैवल्यधर्म नामानि पद्मज!,।

समष्ट्यंतानि जानीहि तत्र तानि हरिप्रियः।

स्थितिं प्राप्नोति सुचिरं प्रकृत्यावरणं त्विदम्।

प्रकृतेर्विजयं कृत्वा स्थितस्तत्र पितामह।

मत्प्रसादाद्बहिश्चाण्डादालिप्त प्रकृतावपि।60

अयं तु विष्णुलोको हि प्रधानाधिपतेर्मम।

प्रधानमत्र विज्ञेयं मूलसंज्ञं महामते।



www.kriyasagaram.in

उल्लंघ्यमूलप्रकृति मर्चिरादि महापथि।

कोटित्रयो योजनानाण् गतेसति चतुर्मुख।

विरजातीर मभ्येति विश्वदुःखमनुस्मरन्।

अगत्वा शरणंविष्णुं कोटिजन्मन्युपार्जितम्।

यमयातनयोद्भूतं दुःखं विषयमुच्यते।

प्रशमाय महाभाग! विरजातीरमाश्रितः।

प्रधानपरम व्योम्ना रंतरे विरजानदी।

उन्मुच्य वासनारेणु मूर्ध्वं गच्छति मत्परः।

तत्र सूक्ष्मतनुं त्यक्त्वा वासनारेणुगुंभिताम्।

योग्याभवति देवेश मत्पदारोहरणामपि।66

इति । <u>ऊर्ध्वलोकवर्णनं (अर्चिरादिमार्ग कथनम् -1)</u>

<u>नाम त्रितीयोऽध्यायः</u>

श्रीमतेरामानुजायनमः।

# चतुर्थोऽध्यायः

## (अर्चिरादिमार्ग कथनम् -2)

## मणिमण्टपसमीपप्राप्ति कथनम्

उत्तीर्य विरजांबृह्मन्! रजोनिर्धूय वैष्णवः।

स्नानेन वै सुमतिमानश्वत्थमुपयाति हि।

तत्राश्वत्थ तरुच्छाया माश्रिता ये ह्यमानवः।

तेषांपाणितलैः स्पृष्टः क्षाळिताशेषवाससः।

सूक्ष्मदेहं परित्यज्य सूर्यकोटिसमप्रभम्।

शरीरंदिव्यमासाद्य भाति चारु चतुर्भुजम्।

शंखचक्रगदापद्म दिव्यायुधविराजितम्।

पीतांबरंघनश्याम स्फुरन्मकरकुण्डलम्।

गर्भजन्मजरानाशवर्जितम् देहमुद्वहन्।

अतीतमनरोषादि क्षुत्पिपासादि विग्रहः।5

रागद्वेषादिकंसर्वमहंता ममते तथा।

अनादिविषयास्वाद वासनाभिरुचिं तथा।

भयं च सकलं हित्वा लावण्यादि गुणान्वितः।

दिव्ययौवनमाधुर्य कल्याणादि गुणान्वितः।

शुद्धसत्वात्मिको भूत्वा भगवत्पार्षदोत्तमः।
अमानवान्नमस्कृत्य तथा कृत्वाप्रदक्षिणम्।
तेषामनुज्ञया बृह्मन्! ततो यातिसमाहितः।
गत्वा योजनलक्षं तदूर्ध्वं मायातिपादपः।
**महार्जुनेति** विख्यातो विद्धि षष्टिशतानि च।
विस्तारोऽस्य महाभागह्युन्नतिर्लक्ष योजना।10
तन्मूले पुरुषो नीलमेघशोभश्चतुर्भुजः।
तं दृष्ट्वा पुण्डरीकाक्षं प्रणिपत्यशुभावहम्।
दिव्यान् वै पुरुषानस्यान् भक्त्यादृष्ट्वा त्वमानवान्।
तेषामाज्ञामुपादाय पंचाशद्योजनानि तु।
याति तत्र नदीमेकां शतयोजन विस्तृताम्।
अप्राकृतजलां दिव्यां स्नानमात्रेण चेतसि।
ज्ञानमुत्पाद्यते बृह्मन्नैक्यात्मक मधोक्षज।
तत्तीरे मूर्तिमानेकः पुरुषोनिज तेजसा।
ज्ञानमुद्बोदयन्नास्ते तं दृष्ट्वा शतयोजनम्।
याति मार्गं ततस्त्वेकलक्षविंशति वा पुनः।15
योजनानां च विस्तारे लक्ष्मी पद्मसरस्थितम्।
तत्तीरे तिलवृक्षोस्ति लक्षयोजनमुन्नतः।

पंचाशद्योजनायामो मद्विभूतितयास्थितः।

तत्संबन्धात् प्रसिद्धेयं तिलपुष्करिणी पुनः।

तस्यास्तीरं समासाद्य स्नात्वा तत्र विशेषतः।

सुखरूपो हि भवति निरविघ्नतयास्थितः।

तच्छायामाश्रितस्याशु वैकुण्ठपरिचारिकाः।

नेतुमायांति बहुशो दिव्याभरण भूषिताः।

दिव्यस्त्रियो रत्नदण्ड चामरोज्ज्वलपाणयः।

शतशो रत्नदण्डोद्यतातपत्र लसत्कराः।20

नर्तक्यश्शतशस्तत्र गायका वादकास्तथा।

दीपकालंकृतारामा माल्यगंधानुलेपनाः।

शतं मालाकरा नार्यो वासोहस्ताश्शतं तथा।

चूर्णांजनादर्शकरा युवत्यश्शतशोन्वयुः।

स्तुवंत्योग्रे प्रनृत्यंत्यो नमंत्याश्शतशो बलाः।

गृहीत्वा सर्वसंभारान् हेमकुम्भ पुरस्कृतान्।

श्रीचूर्णलाज पुष्पाणि दिव्यवाद्यान्यनेकशः।

घण्टा दुंदुभिनिर्ह्लादैः पूरयंत्यो दिशोदश।

ध्वजैः पताकापटलैः छादयंत्यो दिवाकरम्।

त्रयोदशसहस्राणि रूपयौवन मण्डिताः।25



www.kriyasagaram.in

विकिरंति करांबोजैः कुसुमानि मुदान्विताः।

सहस्र सामनिनदं कुर्वंत्यो दिव्ययोषितः।

प्रबंधान्निर्जगुः स्वामि कीर्तिकर्पूर शालिनः।

आगतास्तत्रपुरुषा दिव्यरूपधरास्सुराः॥

रम्यादशसहस्राणि विमानमुपनीय च।

मुक्तादामलसद्द्वारं किंकिणीराव रंजितम्।

स्फुरत्पताकं मूर्धन्यं माणिक्यस्तम्भमण्डितम्।

दिव्यास्तरणसंपन्नं संगीतध्वनि मोदितम्।

छत्रचामरसंचार चारुसिह्मासनोज्ज्वलम्।

आगतो हरिणादिष्टो गरुडो भगवत्प्रियः।30

संवेष्टितोविमानानां सहस्रैर्भानुभिस्वरैः।

प्रेषिता परया प्रीत्या मूलाचरणशक्तयः।

महादेव्या महालक्ष्म्याः स्त्रियश्चोत्पल गंधयः।

तिलपुष्करिणीतीरे स्थितं वृक्षसमाश्रयम्।

मुक्तात्मानं महात्मानं प्रवासादागतं पुनः।

तापत्रयमहाज्वाला संतप्तं कोटिजन्मभिः।

जनन्य इव तास्त्वेन मारोग्यस्नानमानयन्।

तमभ्यषिंचन् वस्त्राणि दिव्यानिः प्रददुःपुनः।

लिंपंत्यङ्गं सुरभिना गंधेनप्रमदोत्तमाः।

विभूष्यालंक्रियाभिः तं माल्यैराकीर्य सर्वतः।35

दानपट्टाभिषेकं तान् संचक्रुः कृतमंगळाः।

नीराजयंत्यःकर्पूर वर्तिभिर् जयनिस्स्वनैः।

पुष्पकोपरि संस्थाप्य कृत्वा वाद्यध्वनिं मुहुः।

कृतानिचोज्जगुश्चान्य प्रबंधैश्श्रृणुतानि हि।

धन्योयमत्यजत् स्नेहमपूर्वं संप्रवर्तयन्।

मम त्वं वनिता पुत्र धनोपकरणेषु च।

मायामात्रमिदं ज्ञात्वा गंधर्वनगरोपमम्।

अति दुस्त्यजमे तस्मिन् लोके विषयसेवनम्।

तृणीकृत्य हरौ स्नेहमपूर्वं संप्रवर्तयन्।

सुलभो वायुसंरोध स्सुलभं वह्निवर्तनम्।40

समुद्रतरणंस्वल्पं नेंद्रियाणां विवर्जयः।

आत्मानं भगवच्छेषं दासंमत्वा गतैषिणः।

कैंकर्यंवित्तिसंसाध्य समायाति हरेःपदम्।

न कर्मिणांगतिश्चैषा योगिनां न्यासिनां तथा।

किंकराणांगतिश्चैषा परमैकान्तिनां मता।

भित्वा चाण्डमतीत्यासौ प्रधानं मूलकारणम्।

शूरोयमकरोदाशु चात्मानमतिथिं हरेः।

एवं स्तुतिं समाकर्ण्य भगवत्पार्षदैः कृताम्।

वैकुण्ठद्वारसामीप्यं गतवान् प्रेमसंप्लुतः।

अपश्यद्धेमसंबद्ध गोपुराणि च पङ्क्तिशः।45

विलसद्युक्तसोपानपङ्क्ति प्राकार वैभवान्।

स्फूर्जत्सौदाग्र संबद्ध पताका चेलनर्तकान्।

रणद्घंटारवाकीर्ण सुधाद्योतिगृहोल्लसत्।

आगच्छागच्छ भद्रं ते बृवतः कर संज्ञया।

अपश्यद्यष्टिकासूच्छैः पंजरस्थविहंगमान्।

प्रविश्य तत्पुरद्वारं मणिवेद्युल्लताप्रभम्।

वैकुण्ठनगरायेति नमस्कृत्य स्थितोऽभवत्।

मुडिमुण्डादि विख्यातान् श्रीदिव्यपुरुषान् पुरः।

विलोक्य प्रणतिं कृत्वा विशन्मध्यमवैक्षत।

अनेकलक्षप्राकारा नुद्यानानि वनानि च।50

मुक्तागुच्छलसच्छाया मण्डपानि सहस्रशः।

तोरणानि विचित्राणि हेमसिह्मासनानि च।

केळिसद्मप्रतोळीषु विचचार ततो भ्रमन्।

कोटियोजनमागत्य महाप्राकार मैक्षत।

रूप्यप्राकारमप्येकं प्रवाळाख्यं ततःपरम्।

नवरत्नाख्यमप्यन्यं माणिक्याख्यमनंतरम्।

अनंता इति चाख्याता स्सहस्रभवनांतराः।

गोपुरद्वारदेशेषु प्राकारास्संति भूयशः।

तद्वारेषु स्थिता बृह्मन्! पुरुषाः चंद्रवर्चसाः।

शुद्धसत्वमयीस्सर्वे त्रिकालज्ञा हरिप्रियाः।55

विश्वसृष्ट्यादिकां लीलां जानंतः परमात्मनः।

सर्वं कर्तुं समर्थास्ते प्रसादात्सर्वगाश्च ते।

तां नमस्कृत्य वीधीषु प्रविष्टः कोटियोजनम्।

गतस्तदा पुनश्चान्ये पार्षदास्समुपस्थिताः।

महार्हवस्त्रालंकाराऽलंकृताः कुम्भपाणयः।

हेमपात्रगतानेक संभार परिपूरिताः।

मङ्गळारात्रि धूपादीन् कुर्वंतो जय निस्स्वनैः।

आशीर्भिर्वर्धयंतोऽन्ये स्तुवंतः स्तुतिभिःपरे।

गायंतश्चप्रनृत्यंतः प्रणमंत सहस्रशः।

तदा विष्वक्सेनमुखाः पार्षदाः प्रवरा हरेः।60

सिह्मासने समारोप्य पात्रे हेममये शुभे।

संसाधितोदकैः गंधैः पादप्रक्षाळनं ततः।

कुर्वंति वनिताभिश्च वयंधन्या इति ध्वनिम्।

दिव्यानुलेपनाद्यैश्च धूपदीपाऽन्न भोजनैः।

सत्कृत्य पाद तीर्थेन ह्यात्मानमभिषिच्य च।

निन्युस्वाश्रम भूभागे पर्यंके संनिवेश्य तम्।

पादसंवाहनं चक्रुः भार्ययागत मत्सराः।

पुनस्सपुष्पकं भक्तं सत्कृतं साधु चर्यया।

मणिमण्डप सामीप्यं प्रापयामासुरुत्सकाः।

स तस्मादवतीर्याशु साष्टाङ्गं धरणीं स्पृशन्।65

आनंदमय दिव्याय रत्नमण्डपकाय च।

नम इत्यनुवाकेन स्थितस्तदवलोकयन्।

इति अर्चिरादि गमनं-2(मणिमण्डप समीपप्राप्ति कथनं)नाम चतुर्थोऽध्यायः।

श्रीः

# पंचमोऽध्यायः

**मणिमण्डपवर्णनम्।**

श्री भगवानुवाच-

देदीप्यमानमणिनिर्मितवेदिकायां स्तम्बालसंति नवकाममयस्समंतात्।

येषामसीम रजनीश मयूखजालैः जीवंति सज्जनविलोचन सच्चकोराः।

संकल्पकल्पित विचित्र मणिप्रवेक सोपानपङ्क्तिविगळद् द्युमणिप्रकाशाः।

कुर्वंति वज्रघटिताजिर दर्पणांत स्संसृज्य दिव्यवसनास्तरणोपमानम्।

आराममण्डपशिखाश्रितवारिपात विच्छिन्न नीरकरबृंद मनूत्सृजंतः।

पुष्पैःकिरंत इवमण्डप पादमूलं विष्वग्विमुग्धजलयंत्र चमालसंति।

मंदारपादप पराग विषक्तमत्त बृंगावळी विरुतजातरतीवभेदैः।

संसेवितं चलतिचाप्सुमराळमाला मंजीर निस्वनचयैः परितोविगीतम्।

नृत्यंति दिव्यवनिता परितोनिबद्ध रत्नावळी ललितभास्वर वेदिकासु।

तं मुग्धहासपरिवेशल वक्रचंद्र पीयूषगान परिहृत कुरंगशाबाः।५

यत्रामलस्फटिकबद्धत लोकक्लृप्त कासारफुल्ल कमलोत्थित रेणुजालैः।

आबद्धवर्तिक महाजिरकेळिसद्म सद्भक्तिरंतरतुलं विवशंकरोति।

यत्रेंदुकांत मणिनिर्गत निर्झराणा मारावपूरित सुधासित सौधमूर्ध्नि।

संबद्धदृष्टित तयश्शिखिनां कलापा निर्धूतपुच्छनिवहाः परितस्स्वनंति।

यत्रेंदिराळिनिवहा ललितम् लतासु बृंगाङ्ग नाभिरभि चुंबित वक्रबिंबाः।

चिन्वंति पुष्प सुफलानि हरेःप्रियायै मुग्धाधरद्युति निवेशित बिंबबुध्या।

यत्रेंदिरारुचिरकेळि गृहोपविष्ट सप्रेमसंकुलविकस्वर शारिकाणाम्।

मुग्धप्रलापहृतमानस मुन्मुखानां स्वयोषितामतुलहास कला भवंति।

यत्र प्रवृत्तरसकेळि विमुक्तमुष्टि कर्पूरपांसु परिमग्न पदोरुभीत्या।

संमार्जयंति खलुकेळिगृहाणिमुग्धाःसत्पाणिपंकजदळैरसकृत् प्रयांत्यः।10

सत्पद्मराग घटितायुतकेळिसद्म देदीप्यमान फलकानि मलीमसानि।

विज्ञाय बाष्पपवनैः परिमार्जयंतिचेलांचलैः प्रतिदिनं वनिता स रेणून्।

स्वर्णालवालघनसार रजःप्ररूड मुक्तालता स्तभकराज विभूतयश्च।

नीलाश्मिबद्ध धरणीप्रतिबिंबजालैः व्योमांगणं च रमयंति वधूमुखानि।

नृत्यंति यत्र वलभीषु गवाक्षधूम धारामवेक्ष्य शिखिनोंबुध लब्धसौख्याः।

तत्र प्रविष्टवनिताक्षि कटाक्षपात पीयूषवृष्टि सुखितास् स्वर संपदाभिः।

आकारयंतिपथिकान्नळिनी निबद्धचित्ता नळीनतुल गंध बहुप्रचारैः ।

रथ्यासुघृष्ट नवचंद्रक चंदनानां नेकाश्वकानन पदानि विभावयंतः।

मुग्धांगनाभि ररविंद विलोचनाभिर् दम्मिल्लमल्लिकुसुमोत्सव संकुलाभिः।

मंदस्मितोज्वल सुधा मधुराधराभिर्गायंति दिव्यपुरुषाश्चरितानिविष्णोः।१५

सद्रत्न निर्मितवरोच्चनिकेततुङ्ग श्रृंगाटकेषु दिनकृद्युति भाक्षुरेजुः।

आंदोळनानि कुसुमानिललोलितानि संसेवितानि जलयंत्रकणांबुनेकैः।

पारावतान्यभृतसार स चक्रवाक दात्यूह हंसशुकवंजुळवाग्विलासैः।

घुष्टानिहेममृग लोचनमालिकाभिः पुष्टानिचंद्रमृगनाभि सुवासितानि।

वासंतिका वकुळनीप कदंबनाग मंदारचम्पक सालतमाल पुष्पैः।

आस्तीर्णकुंजभवनोदरवेदिकासु चांदोळनानि मधुमाधव संश्रितानि।

रंभाजिरे जलजपल्लव तल्परम्ये मंदानिलोऽन्यघनसार वितानवीजी।

बंभ्रम्यमाण मधुपाटलिकिन्नरीणा माराव मुष्टहृदयावनितास्स्वसंति।

उत्फुल्लपंकजवने विमलांबुराशा वुन्निद्रपद्मपुळिने कमलासखीनां।

स्नानावगाहन समुद्भव किंकिणीनां नादाविहङ्ग मरवैर् द्विगुणीभवंति।20

आमोदयन् परमरुत्परिचारिकेन कांतालकांतभृत पर्यूषिताब्जरेणून्।

निर्धूयसंगमयतिप्रसभं प्रभाते नव्यामलामरमहीरुह चूर्णपूगम्।२१

आबद्धमौक्तिक मनोहरलोलमाला संशोभिजाल वदनेषु पुरांगनानाम्।

वारामिवांतरित कुंजकुलानिभांति कल्लोलराजिषु मुखानि सकुंकुमानि।

अत्युच्छसौध शिखरोद्गत वल्लरीणां वातावधूत कुसुमानि पतंति भूयः।

विस्तीर्णरेणुपटवास पटावृताना मुत्कीर्णलाज निकरा इव सुंदरीणाम्।

वैकुण्ठनाथवदनामृतसेकरूड प्रेमारुणामल पलाश मनोंघ्रिपाणाम्।

सध्यान रम्यकलफाल गतेंगितानां पद्मासनानि विलसंति मुनीश्वराणाम्।

पत्युःप्रसाद समवाप्त समानभावा भास्वत्किशोर वयसो मदनं क्षिपंतः।

नृत्यत्कपोलतटकुण्डलकांति भोजो भक्त्या भजंति भगवच्चरणारविंदे।25

कोटींदुसुंदर मधुस्मित वीक्षणेषु विक्षेपकक्षण रसाक्षमचित्त वृत्या।

नान्यन्मनागपि समान सुखंभजंति वैकुण्ठ वैभवकृतं पुरुषोत्तमस्य।

यद्यप्यशेषविनिवृत्तभवप्रवाहा वेदांतनीरविरजाहृतवासनाश्च।

संप्राप्त नित्य निरपाय निजात्मलाभा लाभायनैवगणयंति विनात्मदास्यम्।

अप्राकृतामलशरीर गृहं गणादिभोगानकुण्ठ विभवानपि तत्प्रसादात्।

।एकांतिनोन गणयंति हरेःप्रपन्नाः प्राप्तानपि प्रभुपदाब्जमृते कदापि।

संकल्पतस्सपदि यस्य सुराः प्रयांति कामाभवंति सफलास्सकलाःक्षणेन।

जानाति सर्वहृदयानि विमुक्तमायो नालंबते तदपि सौख्यमखण्ड भक्तिः।

भक्त्यैवचैनमुपतिष्ठति दिव्यलोको भक्त्यैवचैन मुपतिष्ठति चात्मभावः।

भक्त्यैवचास्य भगवद्वदनामृताप्ति र्यस्याःपरं किमपि गम्यतयानचास्ति।30

सर्वावधिस्सकलसाधन सिद्धहेतुः स्वात्माश्रयः परमसाध्य तमश्चिदात्मा।

तस्यांघ्रि पंकज मपोह्यकमाश्रयाम इत्यात्मसौख्य मुतभूति सुखं न यांति।

यच्छेषभूतमखिलं चिदचिच्छरीरं योऽन्तर्गतो यमयतिस्वयमेव सर्वं।

नित्यं विमुक्तमदबद्धमनुप्रविश्य जीवं स मे जयति सर्वगुणस्स्वतत्रः।

कस्वाश्रयं समपहायतदाश्रितेषु तत्तुल्यतामनुविधाय रतिं विदध्यात्।

चांद्रींसुधामिह दिवाकर रश्मितप्तस्संत्यज्य संश्रयति को हि मरीचिकाम्बः।

तस्माद्धरेःप्रियतयाः कृपयागृहीता निश्चित्यचैवमिद मेकमनर्थ हेतुम्।

कैवल्यमैश्वर्यपदंजहात स्तदंघ्रिराजीवमुष्टमनसो रसिका भवंति।

तत्रेंदिराभवनभव्य सुगंधलुब्ध मत्तालिजुष्ट तुळसीकुसुमप्रवाळैः।

सप्रेमनिर्गत विलोचन वारिधाराः पादानलंबिवनदामगुणं सृजंति।35

दोर्दण्डसंभृतदरारि गदारविंद दिव्यांबरस्त्रगनलेपन लब्ध शोभाः।

नीराजनायधृत चंद्रकवर्तिहस्ताः न्यक्कृत्यभोगनिवहन् विलसंति तत्र।

चूडीकृतामर महीरुह पुष्पसाराः सद्रत्नदंड चलचामर मुद्वहंतः।

श्रीरङ्गविष्टरमही मभिमण्डयंत आषोडशाब्दवयसः परितश्चलंति।

मंदस्मितोज्ज्वलमुखाब्ज विलोलचारु स्निग्धालकापहृत साळिनवांबुजाभाः।

भास्वत्किरीटपरिदीप्त विदीपिताशाः श्रीकांतकांतवदनं परिवीजयंति।

आलोलकुण्डलविभूषितगंडमूला श्रीशानुराग पुलकीकृत दिव्यदेहाः।

श्रीकांतकांत गुणकीर्तन जातमोद उच्चस्वरेण जयशब्दमुदीरयंति।

वाचामगोचरमनंतविभूतिपूर्ण मानंददाम भगवत्पद मद्वितीयम्।

तस्यैकदेश भुविनिर्मित कोटिकोटि बृह्माण्डभांडनिवहं स गतो ददर्श।40

ध्यानात्परं सकलदेवमुनीश्वराणां विष्णोःपरं पदमिदं सनकादयोपि।

नायांति यत्र मनसापि भवादृशानां चेतांसि यावदधिकार मवस्थितानाम्।

यं प्राप्यनैव पुनरेति समश्नुते च कामान् जनार्दनपदांबुज दत्तचित्तः।

अंतेत्वमप्यति निदेशकरोभ्युपैषी बृह्मन्नशेष निजलोक गतैर्मुनींद्रैः।

एवंविलोक्यभगवत्पदमद्वितीयं भक्त्यार्चितोपि ननु नित्यविमुक्तवर्गैः।

नोशांतिमेतिवदनेंदु विमुग्धहास संवीक्षणामृतमृते परमप्रपन्नः।43

इति श्रीबृहद्बृह्मसंहितायां त्रितीय भागे **<u>मणिमण्डपवर्णनम् नाम।</u>**

पंचमोऽध्यायः

श्रीः

बृहद्ब्रह्मे त्रितीये षष्टोऽध्यायः

## <u>योगपीठवर्णनम्</u>

श्रीनारायण उवाच-

बृह्मन्नयं प्रियतमस्त्वत्तोऽपि मम संमतः।

सद्योमामेति कल्पांते त्वमभ्येषि जनैस्सह।

<u>भक्तिमण्डपमासाद्य</u> विलोक्याचार्यभाषितम्।

साक्षादानंदपूर्णाक्षो धन्योहमिति मन्यते।

सर्वकारणयोगाख्य पीठपद्ममनिंदितम्।

तत्वज्ञानबलैश्वर्य शक्तिभिः परिसेवितम्।

चामरांदोळितकरा विमलाद्या नवस्त्रियः।

दळाष्टके कर्णिकायां लोकपद्मस्य संस्थिताः।

अनुग्रहरमाभिन्ना कर्णिकायां श्रिया सह।

<u>अनंतासनसंविष्टा</u> तत्रानन्तं विचिंतयेत्।5

अनेकचंद्रसंकाश शीतलांगोवरद्युतिः।

नीलांबरो गुणांबोधिः कौतुकी कौतुकप्रियः।

सहस्रवदनो भूत्वा वैकुण्ठेशमुखच्छविम्।

विलोकयतिजिह्वाभिर्लेढ्यंगानि च सर्वतः।

वदनांबोज विगळ च्छशिरामोद वायुभिः।

सुखयत्यधिकंप्रेम्णा भगवन्तं रमायुतम्।

**स्वस्यदेहं त्रिवलयं कृत्वा** सिह्मासनं भवेत्।

दीर्घमानेन कथितं द्वात्रिंशल्लक्षयोजनम्।

उन्नतं दशलक्षेण विंशल्लक्षण विस्तृतम्।

सहस्रसूर्यसंकाशं फणामणि विराजितम्।10

तस्योपरिमहाश्चर्य सर्वकारणकारणम्।

भूत्वा समस्तकामोपि संस्थितो रमया सह।

दक्षिणे च महालक्ष्मी स्तस्यपार्श्वे द्वितीयके।

भूनीळे संस्थिते देवस्तत्र तत्र विराजितः।

वात्सल्यजलधिश्श्रीमान् कल्याणादि गुणान्वितः।

नियोजयतिचानेतुं मुक्तात्मानं स्वपार्षदान्।

सेनापतिं नित्यवर्गं सायुधावरणान्वितम्।

तथा च परिवारं स्वं लक्ष्मीदेवी न्यवेदयत्।

वेदांतभोदविज्ञात तत्वस्सात्वत संमतः।

अनन्यसाधनो भूत्वा तथाऽनन्य प्रयोजनः।15

तथैवाऽनन्यसंबंधो भक्तोयं ह्यावयोर्वरः।

समानेयस्समाराध्य धूपदीपाक्षतादिभिः।

एवं प्रभोदितास्ते तु नित्या वैकुण्ठपार्षदाः।

दिव्याप्सरोभिस्संयुक्ता मंगळद्रव्यपाणयः।

द्विजैःपताकावळिभिः वीणामुरज वादनैः।

लाजदूर्वाक्षतधरैः सुगंधद्रव्य भाजनैः।

उपाजग्मुः स्थितं द्वारे मण्डपस्य जयस्वनैः।

आतिथ्यं प्रददुस्तस्मै मुक्तायामित वर्चसे।

स च भक्तान् कृतातिथ्या नाज्ञयास्येतरानपि।

प्रणनाम महानंदसंकुलात्माकृतांजलिः।20

पुनस्तं योजयामासुर्दिव्य पीठे यथा तथा।

भगवान् पुण्डरीकाक्षस्समुद्र इव पर्वणि।

मुक्तं चंद्रमिवालोक्य नममौस्वात्मनि प्रभुः।

अंके चकार विश्वात्मा दीर्घदुःखापनुत्तये।

स्वशेषभूतं सुमुखं दूरदेशादुपागतम्।

आत्मार्थं मुक्तसर्वस्वं स्वस्मिन् सर्वस्वमानिनम्।

विज्ञातस्वात्म संबंध प्रेमातिशयसंप्लुतम्।

प्रियं धीरं महाशूरं सुपुत्रमिव सस्वजे।

अंकेनिवेशितं भूयः प्रेमसंभिन्न लोचनम्।

स्वसमानवयोवेष रूपलावण्य भूषितम्।25



www.kriyasagaram.in

बभाषे भगवान् कोसि कस्यासि कमलेक्षण।

एवं पृष्टस्तदाप्राह बृह्मास्मीति न संशयः।

बृह्मत्वं ते कुतोयस्मात् त्वं शेषोसीति केशवः।

अहं विशेषणीभूतो विशेष्य त्वमसि प्रभो।

त्वयाविना न मे नाथ संस्थितर्हि मनागपि।

त्वं मे संधारकस्वामि प्रेरकस्सर्वबुद्धिदः।

अतो बृह्माहमस्मीति विज्ञातम् गुरु वाक्यतः।

तवैवास्मी तवैवास्मी तवैवास्मीति निश्चितम्।

वत्स! कस्मान्न संप्राप्तः किंकुर्वन् भुविसंस्थितः।

नाना प्राकृतदेहेन संबद्धः केनहेतुना।30

त्वच्छेषतां परित्यज्य देहोहमिति मंदधीः।

अंतर्गत महत्वम् अहं त्वांचनाविदं पुरुषोत्तमम्।

यमात्मानं मन्यमानस्तस्य चान्नेनसंस्थितिः।

अहमन्नमयोजातो ह्यन्नार्थम् कृतवान् गतिम्।

भोग्यमन्नं शरीरं च मत्वा त्वत्तःपराङ्मुखः।

तच्चिंतया हतस्स्वार्थात् कीनाशवशगोऽभवम्।

स्त्रीभोगं कृतवान्नाथ त्वद्दास्यरस विच्युतः।

तेनाहं दुःखजालेन संवृतःकमलापते।

कुतश्श्रीमदपुष्टानां  रोचते भगवत्कथा।

यथा हि विषदुष्टस्य शर्करा कटुकायते।35

काचकामलदोषेण शंखः पीतःप्रतीयते।

अंतर्गतस्तथा त्वं च प्राकृतैर्नावलोक्यसे।

मयाऽवमानितस्स्वात्मा दुर्मानानीत तंद्रिणा।

तेनाहं नरकाखात मभोज्यं यातनामयम्।

बृह्मन्ननेक जन्मानि न सौख्यं लब्धवान् क्वचित्।

अत ऊर्ध्वावरोहेण खेदजालमुपागतः।

वत्स! तस्मात्कथं मुक्तो घोरसंसारसागरात्।

मायारशनया बद्ध स्त्रिगुण्या दुर्वितर्कया।

भगवंस्तव निर्हेतुः दययागत बंधनः।

उत्तिर्णोस्ति भवांबोधिम् दुस्तरं त्वत्कृपां विना।40

करिष्ये चरणद्वंद्वे कैंकर्यं देवकेवलम्।

दासभूतस्तवैवास्मि सर्वावस्थासु माधव।

दास्यमेवस्वरूपं मे तत्यक्त्वा बंधनंगतः।

दास्यभावनया भूयो भावयन् दासतां निजाम्।

प्राकृतं योगमुत्सृज्य भवत्सेवानुरूपकम्।

संप्राप्तोस्मि निजंरूपम् निर्गुणं प्राकृतेःपरम्।

जनोऽयं निर्गुणत्वात्तु निर्गुणम् समुपैति हि।

अतोहं निर्गुणंदास्यं करिष्ये निर्गुणःप्रभो।

एवं विनिश्चयंश्रुत्वा त्यक्तवैश्वर्यस्य सर्वतः।

मुक्तकैवल्य भावस्य प्रपन्नस्य महामते।45

आविश्चकार वदनोल् लासमंतिमसत्फलम्।

प्राप्येषु परमंप्राप्यं भोग्येषु परमंमतम्।

नातःपरं कृपाविष्णोः मुखोल्लासोवधिस्स्मृतः।

एतदंतस्समाम्नायो बृह्मं ते व्याहृतो मया।

बृह्मं ते सृष्टिव्यापार मंतेन सफलं पुनः।

मन्येहंपरमैकांती भूत्वा मामुपयास्यसि ।

अहमेकांतिनोस्म्यात्मा ममात्मा स प्रकीर्तितः।

तेनैव मम देशोयं स नाथो जायतेध्रुवम्।

लक्ष्मीर्देवी ततस्त्वेनं कृपांकृत्वाऽवलोकयत्।

पुत्रवत्तमुपाघ्राय ममार्ज मुखपंकजम्।50

सत्सखिन्नोसि बहुशः संसारायत यात्रया।

धन्योसि शरणंगत्वा संप्राप्तोसि निजास्पदम्।

निवसत्स्वं महाभाग यथेच्छं पितृवेश्मनि।

उक्त्वैवमनुरागेण स्तन्येनैवाभिषिच्य तम्।

कुरु कल्याणकैंकर्य मावयोरनुरूपतः।

स्वाधिकारं ददौ तस्मै मुक्ताय परमेश्वरी।

पुरस्तात्तुमशक्तं तं रूपलावण्यधर्षितम्।

लक्ष्मीप्यन्वेषयन्पश्चात् तत्रापि प्रभया पुनः।

मुष्टस्सौंधर्यमालोक्य जगाम शरणम् तयोः।

कृपया संस्थितःपार्श्वे नत्वा कृत्वा प्रदक्षिणम्।55

स्वरूपानंद निर्भिन्नो धन्यो  धन्योहमब्रवीत्।

परबृह्मपदं प्राप्तो यतो नावर्तते पुनः।

एष ते कथितो बृह्मन्! मार्गस्संवसतेर्हरेः।

गच्छंति वैष्णवानूनं तद्विष्णोःपरमं पदम्।

अर्चिरादिगतिश्चैषा वैष्णवानां महामते।

कर्मिणोनैव गच्छंति योगिनोनैव पद्मज।

परमैकांतिनांह्यैष स्मृतःपंथा न संशयः।

अनेनैव च मार्गेण द्विपरार्धायुषःक्षये।

मामेवैष्यसि देवेश मद्धर्म निरतो भव।

तदाज्ञया धृतश्चैषा दासवेषोमयाद्विजाः।60

अनुसंधानसंसिद्ध्यै द्वयमन्त्रधरो भवम्।

भवतामपि श्रीविष्णो राकाङ्क्षा यदि दर्शने।

तदा तापादिकं कृत्वा बृह्मास्मीति विचिंत्यताम्।

नारायणोपदिष्टंवो ज्ञानमुक्तं द्विजोत्तमाः।

किं भूयः श्रोतुमुत्कण्ठा वर्तते भवतां हृदि।

अंतर्हितस्तदा देवः शंखचक्रगदा धरः।

स रहस्यं परंज्ञानमुपदिश्य विशेषतः॥63 1/2

इति श्रीबृहद्बृह्मे त्रितीये- **<u>योगपीठवर्णनम् नाम।</u>**

षष्टोऽध्यायः

<u>समाप्तोयं बृह्मनारायण सम्वादः</u>

श्रीः

श्रीमतेरामानुजायनमः

त्रितीये सप्तमोऽध्यायः

**<u>सदाचारनिरूपणं(आह्निककाण्डं)</u>**

मुनय ऊचुः-

वयंधन्या वयंधन्या वयंधन्याः पितामह।

येषां नो भगवान् साक्षादुपदेष्टात्मनः पदम्।

किं रहस्यं परंज्ञानं उपदिश्यविशेषतः।

नारायणोगतो बृह्मन् तन्नश्शंसितुमर्हसि।

श्री बृह्मोवाच-

तत्वत्रयात्मकं ज्ञानं रहस्यं धर्म उच्यते।

यमलब्ध्वा नरोपैति यत्पदं कालवर्जितम्।

श्रुतिस्मृत्युदितं धर्मं योनाचरति मूडधीः।

शुनस्समानं पुच्छेन भवाब्धिं तर्तुमिच्छति।

धर्ममूलमिदं सर्वं धर्ममूलं जनार्दनः।

धर्मेणनीयते तस्मात् स्वंमूलं प्रतिमानवः।5

अयमेवपरोधर्मो येनगम्यो भवेद्धरिः।

येन न प्राप्यतेविष्णुः सधर्मोमूलविच्युतः।

हरिस्सर्वस्वरूपेण सर्वात्मकतयास्थितः।

अलक्ष्यस्तिष्ठते विप्राः प्राप्यते तेन संयुतः।

न तदस्ति विना यत्स्यात् तेन भूतं चराचरम्।

अतःप्राप्यतरं गम्यं भोग्यमस्ति हरिस्स्वयम्।

बृह्मैव प्राप्यते विप्राः स्तस्य तस्य स्वरूपतः।

अनित्यत्वात्पदार्थानां सा प्राप्ति स्साधुनेरिता।

ससीमंसाधिकं सर्वं मायाकार्य मशेषतः।

प्रकृतेःपरिणामोयम् सगुणःकार्य निर्मितः।10

प्राकृतानां च जीवानामत्रैव न सुखराशयः।

मन्यंते ते नरास्तेन ह्यात्मनोमोक्षमेव हि।

प्राप्यं भोगमनंतं च तेन जातं मुनीश्वराः।

तदर्थमाचरंती ह धर्मानेव विशेषतः।

आदौ कळेबरं प्राप्यं जायाप्राप्यतयामता।

पुत्रःपौत्रः प्रपौत्रश्च धनं विद्या यशःकुलम्।

क्षेत्रंसद्मामहीराज्यं विजयः कामकौतुकम्।

प्रतापोह्यहतैश्वर्यं रूपयौवनभूतयः।

स्वर्गोदेवाधिपत्यं हि पूज्यत्वं बलपौरुषम्।

परिचित्तज्ञता सत्यसंकल्प स्सर्वतोगतिः।15

निर्द्वंद्वत्वमधीनत्व मित्याद्यामुष्मिकंचनः।

प्राप्यं भोग्यं च गंतव्यं मन्यं ते बलपौरुषम्।

प्राकृतेर्गुणचित्तेषु विभ्रान्तास्यभावतः।

इदं ग्राह्यमिदंग्राह्यमिति धावंत्य वस्तुनि।

प्राप्तिमस्यापिधर्मेण प्रवदंति मनीषिणः।

अप्राप्यप्राप्तिरेवेयं हित्वा निस्सीममव्यय।

निवृत्तिमेववेदोय माहास्य क्षणविच्युतेः।

तथाप्यनित्यवस्तूना मनुरागवता मिह।

संताप्यह्यात्मनोमार्गं प्रवृत्तिमनुशास्ति हि।

बालानामिव संगोप्यमणिंका च मणिं नृणाम्।20

धर्मःप्रवृत्तिमार्गाख्य एको राजस तामसः।

निवृत्तिमार्गस्सत्वाख्यो द्वितीयो भगवत्प्रियः।

नारायणपरोधर्म स्स च भागवतो मतः।

ज्ञानपूर्वस्वभवति जीवानां मोक्षसिद्धये।

प्राप्यभोगतया विष्णोः ज्ञानं ज्ञानविधो विदुः।

साध्यसादनरूपं हि विष्णुरेवेति वा पुनः।

अविच्छिन्नसुखं बृह्म दिव्यानंतगुणास्पदम्।

सर्वशक्तिमदव्यक्तं सर्वज्ञं सर्वकामदम्।

तदर्थमेवकर्तव्यं सात्विकं प्रेमवृद्धये।

प्रेम्णायत्क्रियते पश्चात् परमैकांतिकं हि तत्।25

सात्विकंवैष्णवं नाम प्राहुः प्रेमसमृद्धये।

साध्यसाधनभूतोयं प्रतिबंधकनाशनः।

प्रेमात्तरं तु यत्कर्म साक्षात्तत्प्राप्तिकारणम्।

वक्ष्येहं मुनयस्तावत् सात्विकं देहशोधनम्।

तत्रादावाह्निकं कर्म वैष्णवोचितमुच्यते।

आप्राबोधम्महाभागाः प्रस्वापांतमशेषतः।

प्रतिबुध्यनिशाप्रांते हरिनामावळिं जपन्।

श्रीगुरोश्चरणांबोजम् चेतसा चिंतयन् मुहुः।

स्वरूपं दिव्यलीलां च पार्षदान् स परिच्छदान्।

विमुक्तिमण्डपं देवीं पद्मजां प्रणमेद्धुदः।30

प्रपन्नमात्मनोरूपं प्राप्यं कैंकर्य मच्युतम्।

स्वातन्त्र्यं स्वामिनस्तस्य पारतंत्र्यं विचिंतयेत्।

महाकारुणिकं देवमात्मानमपकारिणम्।

स्वामिनं विद्ययायुक्तमविद्यानिलया तथा।

स्वकर्तृत्वं विनिर्धूय कर्तारमनघं हरिम्।

दास्यंकरिष्यमनसा वचसा देहकर्मणा।

दासोहं मनसा चैव वचसा नैच्यभावनम्।

कर्मिणां मंदिरालेपनेकाऽलंकरण क्रियाः।

नाहमन्यत्करिष्यामि श्रीशसंबंध वर्जितम्।

देहयात्रामपि हरे नैव संबंधवर्जिताम्।35

नादा स भावनं वाचा मनसापि च संस्पृशे।

नादा सद्वेषं कृच्छ्रेपि करिष्ये दीनवत्सल।

संसारसर्पभीतोऽह मनन्यशरणो भवम्।

इति संकल्प्य पूतात्मा प्रक्षाळ्य चरणामुदा।

रात्रिवासः परित्यज्य शुचौ स्वासनमात्मनः।

पातयेत्तत्र चाधारशक्तिं स्मृत्वा नमेद्धुवः।

आचम्य केशवाद्यैश्च भूतशुद्धिं च संस्मरेत्।

श्रीवैकुण्ठपार्षदांश्च नित्यमुक्तान् विचिंतयेत्।

परंपरान् गुरून् स्मृत्वा न्यासध्यानं विधाय च।

प्रजपेन् मन्त्रराजं च द्वयमन्त्रं विशेषतः।40

पठेच्च पौरुषं सूक्तं श्रीसूक्तं नामकीर्तनम्।

महापुरुषविद्यां च दासोहमिति भावयेत्।

दासोहं स्वामिसेवार्थं देहयात्रां विधानतः।

प्रवर्तयिष्ये सततं प्रीणा तु पुरुषोत्तमः।

प्रागेवसूर्यसंदर्शा च्छिरः प्रावृत्य वाससा।

नैरृत्यां गृहतो दूरं गच्छेन्मलविमुक्तये।

अयज्ञीयैरनार्द्रैश्च तृणैस्संछाद्य मेदिनीम्।

निरुच्छ्वासो गतालापो मलमूत्रं परित्यजेत्।

दिवासंध्यासु कर्णस्थ बृह्मसूत्र उदङ्मुखः।

कुर्यान्मूत्रपुरीषं तु रात्रौचेद्दक्षिणा मुखः।45

पवित्रमुपवीतं च दक्षिणे श्रवणे द्विजाः।

मलमूत्रपरितित्यागे कुर्यान्नियत मानसः।

दर्भस्थानानि विशेषेषु पवित्रत्वं प्रयाति हि।

चक्रं प्रच्छन्नमन्यच्छ बाहुमूलेतु धारितम्।

छायायामंधकारे च रात्रावहनिह द्विजाः।

यथासुखमुखःकुर्यात् प्राणभाधा भयेषु च।

गृहीत्वा जलपात्रं तु विण्मूत्रं कुरुते यदि।

तज्जलं मूत्रसदृशं पीत्वा चांद्रायणं चरेत्।

मलमूत्रं त्यजेद्विप्रोऽकृत्वा कर्णे च सूत्रकम्।

मलवत्तत्परित्यज्य नवसूत्र धरो भवेत्।50

उत्तार्य तुलसीकंजमाले वैष्णवसत्तमः।

मलमूत्र परित्यागं नैत्यिकं तु समाचरेत्।

सूतके प्रेतकार्ये च तैलाभ्यंगे च भोजने।

शयने तुळसीमालामधृत्वैव समाचरेत्।

गृहीतलिंगमन्यत्र मृद्भिरभ्युद्धरेज्जलैः।

गंधलेप क्षयकरम् नित्यं शौचमथाचरेत्।

यस्मिन् देशे तु यत्तोयं या च यत्रैव मृत्तिका।

सैव तत्र प्रशस्तस्यात्तया शौचं विधीयते।

तीर्थेशौचं न कुर्वीत न तत्रोद्धृत वारिणा।

अरत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनुद्धृतैः।55

आपद्येतत्प्रकर्तव्यं पात्राभावेन वै सदा।

पश्चात्तच्छोदयेत्तीर्थं मन्त्रैर्जल विलोदनैः।

विभीतकमितादेया मृण्मूत्रोत्सर्ग कर्मणि।

आर्द्रामलकमात्रं वा मूत्रशौचे तु मृत्तिका।

एका लिंगे करेतिस्त्रः पादयोर्मृत्तिकाद्वयम्।

मूत्रशौचम् समाख्यातम् शुक्रशौचं निबोधत।

मूत्रात्तद्विगुणं शुक्रे मैथुने त्रिगुणं भवेत्।

एवं शौचं भवेत्पुंसाम् मलमोक्षे निबोदत।

तिस्त्रोऽपानेऽथवा पंच सप्तवेति ध्वजे पुनः।

एकं वाऽथद्वयं वा स्यात् करयोर्दशमृत्तिकाः।60

विंशतिर्वा भवेद्विप्राः पादयोस्सप्त सप्त च।

चतस्त्रस्तु मृदो देयाः कृत्वा तु सुख शोधनम्।

एतच्छौचं गृहस्थानां तथा गुरु निवासिनाम्।

द्विगुणं स्याद्वानस्थानां यतीनां त्रिगुणम् भवेत्।

स्त्रीशूद्रयोरर्धमानम् शौचं निशि तथास्मृतम्।

पादशौचं पथिभवे देष शौचविनिश्चयः।

धारया च न कर्तव्यं शौचं शुद्धिमभीप्सुना।

चुळकेनैव कर्तव्य हस्तशुद्धिर्विधानतः।

मूत्रोत्सर्गं द्विजःकृत्वा न कुर्याच्छौचमात्मनः।

मोहात्सतु त्रिरात्रेण जलंपीत्वा शुचिर्भवेत्।65

भुंजानस्यगुदस्त्रावो यदिस्याद्वायु वेगतः।

ततःकृतोपवासस्तु पंचगव्येन शुद्ध्यति।

शौच यत्न स्सदाकार्यो वैष्णवेन विशेषतः।

आराध्यते यतो विष्णुः साक्षात्कैवल्य भाजनः।

शौचाचार विहीनस्य समस्ता निष्फलाः क्रियाः।

कैंकर्यार्थं भगवतो देहशुद्धिं समाचरेत्।

देहशुद्धिर्विधिर्ज्ञेया स्वभावाच्छ निमित्ततः।

स्नानादौतु स्वभावेन स्पर्शादौस्यान्निमित्तजा।

वसा शुक्रमसृङ्मज्जा मूत्रविट्कर्णविण्णखाः।

श्लेष्माश्रु दूषिका स्वेदो द्वादशैता नृणां मलाः।70

तेषांचाऽथविशुद्ध्यर्थं स्नानं मृद्गोमयांबसा।

मन्त्रैस्तीर्थोदकैःकुर्यात् प्रत्यहं भगवत्परः।

तीर्थादौ स्नानशुद्ध्यर्थं गत्वा पादौ विशुध्य च।

वल्मीकाश्वत्थ वाराह खातादाहृत्य मृत्तिकाम्।

मृदमादाय मूलेन गायत्र्या प्रोक्ष्य साधकः।

द्विधाकृत्य सरित्तीरे भागैकं तु निधाय च।

भागैकेन शरीरस्य शुद्धिं कुर्याद्विचक्षणः।

मलस्नानमिदं प्रोक्तं प्राणायाम त्रयं चरेत्।



www.kriyasagaram.in

ध्यात्वा श्रियासमासीनं भूमिस्थं भागमाहरेत्।

तं विभज्य त्रिधामंत्री शुद्धिमिच्छन् सदैहिकम्।75

मणिबंधे पाणितले चांगुळीषुनिवेशयेत्।

तलस्थभागं संप्रोक्ष्य मूलेनैवाभिमंत्र्य च।

अस्त्रमन्त्रेणदिग्बंध माचरन् भ्राम्यपातयेत्।

अङ्गुळीस्थानभागेन कट्यधस्ताद्विलेपयेत्।

मणिबंधस्थभागेन हृदयादूर्ध्वमुल्लिखेत्।

तोये तीर्थं प्रकल्प्याथ स्नायाद्देवमनुस्स्मरन्।

स्नानांगभूता संशुद्धि नित्यस्वाभाविकी मता।

मनुष्यास्थीव संविष्ठा मार्तवं मूत्ररेतसि।

अजीर्णं शोणितं चापि परस्य यदि संस्पृशेत्।

स्नात्वा प्रमृज्य चेलादीनाचम्य स शुचिर्भवेत्।80

तान्येवस्वानि संस्पृष्ट्वा समानं शौचमाचरेत्।

अवैष्णवस्य संस्पर्शो भाषणं पङ्क्तिभोजनम्।

अधोगतिं नयत्येव तस्मात्तं परिवर्जयेत्।

चरणामृतपानेन विष्णु नामासु कीर्तनात्।

श्रीवैष्णवांघ्रिसंस्पर्शा दात्मनश्शुद्धिमाचरेत्।

अपवित्रः पवित्रो वा सर्वावस्थांगतोपि वा।

संस्मरन् पुण्डरीकाक्षं सद्यश्शुद्धिमवाप्नुयात्।
अतो भागवतं तीर्थं तीर्थं भगवतोपि हि।
समं पश्येत्तु महिमान् शुद्धिकामे विशेषतः।
वैष्णवस्य तु विप्रस्य शंखचक्रांकधारिणः।85
पादोदकं च निर्माल्यं निषेव्य शुचिनां व्रजेत्।
स्नानशुद्धिर्भवेदस्य यदा पादोदकं स्वके।
विप्रस्य विष्णुभक्तस्य यस्स्नेहादेव धारयेत्।
एवंशुद्धिं विधायादौ मृदामन्त्रैश्च वैष्णवैः।
श्रीशार्चनांगभूतं च स्नानंकुर्यात्सरिज्जले।
स्वशाखोक्तविधानेन कुशानादाय वारिना।
स्मृत्वा भगवतोरूप मात्मानो दासरूपतां।
प्रातरुत्थाय यो विप्राः वैष्णवस्नानमाचरेत्।
सर्वपाप विनिर्मुक्तो याति विष्णोःपरं पदम्।
अस्नात्वा नाचरेत्कार्यं जपहोमादिकिंचन।90
क्लिद्यंति हि सुषुम्नादीनींद्रियाणि क्षरंति हि।
दंतधावनादिकंकर्म स्नानात्पूर्वं समाचरेत्।
तं कृत्वा तु यस्स्नाति तस्नानं तु निष्फलम्।
अविद्वान् स्नानकाले तु यः कुर्याद्दंतधावनम्।


www.kriyasagaram.in

पापीयान् रौरवं याति विष्णुशापहतो धृवम्।

आराधने भगवतो मुखात्पूतिं समुत्सृजन्।

दासः किल्बिषमाप्नोति प्रतिकूलमथाचरन्।

प्रक्षाळ्यपादौ हस्तौ च मुखं च सु समाहितः।

दक्षिणंबाहुमुद्धृत्य कृत्वा जान्वन्तरा ततः।

तिक्तं कषायं च तथा कटुकं कण्टकान्वितम्।95

क्षीरिणो वृक्षगुल्मादेर् भंजयेद्दन्तधावनम्।

द्वादशांगुलमानं स्यात् विप्राणां दन्तधावनम्।

क्षत्रविड्छूद्रजातीनां नव षड्चतुरंगुलम्।

चतुरंगुलमानंस्या न्नारीणां दन्तधावनम्।

नैऋत्यां निक्षिपेत्काष्टं दन्तोल्लेखं विधाय च।

इष्टकालोष्ट पाषाणान् नखैरंगुलिभिस्तथा।

मुक्त्वा चाऽनामिकांगुष्ठौ वर्जयेद्दन्तधावनम्।

दक्षिणाभिमुखोनाद्यान्नीलं दवकदंबकम्।

तिंदुकेंगुद बंधूक मोचार्क स्नुहि जम्बुकम्।

कार्यं न दन्तकाष्ठम् च श्रीकामस्सततं त्यजेत्।100

नादण्डं न त्वचाहीनं नाप्रशस्त तरूद्भवम्।

स्नुहि किंशुकश्यामाक शाल्मली निम्ब गुग्गुलान्।

करंजकोविदारांश्च वर्जयेद्दंतधावने।

श्लेष्मातक शमीपीलू पिप्पलं तिलकं तथा।

श्रीगु निर्गुण्डित्वकासार करवीर शिरीषकम्।

बदरींचैव चिंचां च वेणुपालाश शिम्शुपम्।

वर्जयेत्कुशकाशा च मालतीमपि वैष्णवः।

कुशकाशपलाशांश्च शिंशुपां यस्तु भक्षयेत्।

तावद्भवति चण्डाळो यावद्गङ्गां न पश्यति।

पालाशमासनं यानं दन्तकाष्ठं च पादुके।105

वर्जयेत्तु प्रयत्नेन शमीमश्वत्थ मेव च।

पूतीगंधाम्लमधुरं सच्छिद्रं दन्तधावनम्।

अज्ञातपूर्वं पत्राढ्यं युग्मवर्णं तु वर्जयेत्।

सकामैः कामनायोगा दकामैर्विधृतानि हि।

वर्जन्यपि द्विजश्रेष्ठा विचिंत्यानि मनीषिभिः।

अपामार्गप्रशस्तोयं दन्तधावन कर्मणि।

तदभावे तु शस्तानि काष्टानि द्विजसत्तमाः।

कुशकाशपलाशं च शीग्रु शिंशुपकानि च।

वर्जयेदंगुळिं चापि दन्तशुद्धौदिनोदयम्।

अंगारवालुकापर्णं तृणवस्त्र नखादिभिः।110

न कुर्याद्दंतकाष्ठं च वैष्णवो दूषिते दिने।

श्राद्धाहे जन्मदिवसे व्रतेचैवोपवासके।

द्वादश्यां रविवारे च चंद्रनाशे च वर्जयेत्।

नंदा सु च नवम्यां च द्वादश्यां भौमवासरे।

दन्तकाष्ठं न कुर्वीत चामायां तु विशेषतः।

काष्ठाभावादिने शुद्धिंकुर्यात् पर्णादिभिर्द्विजः।

जिह्वोल्लेखस्तु कर्तव्यः काष्ठेनापि सदैवहि।

अलाभे दन्तकाष्ठानां निषिद्धायां तिथौ तथा।

अपां द्वादशगण्डूषैर्विदध्याद् दन्तधावनम्।

प्रक्षाळ्य भक्षयेत्काष्ठं प्रक्षाळ्येनविसर्जयेत्।

मन्त्रेणैव तरोर्ग्राह्यं दन्तकाष्ठं विपश्चिता।115

"आयुर्बलं यशोवर्चः प्रजाःपशुवसूनि च।

बृह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते।"

पतितां त्यज पाषंडि देवाजीव रजस्वलाः।

भिषक्पातकिचंडालान् न पश्येद्दन्तधावने।

हरिनिंदारतो नित्यं शंखचक्र विदूषकः।

जलं च दंतकाष्ठं च तद्दत्तं नैव संस्पृशेत्।

भगवत्सन्निधौ कृत्वा दंतकाष्ठं तु वैष्णवः।

प्रसादबुद्ध्या गृह्णीयान् न स्वातंत्र्येण वैष्णवः।

दन्तान् विशोध्य मतिमान् स्वगुरुं चिंत्य चेतसा।

स पवित्रो विशेद्वारी स्नानार्थं साधकोत्तमः।120

कुशैःपूतं भवेत्स्नानमभावे काश उच्यते।

दूर्वा यवव्रीहिभिर्वा तुलसीपल्लवैस्तथा।

यावद्भगवतः पादपूतः तुलसिका भवेत्।

तावदन्यैः प्रकर्तव्यं स्नानं स्नानपरैर्द्विजैः।

कुशादीनामभावे तु क्रमात् काशादयो मताः।

कुश एव समाख्याता मुख्या स्नानादिकर्मणि।

न तथा तुलसीज्ञेया तदभावे समामताः।

न स्नानादिक्रियाकार्या तुलसीदळवर्जिता।

विष्णोःप्रसाद् जननी साक्षात्तुळसिका मता।

न तथा कमलादीनि कमला वा द्विजातयः।125

अनाकारित एवायं तुळसीकानने हरिः।

नित्यं निवसते विप्रा आशुचावपि भूतले।

**न यत्र तुळसीशाखा शुष्कं वा तुळसीदळम्।**

**विप्राणामपि तत्स्थानमासुरं परिकीर्तितम्।**

तुळसीविटपच्छायामाश्रित्य यजते हरिम्।

तस्यपुण्यस्य माहात्म्यं नाहंवक्तुमलंमनाक्।

तुळसीमूलमृत्स्नेयं महापातक नाशिनी।

यामुद्वहन्मृतोऽरण्ये मुच्यते यम शासनात्।

न तथा गोमयैश्शुद्धिः प्राशितः गव्यपंचकैः।

यथा तुळसिकामूलमृत्स्नायां शुचिता द्विजाः।130

ऊर्ध्वपुण्ड्रादिभिर्देहे धृतंचेत् तुळसीरजः।

मुच्यते भवपाशेन पादतीर्थाप्लुतं यदि।

द्विजादिभिस्सदा सेव्या तुळसीविष्णुवल्लभा।

सालग्रामशिलापूजायां विना नैवजायते।

तस्मादप्सु सदाधार्या स्नानकाले विशेषतः।

तुळसीमृत्तिकालेपे मार्जने तुळसीदळम्।

कुशास्तु नाभसाश्रेष्ठा यातया मानते मताः।

नियोज्यास्ते समस्तेषुकर्मसु अब्धांतमेव च।

मासे नभस्यमायां तु कृतो दर्भोच्चयस्तु यः।

शुचिर्भूत्वा शुचौदेशे स्थित्वा पूर्वोत्तरा मुखः।135

शुचिर्भूत्वा शुचौदेशे स्थित्वा पूर्वोत्तरा मुखः।

ओंकारेणैवमन्त्रेण कुशान् स्पृष्ट्वा द्विजोत्तमः।

*विरिंचिना सहोत्पन्न परमेष्ठि विसर्गज।

दहस्व सर्वपापानि दर्भस्वस्तिकरो भव।*

हुं अस्त्रायफडित्युक्त्वा भूमेर्दर्भान् समुद्धरेत्।

तैरेव सर्वंकुर्वीत विप्रो मन्त्रैश्च वैष्णवम्।

यावत्तीर्थं भवेद्यत्र तावदन्यत्र वारिणी।

न स्नायादमलप्रज्ञा आज्ञेयं मामकी द्विजाः।

स्नातुं संचिंतितम् तीर्थं सर्वे पितृदिवौकसः।

यांति पूर्वं स्नातृ दत्त तोय ग्रहणलिप्सया।140

ततोऽन्यद्यद्यसौगच्छेन्निराशास्ते शपंति हि।

देवखात नदीस्त्रोतस्सरस्सु स्नानमाचरेत्।

सत्स्वन्येष्वपि तीर्थेषु स्नायात्पादजलैहरेः।

सालग्रामशिलातोये योभिषेकं समाचरेत्।

स्नातस्यापि न संशुद्धि सर्वतीर्थेषु भूसुराः।

विना पादोदकं विष्णोः वैष्णवस्य विशेषतः।

अन्यतीर्थं भवतु वा मास्तु वा श्रूयतां वचः।

महाभागवतैधार्यं स्नाने पादोदकं हरेः।

संकुले तीर्थखातस्य न स्नायाद्दुष्टसंकुले।

दर्भहीनोऽन्यचित्तस्तु न नग्नो न शिखां विना।145

अवैष्णवेषु पश्यत्सु शाक्तकापालिकेषु च।

न स्नाया न्ना नयेन्नीरं पूजायै वैष्णवो जनः।

यावन्न दुष्टसंघातो नानादेवनिषेवकः।

आगच्छेत्तावदावायं स्नायाद्वासद्वयेन वा।

संशोध्य वैष्णवैर्मन्त्रैः जलेष्वावाह्य केशवम्।

पूतं विभाव्य चक्रेण स्नायादनवलोकयन्।

श्रीविष्णुचरणांबोज सृतपीयूषधारया।

प्लावितं तीर्थपानीयं विचिंत्य स्नानमाचरेत्।

तत्रैव विरजातोयं कीकटेष्वपि पुत्रकाः।

यत्र नारायणायेति नमसा प्रोच्छरेन्मनुम्।150

म्लेच्छदेशेऽशुभस्थाने खरमार्जालदूषिते।

ऊषितेऽवैष्णवैर्वापि नाम्नाशुद्धिःप्रकीर्तिताः।

पंच वा सप्तवा पिण्डान् स्नाया दुद्धृत्यवारिणीम्।

येनांबुदुष्कृतांशैस्नानकर्ता न लिप्यते।

रविसंक्रांति वा एषु ग्रहणेषु शशिक्षये।

व्रतेषु चैव षष्टीषु न स्नायादुष्णवारिणा।

न स्नायाच्छूद्रहस्तेन मध्यमांसनिषेविणा।

आहृतैरेकहस्तेन चोद्धृतैर्ब्राह्मणैरपि।

नाभिमात्रे जले गत्वा चास्त्रेणरक्ष्यसर्वतः।

प्राणानायम्य संचिंत्य तीर्थानि रविमण्डले।155

जले षट्कोणमुल्लिख्य बीजं मध्ये विचिंत्य च।

अष्टपत्रं बहिस्तस्य  पंकजं केसरोज्ज्वलम्।

विचिंत्याधारमारभ्य पीठदेवाननुत्तमान्।

स्वेष्टदेवं श्रियासार्धमावाह्य विमलेजले।

मानसैरुपचारैस्तु संपूज्य पुरुषोत्तमम्।

जले संचित्य तत्तेजो ह्यंतरीकृत्यमुद्रया।

अभिमन्त्र्यजलं विष्णुगायत्र्या प्रणवेन च।

अपो अस्मानिति स्मृत्वा इदंविष्णुरिति द्विजाः।

श्रीसूक्तं विष्णुसूक्तं च मूलविद्यां प्रयोज्य च।

संप्रोक्ष्य तुळसीयुक्तं मुद्रया कुम्भसंज्ञया।160

स्मरन् गुरुपदांबोजमंबसि स्नानमाचरेत्।

स्नात्वा चांतो वारिमध्ये त्रिःपठेदघमर्षणम्।

स्नानांगतर्पणं कृत्वा संध्यांकुर्याद् विधानतः।

जले जलेनपुण्ड्राणि कृत्वा द्वादश संख्यया।

शिखामाबध्यमूलेन गायत्र्या मौनमाश्रितः।

ओं लं केशवायनमः प्रोच्य तथा नारायणाय च।

माधवाय नमश्चैव माचामेत्सर्वकर्मणि।

गोविंदाय नमस्तद्वद्विष्णवे च नमो वदन्।

कपोलयोर्द्वयोश्चैव विदद्यात्परिमार्जनम्।

मधुसूदनाय नमो वदन् त्रिविक्रमाय च।165

ओष्ठयोस्स्पर्शनंकुर्यात् वामनश्रीधरौ तथा।

जेंतौ नमोंतौ ताराद्यौ ताभ्यां संमार्जयेत्तथा।

हृषीकेशेन करयोः पद्मनाभेन पादयोः।

जलेन स्पर्शनं कृत्वा मूर्ध्नि दामोदराय च।

मार्जयेत्कुशवारिभ्यामेभिरङ्गानि संस्पृशेत्।

वासुदेवस्संकर्षणः प्रद्युम्नश्चानिरुद्धकः।

पुरुषोत्तमोऽधोक्षजश्च नृसिह्मोऽच्युतरेव च।

जनार्दन उपेन्द्रश्च हरिःकृष्णश्च मूर्तयः।

आस्येनासित्वेकमेक मक्ष्णोर् द्वौ द्वौ च कर्णयोः।

हृदिनाभात्वथैकैकंमुदरे मस्तके तथा।170

भुजयोर्द्वाविति प्रोक्तो विधिराचमनेसुताः।

आचामेत्सर्वकार्येषु स्नाने दाने सुरार्चने।

संस्पर्शे भाषनेऽसत्सु भुक्त्वा पीत्वाथ चर्वणे।

रेतोमूत्र शकृण्मोक्षे ह्यधोवायु विमोक्षणे।

परिश्रमेऽनृते हास उच्छिष्टजनसंगमे।

उच्छिष्ठस्पर्शनेऽमेध्यदर्शने अश्रुपतने।

रक्तकेशमलस्पर्शे जृम्भायां स्वप्नदर्शने।

छीकाष्टीवनसंक्रोधेष्वाचामे च्छुद्धिकाम्यया।

उपक्रमोपसंहारे कर्मणोनीवबंधने।

केशवादिभिराचम्य सद्यश्शुद्धिमवाप्नुयात्। 175

यथाभिषेकजाशुद्धिः बहिरेवप्रजायते।

मन्त्रपूततलैस्तद्व दाचामेह्यंतरश्शुचिः।

प्राणायामं ततःकुयात् मूलेन प्रणवेन वा।

नारायणंस्मरन्देवमघमर्षणमाचरेत्।

शिखांमूलेन संबद्य स्वशाखोक्त विधानतः।

संध्यां कृत्वा हरिंध्यात्वा सूर्यमण्डलमध्यगम्।

सूर्यमण्डलमध्यस्थमरविंदकृतासनम्।

पीनायत चतुर्बाहु मुत्पलस्त्रजमच्युतम्।

दरारिगद्योपेतं उत्फुल्लकर पङ्कजम्।

श्रीनिकेतंश्रियं तद्वदनवद्य रुचिंस्मरेत्। 180

गायत्रीवारिनं स्नातो सस्मरेद्यदि केशवम्।

स लभेत्कर्मसंसिद्धिं येन याति हरिः पदम्।

अनर्हःकृतशौचोपि विना नारयणस्मृतम्।



www.kriyasagaram.in

तस्मात्सर्वत्रसंयोज्यं भगवत्स्मरणं सदा।

यदातिदूरमाख्यातं कर्मज्ञानविवर्जितम्।

तथाऽतिदूरमप्युक्तं विनाविष्णुस्मृतं द्विजाः।

गायत्रीवारिसंस्नातः प्रणवैर्निर्मलीकृतः।

विष्णुस्मरणसंसक्तोह्यर्हन् सर्वेषुकर्मसु।

प्रजपेद्विष्णुदैवत्यं गायत्रींवेदमातरम्।

अष्टाक्षरेणमूलेन ब्राह्मणश्शुद्धिकाम्यया।185

मुनय ऊचुः-

सवितादेवतादैव्या गायत्र्या श्रूयतेपितः।

कथं सा विष्णुदैवत्या संशयं नःपराणुद।

श्रीबृह्मोवाच-

आदित्ये पुरुषोयासौ हरिरेवेति निश्चितं।

आदित्यस्यशरीरत्वादभेदं श्रुतिरुज्जगौ।

सवितृ नामकोविष्णुः सवितृस्तो विचार्यताम्।

सवितादेवतातेन गायत्र्याख्याःप्यलेबुधैः।

न स्वतंत्रतयोदेवो गायत्र्यास्सवितामतः।

नारायणादेवसर्वोत्पन्नं श्रुतिरुज्जगौ।

तस्मान्नारायणस्वामि यत्किंचिद्दृश्यते जगत्।

अतो नारायणपरंज्ञानं कर्मतपश्श्रुतिः।190

सूर्येंद्राग्नीन्विधिं सोमं रुद्रंवायुं क्षितिंजलम्।

वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव च।

विभूतयोहरेश्चैता भद्रपीठतयास्थिताः।

तदभेदतयोपास्या मुमुक्षुभिरहर्निशम्।

शंखचक्र गदोपेतः किरीटकुण्डली तथा।

सूर्यमण्डलमध्यस्थस्सूर्याभेदेन चिंत्यते।

दीनां प्रवर्तकत्वं हि साक्षान्नान्यत्र युज्यते।

य आत्मनीतिवाक्येन हरिरात्मातया मतः।

गायत्र्याऽशेषभूताना मादित्यश्चक्षुरुत्तमम्।

इति पीठतया विष्णो रादित्यप्रतिपद्यते।195

यो यो यां यां तनुंभक्त श्रद्धयार्चितुमर्हति।

तस्य तस्याचलां श्रद्धां तामेव विददात्यजः।

स तयाश्रद्धयायुक्तः तस्याराधनमीहते।

लभते च ततःकर्मा हरिणाविहितान् हितान्।

अंतवत्तुफलं तेषां तद्भवत्यल्प मेधसम्।

देवान् देवयजोयांति भक्तायांति हरेर्हरिम्।

अव्यक्तं सर्वभूतस्थ मात्मानंत मबुद्धयः।



www.kriyasagaram.in

परंनैवाभिजानंति शरीरेष्वात्म मानिनः।

अतोनात्मनमात्मस्थं सत्य संकल्पमच्युतम्।

नित्यानंदगुणोपेतं सर्वज्ञमवधिं हरिम्।200

प्राप्यं भोग्यं परंब्रह्म प्राप्नुवंति कदाचन।

तस्मान्नित्यवदाकांक्षी गायत्रीं विष्णुदेवताम्।

आराधयति सर्वस्य विधिरेषद्विजातयः।

व्यापको भगवानेष व्याप्यं सर्वं चराचरम्।

न तदस्ति विना यत्स्याद् वासुदेवेन किञ्चन।

बृह्मशक्रश्च रुद्रश्च गणेशो भास्करस्तथा।

विचिंत्य वासुदेवस्य तनुभूता विभूतयः।

चतुर्भुजाश्शंखचक्र गदाजलजधारिणः।

नान्यं देवं नमस्कुर्या त्तच्छरीरतया विना।

पृथक्केनार्चयं तो वा मामकास्ते प्रकीर्तिताः।205

हरेःपीठा हरेर्दासा हरेशेषाद्विजातयः।

पृथग्भूताः कथंभूता उपास्या मुक्तिमिच्छताम्।

कैंकर्यंनाम देवस्य मुक्तिमिच्छंति तत्पदे।

कथं तैरितरेसेव्यास्तदीयत्व मतिं विना।207

इति श्रीबृहद्बृह्मे त्रितीय भागे सदाचारनिरूपणं

**(आह्निककाण्डं)नाम** सप्तमोऽध्यायः।



www.kriyasagaram.in

## बृहद्बृह्मसम्हितायाम् त्रितीये - अष्टमोऽध्यायः

## भद्रासनोपाख्यानं

बृह्मोवाच-

बृह्मनाथस्समभवत् पुरा वै मुनयोननु।

विस्मृतः किमिदानीतं संक्षेपात्प्रवदामि वः।

मुनिःकहोळःपप्रच्छ याज्ञवल्क्यं महामुनिम्।

आत्मशब्दस्समादिष्टः क्षेत्रक्षेत्रज्ञयोरपि।

बृह्मशब्दस्समाख्यातः क्षेत्रक्षेत्रज्ञयोरपि।

सर्वांतरश्चयस्साक्षादपरोक्षः प्रकीर्तितः।

तमाचक्ष्व महाभाग प्राप्यभोग्यतयास्थितम्।

उपास्यभूतं सर्वेषामात्मानं परमेश्वरम्।

याज्ञवल्क्य उवाच-।

क्षेत्रं क्षेत्रज्ञयोरात्मा परमात्मा प्रकीर्तितः।

शोकमोहजरामृत्यु द्वेवाधर्मावतीत्ययः।५

एतैस्संसृष्टमात्मानं क्षेत्रज्ञंचाप्यतीत्ययः।

नरस्थितो न विना येन क्षेत्र क्षेत्रज्ञयोर्मनाक्।

विदित्वाचैनमात्मानं ब्राह्मणास्स्वान्तरस्थितम्।

पुत्रवित्तैषणाहित्वा तथा लोकेषणमापि।

यदर्थं सकलं हित्वा कृत्वाऽनन्यप्रयोजनम्।

अनन्यसाधनं कृत्वा भिक्षार्थं च चरंति हि।

प्रेर्यमात्मानमाज्ञाय प्रेरकं पुरुषं परम्।

निर्विघ्नसर्वतस्तस्य चोपासां चक्रिरे द्विजाः।

चाक्रायण उषस्तस्तं भूयः पप्रच्छ साधरम्।

याज्ञवल्क्यं महात्मान मुपासार्थमकल्मषम्। १०

बृह्मन् बृह्मपरोक्षं यत्साक्षात्सर्वात्म संस्थितम्।

कथमस्योंतरामेति समाचक्ष्व यथा तथम्।

याज्ञवल्क्य उवाच-

यः प्रयोजकरूपेण सर्वंसर्वत्र जायते।

तत्साक्षादपरोक्षं हि शारीरात्मार्थ साधकः।

योऽपानितिह्यपानेनव्यानेन व्यानितीह्यपि।

उदानेनोदानिति च समानेन समानिति।

स आत्माह्यंतरस्सक्षाद्बृह्मा सर्वत्र संस्थितम्।

स एव सर्व नामासौ दृष्टिश्रवण चेतसाम्।

द्रष्टाश्रोताचेतयिता न तं पश्यतिकश्चन।

अतोद्रष्टाह्यदृष्टोयमश्रुतश्च श्रृणोति हि।15

अविज्ञातो हि विज्ञातोह्यमुतोमनुते मुने।

चिदचिद्भूत संघस्थं सर्वेषां स हि कारणम्।

एवं श्रुत्वांतरगतं भगवन्तं मुनीश्वराः।

संदिहानाःपुनस्तत्र ह्यपृच्छन्मुनिपुङ्गवम्।

याज्ञवल्ख्यं महाप्राज्ञ ! मात्मतत्वबुभुत्सवः।

कार्यजातमिदं सर्वं नैकरूपं कदाचन।

परिणामकृतानेक विचित्रावस्थयास्थितम्।

ओतंप्रोतमिदं कस्मिन् वटपत्परिनिष्ठितम्।

इति विज्ञातुकामा हि गार्गिवा चक्नवीपुनः।

पप्रच्छ कस्मिन् संप्रोतमोतमेतच्चराचरं।20

तामाह भगवन्वायापूतं वायुश्चकुत्र हि।

आकाशे सच कस्मिन् हि अंतरिक्षे निशामय।

कुत्रांतरिक्षं द्योलोके द्योलोकःकुत्र सत्तम।

आदित्यलोको कुत्रोयं चंद्रलोके च कुत्र सः।

नक्षत्रलोके कस्मिन् स देवलोके स कुत्र सः।

गंधर्वलोकेसोप्यस्ति कस्मिन्लोके प्रजपतेः।

लोकःप्रजापते गार्गी बृह्मलोके प्रतिष्ठितः।

स च कुत्रेति मा गार्गी ह्यतिप्रश्नं प्रयोजयः।

बृह्मण्येवाखिलाधारे ह्यूतं प्रोतमिदं जगत्।



www.kriyasagaram.in

तंतुष्विव पटोगार्गी तस्मादेष परोमतः।25

सद्रूपेण स्थितस्यास्य ह्युपादानतया हरिः।

निर्विशेषतयास्वस्मिन् स्थितं विश्वमशेषतः।

पटवद्याकरोत्येतन् नामरूप विभागवत्।

हर्यधीनतयाचास्य स्थितिर्नियमनं तथा।

तस्माज्जिज्ञास्य एवायमुपास्य सर्वधाऽस्य सः।

सूत्रभूतोऽयमेवैकस्तथा अंतर्यामिरूपतः।

स्थितस्सर्वत्रमुनयो हरिरेव न संशयः।

प्रविश्यांतर्यमयति सर्वभूतानि सर्वतः।

स्वव्याप्त्यै स्तैरविज्ञातश्शरीरैश्चिदचिद् विधैः।

उद्दालको याज्ञवल्क्यमपृच्छत्सूत्र मंतिकम्।30

तमंतर्यामिणं ब्रूहि याज्ञवल्क्यैत्यु वाचसः।

श्रुतं वेदवमाहात्म्यं कबंधात्काव्य सद्मनि।

सबृह्मदेवदेवात्म यज्ञवित्स्याच्छृणोति यः।

याज्ञवल्क्यस्ततः प्राणः सूत्रमुक्तमिहारुणे।

भूतानि सर्वाण्यङ्गानि प्राणादिव्यानि संति हि।

स च प्राणो महाभागास्संबद्धो ह्यंतरात्मना।

तमंतर्यामिणं ब्रूहि याज्ञवल्क्येत्युवाच सः।

अब्रवीद्याज्ञवल्क्योपि तमंतर्यामिणं द्विजाः।

पृथिव्यादिषु भूतेषु शरीरेषु व्यवस्थितः।

यो वेद तानिचैतानि तं विदुस्स्वनियामकम्।35

सोंतर्यामिह्यात्मभूतश्चामृतोऽव्यक्तनाम धृक्।

आदित्यचंद्रादि विद्युल्लोक प्राणेंद्रियेषु च।

वेद यज्ञेषु भूतेषु योऽंतर्यामयतिस्वयम्।

नैनं विदुश्शरीराणि यो वेदात्मतयास्थितः।

सोऽंतर्यामृतश्चात्मा परमात्मा हरिस्स्मृतः।

य आत्मनि स्थितोह्यात्मा शरीरं यस्यचेतनः।

आत्मा न वेदयमसौ वेदात्मानं परोऽमृतः।

यमयत्ययमात्मान मंतर्यामीति सस्मृतः।

अदृष्ट एव दृष्टासौ श्रोताचाश्रुत एव सः।

अविज्ञातैव विज्ञाता द्र्ष्टा श्रोताज्ञ एव च।40

नान्यस्स्वातन्त्र्य हीनत्वा च्छेषत्वात्तस्य सुव्रताः।

अतोऽन्यदार्थंसर्वं हि ऋतमेको हरिस्स्वयम्।

स्वतन्त्रस्सर्वशेषीति श्रुत्वारुणीरुपारमत्।

एवं विनिश्चयेजाते सर्वात्मा भगवान् हरिः।

संसिद्धस्सर्वभूताना मुपास्यस्सद्विभूतिषु।



www.kriyasagaram.in

सवितृनामको देवः प्रभामण्डल संस्थितः।

परमात्मा च शारीरः क्षेत्रज्ञोऽन्यो विधीयते।

गायत्रीसूर्यरूपेण भगवन्तमधोक्षजम्।

उपादिदेशभूतानां श्रेयसे बुद्धिबोदकम्।

सवितृसंस्थितो देवः सवित्रात्मा सनातनः।45

तं ध्यायेमपरं येन बुद्धयोनः प्रणोदिताः।

यथेंद्रप्राणादिशब्दैः निर्दिष्ठो भगवान् हरिः।

तथा सवितृशब्देन सवित्रात्मा विधीयते।

मुमुक्षवो विचार्यैवं सर्वत्र परमेश्वरम्।

उपासते न संदेहः कर्तव्यश्शास्त्रनोदनात्।

ब्राह्मणानां विशेषेण गायत्र्या मूलविद्यया।

उपास्यो भगवान् विष्णुरुदितो सूर्यमण्डले।

अष्टाक्षरोमूलविद्या प्रणवाद्यो मनीषिभिः।

निश्चितस्सर्वविद्यानां मूर्धन्यः परमो मनुः।

अष्टाक्षरेणसंयुक्तां  गायत्रीं विन्यसेत्तनौ।50

स एव वैष्णवो विप्रो मतो नारायणात्मकः।

विना मूलेन गायत्र्या  न विप्रो जायते द्विजः।

न विनोपनिषद्गानं गायत्र्यास्तत्वविद्भवेत्।

अविज्ञाय मनोस्तत्वं कर्मबंधाय केवलम्।

शतलक्षं प्रजप्तापि गायत्री नैव सिद्धिदा।

सिद्धिस्तु सर्वलोकस्य कर्तुस्सर्वाश्रयस्य हि।

वासुदेवस्य वैकुण्ठे पदपल्लवसेवने।

विप्रस्य सत्वदेहस्य वैकुण्ठपदकाङ्क्षिणः।

नान्योदेवस्समाराध्यो विनाऽऽवरण सत्क्रियाम्।

विष्णोरावरणत्वेन शरीरत्वेन वा पुनः।55

विभूतित्वेन भो विप्रा माननीया दिवौकसः।

समाधिकविचारेण पृथत्त्वेन दिवौकसाम्।

आराधनो जगद्बंधो न निवर्तेत कर्हिचित्।

विष्णोस्समत्वबुध्या च नरो निरयमाप्नुयात्।

विना दास्यं हरेश्चान्यत् सर्वं निरयसन्निभम्।

संसारो निरयःप्रोक्तो यत्र नाचार्यसेवनम्।

निरयोपि भवेन्मुक्तिर् यत्र गोविंदचिंतनम्।

अत्र गाधाः प्रवक्ष्यामि निस्संदेहाय भोस्सुताः।

नारायणात्परोनान्यः कोपि संसारनाशनः।

आसीद्भद्रासनोनाम राजा कोसलमण्डले।60

शशास वसुधां सर्वां पयोधिपटमण्डिताम्।

धार्मिको दययायुक्तो वृद्धब्राह्मण सेवकः।

सत्कीर्तिपटसंवीत समस्तक्षितिमण्डलः।

स कदाचिद्धरेःकोपात् नष्टराज्यो बभूवह।

शत्रुभिर्निर्जितस्संख्या जगाय गहने वने।

एकाकी जीवरक्षार्थं त्यक्तस्वजन बांधवाः।

तृषितः क्षुधितो दीनो निमग्नो दुःख सागरे॥

आसाद्य पुष्पभद्राख्यं नदीं गिरिसमाश्रयाम्।

तत्र बिल्ववने दीनो निवासमकरोच्चिरम्।

तत्र बिल्वेश्वरो नाम महादेवो विराजते।65

आयांति तत्र पूजार्थं मुनयो नित्यमेव हि।

पूजां कुर्वंति शतशो निजकामानुसारतः।

स्तुवंतिस्तुतिभिर्देवं हरं चंद्राङ्कमौळिकम्।

तत्रायं तरुजालेषु चकारतृण केतनम्।

फलमूलाशनो दीर्घ चिंताव्याकुलमानसः।

चिंतयामासमतिमान् कथं मे दुःख संक्षयः।

भवेद्दशेषस्वजनैः निर्मुक्तस्य दुरात्मनः।

क्वदाराः क्वसुताःप्रेष्ठाः क्वाराज्यं स्वप्नसन्निभम्।

क्व मे परिजनास्सर्वे कालेनकबळीकृताः।

अहोकष्ठमहोकष्टं विनष्टेषु पुनःपुनः।70

दावते मे मनोमोहान् मृगतृष्णोपमेषु च।

विजानतोपि मे सौख्यं ना याति क्षणमेव हि।

किं जीवितेन मे नूनमिहामुत्र च्युतस्य च।

मनो हि याति परमे देवदेवेरमापतौ।

न च राज्यसुखेकामे गतिरन्या भविष्यति।

पुष्पभद्रातटे राजा मरणेकृत निश्चयः।

बिल्वेश्वरं नमस्कृत्य निषसाद महीतले।

एवं चिंतयतस्तस्य गौतमो मुनिसत्तमः।

शिष्यप्रशिष्यस्संयुक्त आजगाम यदृच्छया।

पर्यटं तीर्थयात्रार्थं वसुधां विष्णुवल्लभाम्।75

स्नात्वा भद्राजले पुण्ये दृष्ट्वाबिल्वेश्वरं हरम्।

अपश्यं नृपतिंलीनमुटजे निर्जने मुनिः।

महाकारुणिको गत्वा तं पप्रच्छ तपोनिधिः।

क्वत्यस्त्वं कुत आयातः कोऽसि खिंनमना वने।

भया न केळिवा व्याळ व्याघ्र चित्रमृगान्विते।

निरन्ने निर्जनेदेशे कथं गतिरिहा भवत्।

भद्रासन उवाच-

भद्रासनेति विख्यातो राजा कोसलमण्डले।

शत्रुभिर्निर्जितोऽरण्ये भयादिह वसाम्यहम्।

जननं दर्शनाद्भीतःशत्रुचारविशंकया।

नान्तं दुःखस्यपश्यामि को भवानिह पृच्छसि-80

गौतम उवाच-

अहं तु गौतमोनाम्ना तव भाग्यादिहागतः।

स्मरस्व दुःखनाशाय शंकरंचोमया सह।

भुक्तिमुक्तिप्रदो देवो नान्योस्ति गिरिजादवात्।

यस्संहरति कल्पांते त्रिलोकीं लोचनानलैः।

भक्तानां वरदस्सद्यो बिल्वार्ककनकादिभिः।

ताण्डवैस्स्त्ववनैस्ताळै रक्षतैर्गळवादनैः।

विलंबित फलैर्देवैः किमन्यैरच्युतादिभिः।

सद्यस्ते राज्यलाभाय महादेवोऽवधारितः।

श्मशानशायी भगवान् स्त्रिनेत्रो नीललोहितः।

मृडोहिमांशुदवळो वनमालाकृतोरगः। 85

गजचर्मपरीधानः खट्वाङ्गायुध भूषणः।

शिथिकण्ठोग्रकण्ठश्च हारोंधकविनाशनः।

वृषध्वजो महादेवः चंद्रचूडो दिगंबरः।

ज्ञानतोऽज्ञाननिरतः पशुपःपार्वतीपतिः।

महादेवोधरादीशः पिनाकी पावकांबकः।

कपर्धीदुष्टदमनो महाकालो महातपाः।

समाधि संस्थितःकामदहनो धारणाश्रयः।

नित्योक्षरो निरातंको धीरो विषधरोभवः।

अरण्यवासी कैलास केतनोपटविष्टरः।

विभूतिभूषणोभूतिप्रदो भूतिकरो वरः।90

एवं नामावळीं जप्त्वा ध्यात्वा बिल्वेश्वरंहरम्।

राजन् बद्धांजलिं भूत्वा विनिवेद्य निवेदयेत्।

ओं नमःकालरूपाय हुंनमश्शूलपाणये।

महादेवायवीराय पार्वतीपतये नमः।

द्वात्रिंशदक्षरोमन्त्रो महाशत्रु जयस्स्मृतः।

न्यासार्चनमनेनैव कुर्यात्प्राणान्नियाम्य च।

शत्रुप्रशमनंस्तोत्रं श्रद्धया प्रपठेत्तु यः।

तस्य शत्रूकृतापीड विनश्यति न संशयः।

साङ्गं सावरणंदेवं बिल्वेशं पूजयेत्सदा।

सच भद्रासनोराजा प्रसादात्पार्वतीपतेः।

अकरोद्वसुधाराज्य मकण्ठकमयत्नतः।

महामन्त्रीवसकलं स्वसेन्येवनैव भूतपः।

भक्त्यारशनयाबद्धो कालेकालेऽभि रक्षति।

इति **भद्रासनोपाख्यानं** नाम अष्टमोऽध्यायः।

]

श्रीः

नवमोऽध्यायः -

**<u>परतत्व निरूपणम् ।</u>**

पार्षदा ऊचुः-

गते बहुतिथे कालेवसुधामनुशासतः,

शिवैकशरणस्यापि धार्मिकस्य महीपतेः।

ज्ञानं समभवत्तस्य दृष्ट्वा कालस्य चेष्ठितम्।

क्वगताः पितरोऽस्माकं तथाऽन्ये पितृबांधवाः।

नाम्नापि नैव श्रूयंते बहवोऽस्मद्विलोकिताः।

ममापिरूपसंपत्तिः क्वगता यौवनेस्थिता।

सामर्थ्यं क्वगतं यच्च परसैन्य विनाशनम्।

केशानैवोपलभ्यंते स्निग्धांजनविभा मम।5

क्वाननंकमलाकारं कुंदेंदु दवळद्विजम्।

सुंदर्यपाङ्गसंजुष्टं विकचंबुजलोचनम्।

स्वप्नोपममभूत्सर्वं कामिनी कामजं सुखम्।

तथापि निस्तृपंचेतो विषयेष्वनुधावति।

नाराधितोपि गिरिशो मया गौतमशासनात्।

मुक्तिं प्रयच्छतिप्रीतो महादेवो महद्द्युतिः।

तन्नपश्यामि मुक्तिर्मे ये न स्यात् कर्मणाधुना।

राज्यस्य सिद्धिस्संप्राप्ता मम यत्कृतवैर्हृतम्।

नात्मराज्यं हृतंमंदै रहोमोहनुगैर्बृशम्।

कथं तदुपलभ्येत प्रसादात्पार्वती पतेः।10

राज्यंकोशोबलं भोगः प्रतापःप्रतिवासरम्।

वर्धंते तेह्यलंगेहे वैराग्यं नैव दृश्यते।

संसारस्याभिवृद्धिर् मे पूर्वं भगवतः कृपा।

निश्चिताकोपरूपाद्यस्तेव मे प्रतिभाति हि।

अविच्छिन्नं सुखं यद्धि तदेव भगवत्कृपा।

विच्छिन्नरूपा मनसो वृत्तिःकोपो विनिश्चिता।

येनसंसाध्यते रत्नं सकाचंलभते यदि।

व्यर्थं हि सर्वं भवति विनोक्त फललाभतः।

कामुकेन मयापूर्वंआराध्येशः प्रसादितः।

पलालोपमराज्यार्थं नात्म तण्डुलकाम्यया।15



www.kriyasagaram.in

धिङ्मामकृत संबुद्धि मुमया सहितो हरः।

आराधितो मया मिथ्या मृगतृष्णांबु लिप्सुना।

अतोहं सकलं हित्वा सा शुतोषमुमापतिम्।

आराधयिष्ये सतत मात्मकामो महेश्वरम्।

एवं निर्बंधयुक्तस्य राज्यत्यागं प्रकुर्वतः।

आविरासीन् महादेवः कैलासादुमया सह।

अहमिंद्रस्तथाचान्ये सिद्धगन्धर्वकिन्नराः।

शिवेन सह संप्राप्ताः कुमारा नारदस्तथा।

कौतुकार्थां महाभाग! निर्विण्णस्य महीपतेः।

कथं सदाशिवोयोगी राज्ञो मुक्तिं विधास्यति।20

अंतर्हितास्थितास्सर्वे निजैश्वर्य विमोहिताः।

वृषध्वजो भवन्नेत्र पद्मयोरतिथिस्स्वयम्।

तं दृष्ट्वा सहसोत्थाय राजा हर्षसमन्वितः।

सूपविष्टं कृतात्तिथ्यं कृतांजलिरभाषत।

वासुदेवमहादेव वृषभध्वज गोपते।

नैवं विधोऽहमाराध्यस्संसारान्मोक्षमिच्छता।

आत्मा मेह्यपरो राजन्! यस्सदाशिव संज्ञितः।

येनाहमखिलं कर्मकरोमि तनुसंस्थितः।

तं विना नैवपश्यामि क्षणमेकांतिनां गतिम्।

अनुविश्यचमेवाचं चक्षुश्श्रवणनासिकम्।

प्राणापानमनोबुद्धि चित्ताऽहंकारणानि च।

सर्वंकारयति प्राज्ञो भूत्वा सर्वप्रयोजकः।

परमात्मासचास्माक ममृतश्शाश्वतो हरिः।3०

चंद्रचूडाभवानीश कर्तव्यं किमिहस्ति ये।

भुक्तिमुक्तिप्रदं देवंगौतमस्त्वमभाषत।

भुक्तिस्तु देवदेवेश लब्धा मे त्वत्प्रसादतः।

मुक्तिमिच्छामिसंसारा दतस्त्वां शरणंगतः।

उपासनं करिष्येऽहं भवतो हि समाधिना।

अनुमोदय विश्वात्मन्ननुज्ञां दातुमर्हसि।

श्री महादेव उवाच-

नैवं विधोऽहमाराध्य स्संसारान्मोक्षमिच्छता।

आत्मामेह्यपरो राजन्! यस्सदाशिव संज्ञितः।

येनाहमखिलंकर्मकरोमि तनुसंस्थितः।

तं विना नैवपश्यामि क्षणमेकांतिनां गतिम्।

अनुविश्यचमेवाचं चक्षुश्श्रवणनासिकम्।

प्राणापानमनोबुद्धि चित्ताऽहंकारणानि च।

सर्वंकारयतिप्राज्ञो भूत्वा सर्वप्रयोजकः।

परमात्मासचास्माक ममृतश्शाश्वतो हरिः।30

अहंसचास्मीयोवै सचाप्यहमनुस्स्मृतः।

तं मां विज्ञाय सुधियस्सेवंते बंधमुक्तये।

नाहंकैवल्यदो राजन्! परतंत्रस्वभावतः।

स्वतन्त्रस्सर्वभूतात्मा परमात्मा रमापतिः।

त्वंचाऽहं च सुरास्सर्वे तनवःपरमात्मनः।

तमात्मत्वेन सर्वेषां विजिज्ञासविमुक्तये।

स्वस्वरूपस्य संप्राप्तिमुक्तिमाहुर्मनीषिणः।

सत्त्वमात्मनिनिर्धिष्ठं यदायत्तमिदंजगत्।

यत्सत्वमात्मनिप्रोक्तं तदाधेयतयास्थितं।

विधेयत्वेन निर्दिष्ठं शेषत्वेन प्रजापतेः।35

आधारत्वेन स्थितोयो विधातृत्वेन वा पुनः।

शेषित्वेन च राजेंद्र सचात्मा मुक्तिमिच्छतां।

तमेवशरणं गच्छ सर्वभावेन मानद।

तत्प्रसादात् परंशान्तिं स्थानं प्राप्स्यसि शाश्वतम्।

सर्वभूतेषु यो राजन् अन्तर्यामितयास्थितः।

सचोपास्य प्रयत्नेन नयदिच्छेत्परमांगतिम्।

स्वान्तरस्थं परात्मानं मात्मत्वेन विशांपते।

संपूज्याहं प्रमोक्ष्यामि तथा त्वं च तथापरे।

आत्मा तु स च सर्वेषां प्राप्योभोग्यस्सनातनः।

तमविज्ञाय राजेंद्र कथं मुक्तिर्भविष्यति।40

नाहमात्मा च सर्वेषां तत्पृथक्त्वेनमानद्।

मदुपासानया कस्मान् मुक्तिमाकाङ्क्सेनघ।

मदन्तर्यामिणं स्वस्य चान्तर्यामितयास्थितम्।

विज्ञायैक्यभियाराजन्! विमुक्तोभव संसृतेः।

एतेनैवोपदेशेन मुक्तिंनयामि सेवकान्।

आत्मत्वेन तमाराध्यं उक्तोभव विशांपते।

चेतनोऽयमनुर्नित्यो जीवोनात्माशरीणाम्।

नैवप्राप्योयमन्येषां भोग्योभवितुमर्हति।

य आत्मसर्वभूतानां सर्वशक्तिस्सनातनः।

सर्वनामासर्वरूपः सर्वज्ञस्सर्वदृग्विभुः।45

स एव सर्वभूतेषु नामरूपेषुसर्वतः।

उपास्यःपरमात्मासौ पूर्णःपुरुषपुङ्गवः।

अहं बृह्मा च देवाश्च मुनयोमनवस्तथा।

तदात्मकाभविष्यामस्सर्वे तदनुवर्तिनः।

उपास्महे वयं सर्वे तमेवैकं नराधिप।

त्वमप्येनं धिया देवं आराधय जनार्दनम्।

अन्तर्यामितयास्मासु स्वस्मिन्वा चिदचित्सु च।

विभूतिषूपदिष्टासु ह्यवतारेषु वा पुनः।

निधायचेतसोवृत्ति मुपास्व सुसमाहितः।

कल्याणादिगुणोपेतं सर्वज्ञं सर्वकारणम्।50

नारायणं परंबृह्मा परमात्मानमद्वयम्।

सर्वावासं निजाधारं पुराणं पुरुषोत्तमम्।

अथवा त्रिगुणातीते वैकुण्ठेपरमेपदे।

महाविभूतौ भूतानामगम्ये नित्यसंज्ञके।

शेषपर्यंकनिलये स्वयमेवस्थितं हरिम्।

नित्यमुक्तजनैस्सेव्यं सच्चिदानंदविग्रहम्।

रमयालालितपदं भूनीळाभ्यां विराजितम्।

निर्गुणंप्रकृतेरूर्ध्व मनौपम्यमनुत्तमम्।

वेदवेदांतसिद्धांतैर् मूर्तिमद्भिरुपाश्रितम्।

**पंचरात्रानुसारेण** समाराधय केशवम्।55

अस्माकं परमं ध्येयं प्राप्यंभोग्यंपरात्परम्।

स्वामिसदासभूताना माश्रयोऽयमुदीरितः।

भद्रासन उवाच-

किं मां वृधाखेदयसि त्रिलोचन दयानिधे!।

त्वदन्यन्नावदन्मह्यं मुक्तये गौतमो मुनिः।

ईश्वरस्सर्वभूताना माधारश्चंद्रशेखरः।

कर्तावार्तविता नित्यो महाशक्तिरमापतिः।

स एव सर्वभूतानां हितायतमते तनुम्।

गुणातीतःपरंज्योतिः दुर्जटिर्नापरो मतः।

गुरुणाऽभिहितम् पूर्वम् पश्य त्वं दर्शनं गतः।

सम्सिद्धमभवत्सर्वं पूर्वोक्तं राज्यमुत्तमम्।60

मुक्त्यर्थमपरंदेवं कथं मन्येदयानिधे।

अलक्ष्यं सर्वभूताना मन्तर्यामितयास्थितम्।

श्रीमहादेव उवाच-

राजन्! यद्गौतमेनोक्त मविज्ञायमतं हरेः।

संगोप्यहेतुनाकेन प्रायःप्रोक्तं विचिंतय।

यदि ते हृदिसंदेह स्तदाऽहं गौतमं मुनिम्।

इहानयिष्ये राजेंद्र संकल्पेन विलोकय।

इत्युक्त्वाशंकरोयोगी सस्मारमुनिसत्तमम्।

स आजगाम स्मरणाद्यत्रास्ते भगवान् हरः।

प्रणम्यचरणोपेतो बद्धांजलिरवस्थितः।

पूजितःपरयाभक्त्या नृपेणाह हरं वचः।65

गौतम उवाच-

धन्योऽहं देवदेवेश दत्तं मे गौरवं महत्।

त्वया त्रिलोकगुरुणा यत्स्मृतोऽहमकिंचनः।

मुक्त्यर्थं मुनिभिर्नित्यं चिंतितोऽसि हृदंबुजे।

निष्कामैःकामनाबद्धैरपि पावकलोचन।

श्रीमहादेव उवाच-

वंचितोऽसिमहाभाग मायया तत्त्वतो मुने।

न जानासि परंगूढं बीजमत्र मयाधृतम्।

देवो हि मत्परस्साक्षात् परमात्मा सनातनः।

नारायणोऽस्ति जगतां मोक्षदः पुरुषोत्तमः।

तं प्राप्य मुनिशार्दूल लोके मुक्ताभवंति हि।

उपायस्तत्र साक्षाद्धरिरेव नचापरः।70

शरणं नैव जानंति तस्यैव परमात्मनः।

तदेवोपदिशांयंग स्वाश्रितां मुक्तये ननु।

अतो मुक्तिप्रदातारो भवामो वयमत्र हि।

मुक्त्यैकनिलयस्साक्षाद्धरिरेव न चापरः।

अन्वेषयामो हि वयं साधनैश्श्रुतिनोदितैः।
स्वायनं स्वनिवासार्थं वयांसी वदनात्ययो।
सर्वेषामेवचांशाना मंशित्वेन परागतिः।
नान्योजलतरंगाणामाश्रयोस्ति जलं विना।
स्वस्वरूपं तु गदितं भगवच्छेषतैव हि।
तमदृष्ट्वा कथंमुक्त्यै भवेदेष महामुने!।75
स्वरूपस्थः परस्तो वा स्वात्मानं विश्वतो मुखम्।
विलोक्य परमात्मानं भवतीतिनिशामय।
बृह्मादिषुशरीरेषु मुक्तिगम्यो न विद्यते।
ऋते पुरुषसंतानो वासुदेवात् सनातनात्।
मदंतर्यामिणं देवं स्वान्तर्यामिणमेव वा।
अचिदंतर्गतं वापि स्मर गौतम! मुक्तये।
तत्त्वमात्रोपदेष्टारो न पयंमुक्तिसंश्रयाः।
एवं त्वयोपदेश्योयं राजा ते शिष्यतांगतः।
ऐश्वर्यस्यापिदातारो न वयंविद्धि गौतम।
षड्वर्गसंश्रयोयस्माद् भगवान् पुरुषोत्तमः।80
अविज्ञायविभूतिस्थः पूजितो हि प्रयच्छति।
विभूतिं मुनिशार्दूल विज्ञातो मोक्षदोमतः।

मयिस्थो भगवानस्य ह्यविज्ञातोपि मानद्।

दत्तवान् परमं राज्यं निष्कंटकमशेषतः।

आत्मराज्यप्रदो देवो विज्ञातो हि भवेदिति।

अतश्चैनम् ममात्मानं श्रुत्या स्मृत्या प्रदर्शय।

गौतम उवाच-

त्वमेव सर्वभूतानामात्मासि गिरिजापते।

विभूतिभूतास्ते सर्वे श्रुतं मे वदनात्तव।

उक्तं च शिवगीतायामगस्त्येन महात्मना।

तथाचेश्वरगीतायां  शास्त्रे पाशुपतेऽपि ते।85

शिवादन्यो न देवोस्ति मुक्तिदो भुक्तिदो नृणाम्।

कारुण्यादिगुणोपेतो गुणातीतो निरंजनः।

इदानीमपरं देवदेवं वदसिमुक्तये।

किं सत्यमितिसंदेहमपाकर्तुं त्वमर्हसि।

श्रीमहादेव उवाच-

अहंमनुरहंसूर्य  इत्यादिश्रुतिभिर्मुने।

वामदेवेन यत्प्रोक्तमंतर्यामिधिया हितम्।

सामानाधिकरण्येन ब्रह्मास्मीति विचिंत्य च।

मद्विशेषेण संपन्नमात्मानं चोक्तवानहं।

आत्मदृष्ट्या मया प्रोक्तं श्रृणु गौतमसत्तम।

नाहमात्मा स्वतंत्रेण सत्यं सत्यं ब्रवीमि ते।90

नारायणादेष सर्गस्संप्रवृत्तो द्विजोत्तम।

नारायणे प्रलीयेत पाल्यते च न संशयः।

तस्मान्नारायणो देवो निर्गुणः प्रकृतेःपरः।

निर्गुणोप्यहमेवैकस्तस्याज्ञां पालयाम्यहम्।

अधिकारे निविष्टोस्मि तामसीं प्रकृतींगतः।

तत्प्रसादेन तत्सांयं संप्राप्तोस्मि महामते।

तेनैवकारितंसर्वं करोमि तदधीनतः।

"ब्रह्मासृजत्यहंहन्मि रविर्भासयतेऽखिलम्।

वायुर्वाति नभोमार्गं प्रयच्छति हुताशनः।

कालःपचति भूतानि मृत्युर्धावति सर्वतः।"95

न तत्र सूर्यस्संभाति चंद्रताराः क्वविद्युतः।

तं भान्तमनुसंभाति तस्यभासा विभाति हि।

अशिवोपि शिवोऽहं वै यत्प्रासादान्मुनीश्वर।

दासोऽहं तस्य देवस्य सत्यं सत्यं न संशयः।

सोऽहं कथं वदिष्यामि तच्छरीरतया विना।

परेशसाम्यं वचसा बृह्मास्मीति कदाचन।

दण्ड्यस्याममरेशोपि पूजितो हि मनीषिभिः।

ततोऽभिन्नतयानैव पौरुषेण बलेन च।

यत्तुपाशुपतेशास्त्रे गौतमोक्तं मया पुरा।

तत्तु तस्याज्ञयायास्वस्य स्वातन्त्र्यंविद्धि निश्चितम्।100

दैत्यानांमोहनार्थाय पाषण्डं धर्ममुक्तवान्।

न तद्विश्वसनीयं स्यान्मुमुक्षूणामनागपि।

तामसानिपुराणानि शास्त्राणि च महामते।

स्मृतयोपि भवंतीह कतिचिज्जगतीतले।

विष्णुनापिप्रयुक्तानि मोहनार्थं सुरद्विषाम्।

वाक्यानि च बहून्यंग तामसानि न संशयः।

तत्र मत्प्रमुखादेवास्स्वात्मसाम्यतया मताः।

क्वचित्ततोऽधिकाः प्रोक्ता मोहनार्हं महामते।

इदंसत्यमिदंसत्यं गौतमोऽत्र वदाम्यहम्।

नारायणोममाधारा आधेयोऽहं निशामय।105

वदामिबाहुमुद्यम्य न त्राणं विद्यते परम्।

नारायणपदांबोजमृदे मुक्त निषेवितम्।

श्रुत्वेदं गौतमो देवाच्छंकरादात्मनो हितम्।

बभूव शरणापन्नो वासुदेवस्यशार्ङ्गिणः।

बोधयामास राजानं तत्वं वेदांतसंमतम्।

न बोधमगमद्राजा मुनयो जातसंशयः।

भूयश्शिवस्समाहूय निजभक्तमुमापतिः।

प्रबोधमकरोत्तस्य कृपया शिवगीतया।

विज्ञाय परमात्मानमुपास्यंमुक्तिमिच्छताम्।

राजापिशरणापन्नो बभूव शिवशासनात्।110

तदा देवगणास्सर्वे व्योमाङ्गणविहारिणः।

प्रकाशमगदन्मूर्ध्नि किरंतस्सुमसंततिम्।

धन्योऽयं नृपतिस्सिद्धश्शिवभक्त्या महीतले।

बहूनां जन्मनामन्ते प्रपन्नो जायते हरिम्।

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।

यततामपि सिद्धानां कश्चिद्‌जानाति माधवम्।

शास्त्रं विजानतां मध्ये कश्चिदेव नराधिप।

प्रपन्नो जायते लोक आकारत्रयसम्युतः।

त्वं तु राजन् शिवादेशात् स्वात्मानं पुरुषोत्तमम्।

विज्ञाय परमैकांतभावं गंतुमिहार्हसि।115

अतोऽद्य प्रणतास्सर्वे त्वां तु विष्ण्वेकदेवतम्।

गंतासिनस्समुल्लङ्घ्य धाम वैकुण्ठमद्वयम्।

दुर्लभं निर्गुणं धाम राजन् वैकुण्ठमंदिरम्।

स्वाधिकारस्थितानां नस्त्वंतु सद्योगमिष्यसि।

यत्र त्रैलोक्यजननी श्रीदेवी पुत्रवत्सला।

क्रोडे करिष्यति क्षिप्रं विमुक्तं घोरसंसृतेः।

यतो नावर्तते घोरे संसारे शरणं गतः।

तदेव वैष्णवं धाम विमुक्ति पदमुच्यते।

अंतर्हितास्ततस्सर्वे ब्रह्मध्याये समागताः।

महाभागवतं नत्वा शिवोऽपि कृतमङ्गलम्।120

अहो मद्भक्तवर्गेषु निष्पन्नो ह्ययमञ्जसा।

आत्मानमध्यगात् प्रेम्णा येनेदमखिलं ततम्।

प्रदर्श्य वैष्णवं तेजो महादेवो निजं महत्।

कैलासमगमद्देव्याः प्राप्यं भोग्यं निरूपयन्।

राजापि वैष्ण्वींदीक्षामवाप्य गिरिजाप्रियात्।

उपारमतकृत्येभ्यश्श्रीपतिं शरणं गतः।

य एतत् प्रातरुत्थाय वैष्णवश्शिवभाषितम्।

श्रुणुयाच्छ्रावयेद्वापि मुच्यतेह्यन्य साधनात्।

मुनयोऽतस्स्मृतस्सर्वैर् मंत्रैराराध्यते हरिः।

गायत्र्या तु विशेषेण यस्यां बुद्धिप्रवर्तकः।125



www.kriyasagaram.in

मुमुक्षवोमहाभागा विष्णुं सर्वात्मरूपिणम्।

समर्चयंति संभूतौ न संभूतिमुपासते।

आत्मावारेतिमंत्रेण मंतव्यो भगवान् हरिः।

श्रोतव्यश्चानुसंधेयो नमस्यो मुक्तिमिच्छताम्।

यथा संसेचनं मूले पोषायाखिलवीरुदाम्।

तथा संसेवनं विष्णोस्तोषाय जगतोध्रुवम्।

मुनय ऊचुः-

पितामह समाचक्ष्व हरिगीतामनिंदिताम्।

येन संदेहमुन्मुच्य गौतमेन समं नृपः।

महाभागवतत्वं च संप्राप्तो विश्वभेषजम्।

श्री ब्रह्मोवाच-

उपरिष्टात्प्रवक्ष्यामि हरिगीतामनिंदिताम्।

श्रृण्वंतु मुनयस्तावदाह्निकं विष्णुभाषितम्। 130

इति श्रीबृहद्ब्रह्मे त्रितीये **परतत्वनिरूपणं** नाम नवमोऽध्यायः

श्रीः

## श्रीबृहद्ब्रह्मे त्रितीय भागे दशमोऽध्यायः

## **सदाचारनिरूपणे ऊर्ध्वपुण्ड्र श्रीचूर्ण धारणविधिः**

श्रीबृह्मोवाच-

संध्यांकृत्वा विधानेन मुनयोविष्णुदेवताम्।

सूर्यमण्डलमध्यस्थायाऽर्घ्यं दद्यात्समाहितः।

चतुर्व्यूहात्मकंसर्वं स्मृत्वाविश्वंजले जनः।

तर्पयेद्देवमनुज पितृंतिलकुशोदकैः।

कुशैस्तु सर्वदाकार्यं तिलैस्तूक्तदिनेषु च।

तर्पणं च प्रकर्तव्यं विष्णोराज्ञानुसारतः।

सप्तम्यां रविवारे च मातापित्रोर्मृतेऽहनि।

तिलैर्नतर्पणंकुर्यात् कुर्वाणः पितृहा भवेत्।

संक्रान्त्यादिनिमित्तेषु स्नानांगे तर्पणे तथा।

तिथिवारनिषेधेपि तिलैस्तर्पणमाचरेत्।5

श्रीविष्णुपादतीर्थेण तुळसीमिश्रितेन तु।

पितृणां तर्पणंकार्यं सर्वकालेषु धीमता।

सदापूर्वाग्रदर्भेषु साग्रदर्भकुलेषु च।

प्रादेशिकेषुशुद्धेषु बृह्मादिभ्योऽम्बु निक्षिपेत्।

अन्वारब्धेनसव्येन पाणिना दक्षिणेन तु।

दक्षिणंजानु भूलग्नं कुर्वाणस्सेचयेज्जलम्।

देवेभ्यश्च नमस्स्वाहा पितृभ्यश्च नमस्स्वधा।

तर्पणेतर्पयमीति णिजंतं शब्दमुच्छरेत्।

देवास्तृप्यं तु पितरस्तृप्यध्वमितिचापरे।

देवान् सव्येनदातव्यं जलंपूर्वमुखेन वै। 10

दक्षिणाभिमुखंभूत्वा पितृनावाह्य मन्त्रतः।

द्वाभ्यांकराभ्यां दातव्यमपसव्योपवीतिना।

दक्षिणाग्रकुशेष्वेव सव्यपातित जानुना।

विना रूप्यसुवर्णाभ्यां विना ताम्रतिलैरपि।

विना दर्भैश्च मन्त्रैश्च विनोर्ध्वतिलकं तथा।

विना श्रीपादसलिलं तुळसीमिश्रितं विना।

नैवतृप्यंति पितरः कोटितीर्थजलैरपि।



www.kriyasagaram.in

दर्भैर्लोहित दर्भैश्च काशवीरण बल्बजैः।

शुकधान्यतृणैर्वापि दर्भकार्यं समाचरेत्।

अलाभे सर्वदैवेषां लाभेपि मुनिसत्तमाः।15

तुळसीमंजरीपत्र काष्ठेष्वेकतरेण वै।

न तर्पयेत्पतंतीभिर्विद्वानद्भिः कथंचन।

पात्रस्थाभिस्सदर्भा हि स तिलाभिश्च तर्पयेत्।

वसूनष्टौमहाभागान् रुद्रानेकादशापि च।

आदित्यान्द्वादश तथा विभूतिमवगत्य च।

अन्तर्यामितयावापि तर्पयेत् प्रयतोद्विजः।

ध्रुवोधरश्च सोमश्चाप्यापश्चैवानिलोऽनलः।

प्रत्यूषश्चप्रभावश्च वसवोऽष्टप्रकीर्तिताः।

अजैकपादहिर्भुध्न्यो विरूपाक्षोऽर्ध शंकरः।

हरश्च बहुरूपश्च त्र्यंबकश्च सुरेश्वरः।20

सावित्रश्चजयंतश्च पिनाकीचापराजितः।

एतेरुद्रास्समाख्याता **स्संकर्षणवि**भूतयः।

इंद्रोधाता भगःपूषा मित्रोऽथवरुणोऽर्यमा।

अंशुर्विवस्वान् स्त्वष्टा च सविता विष्णुरेव च।

एते वै द्वादशादित्या **ह्यनिरुद्धा**त्मकामताः।

एवं हि दिव्याः पितरःपूज्या विष्णुविभूतयः।

कव्यवाहोऽनलस्सोमो यमश्चैव तथाऽर्यमा।

अग्निष्वात्तास्सोमपाश्च तथा बर्हिषदोपि च।

एते चान्येच पितरः पूज्यास्सर्वै स्सहर्षिभिः।

एतैस्तु तर्पितस्सर्वे पुरुषोस्तर्पितास्त्विह।२५

आदौ संतर्पयेद्देवान् महर्षींस्तु तथापितृण्।

पितापितामहश्चैव तथैव प्रपितामहः।

**प्रद्युम्नस्संकर्षण वासुदेव**स्स्वरूपकाः।

**अनिरुद्धस्वरू**पोयं तर्पयेत्तान् क्रमात् पुनः।

माताापितामहीचैव तथैव प्रपितामही।

रतिवाग्रुक्मिणीरूपास्तर्पणीयाः क्रमादिमाः।

तथा मातामहादींश्च तत्पत्नीश्च तथैव हि।



www.kriyasagaram.in

त्रिभिस्त्रिभिश्चांजलिभिः एकैकमपि तर्पयेत्।

भ्रातृन् पितृभ्यां स्तत्पत्नीस्सखिसंबंधि बान्धवान्।

स्वजनान् ज्ञातिवर्गीन् यानुपाद्यायान् गुरूणपि।30

मित्रभृत्या स पत्न्यानि ये भवंति तथाश्रिताः।

वैष्णवो लोकशिक्षार्थमन्तर्यामितयाऽर्चयेत्।

जलस्थश्च जलेसिंचेत् स्थलस्थश्च स्थले तथा।

पादौ स्थाप्योभयत्रापि प्रक्षाळ्योभयतश्शुचिः।

देवतानां च ऋषीणाम् च जलेदद्याज्जलांजलीन्।

असंस्कृतप्रमितानां  स्थले दद्यज्जलांपुनः।

जलांजलित्रयं दद्यात् येचान्ये संस्कृतो भुवि।

असंस्कृत प्रमितानामेकमेव तटे क्षिपेत्।

यज्जले शुष्कवस्त्रेण स्थलेचैवार्द्र वाससा।

कुर्याद्धोमं जपं दानं तत्सर्वं निष्पलं भवेत्।35

नार्द्रवासाः स्थलस्थं तु संध्या तर्पणमचरेत्।

जानुदघ्नजलस्थो वा विगळत्स्नान वस्त्रकः।

नाभिमात्रजले स्थित्वा स्नानसंध्यादिकाः क्रियाः।

कुर्याच्च तर्पणं तीरे जले संविश्य वा स्थितः।

द्वौहस्तौसंयुतौकृत्वा पूरयेदुदकांजलिम्।

गोश्रृङ्गमात्रमुद्धृत्य जलमध्ये क्षिपेज्जलम्।

आकाशे निक्षिपेद्वारि जलस्थो दक्षिणामुखम्।

पितृणां स्थान ,माकाशं दक्षिणादिक्तथैव च।

स्थल गो नार्द्रवासास्तु कुर्याद्वै तर्पणादिकम्।40

प्रेताधृतेणार्द्रवास स्तैकवासास्समाचरेत्।

निष्फलं जायतेकर्म यत्वेकवाससा।

सव्याधं सा परिभ्रष्टं नाभिदेशे व्यवस्थितम्।

एकं वस्त्रे तु तद्विद्यात् य देवे पित्र्ये च कर्मणि।

तर्पणेन विनावस्त्रं स्नानीयं नैव पीडयेत्।

निष्पीडं दौतवस्त्रं स्कंधे नैव तु धारयेत्।

निष्पीडयेन्न त्रिगुणिकृतं वस्त्रं द्विजोत्तमाः।

आर्द्रवस्त्रमधस्तात्तु स्नात्वा नोत्तारयेद्बुदः।

पंचतीर्थानि विप्रस्य करेतिष्ठंति दक्षिणे।

"ब्राह्मं दैवं तथा पित्र्यं प्राजपत्यं तु सौमिकम्।45

ब्राह्मं पश्चिमलेखायां दैवमङ्गुळिमूर्धनि।

प्राजापत्यं कनिष्ठादौ मध्ये सौमं निभोधत।

अंगुष्ठस्य प्रदेशिन्या मध्ये पित्र्यं प्रतिष्ठितम्।"

कुर्यादहरहश्चैवं सम्यक् कृत्वा विधानतः।

स्नात्वा दैवं च पित्र्यं च नित्यं कुर्याद्विचक्षणः।

अन्तर्यामि विभूत्यादि दृष्ट्याविष्णोरनुज्ञया।

विष्णोरनुचराणां च प्रभोराज्ञानुपालनम्।

कर्तव्यं स गुरुत्वेन भिया सामान्यया धिया।

देवांतरे हरेश्श्रैष्ठ्यं गुरुत्वं च भयं पुनः।

देवोऽयं मे विना सेवां धर्माद्यं विधमेदिति।50

यथा विष्णुस्तथाचान्या किमाधिक्यं तदर्चने।

इति सामान्यधीर्विष्णौ विज्ञेया मोक्षनाशिनी।

विष्णुपादप्रपन्नानां न भयं विद्यते क्वचित्।



www.kriyasagaram.in

शङ्खचक्रादयस्तस्य रक्षंति निभृतं तनुम्।

न कार्यं विद्यते किंचिद्विनाज्ञा परिपालनम्।

स एव प्रेरको विप्रा आज्ञाचाव्याहता मता।

आज्ञया प्रेरिताश्चाहमितिसङ्कल्प्य वैष्णवः।

स्नानदानादिकंकर्म कुर्याद्यावत्स्थितिर्भवेत्।

यतो भक्तिरखण्डा हि दर्शनप्रतिमा हरेः।

तस्मात्स्वभावतः प्रातःकुर्याद्विष्णोरनुज्ञया।55

सर्वस्वामिनमात्मानं नत्वा नारायणंहरिम्।

तच्छेषभूतमखिलं दानभूतमिदं जगत्।

एवं संविदुषो विप्रा देवान्तरसमर्चनम्।

कथं समधिकत्वेन भवेदिति विचिंत्यताम्।

अथाष्टदळपद्मस्थं देवं संतर्पयेत् द्विजाः।

तुळसीचंद्रमिश्रांबु सेचनैः परमादरात्।

आधारशक्तिमारभ्य वक्ष्यमाणक्रमेण च।

चतुर्विधं तु वैकुण्ठं नित्यमुक्तपरिच्छदम्।

श्रीविग्रहांगभूषाभिः शक्त्यायुधसुवाहनैः।

प्रणवादि द्वितीयांत तर्पयामीति संयुतैः।60

नाममन्त्रैःपृथक्कुर्यात् तर्पणं ध्यानतत्परः।

तत्पादांबुरुहाकाङ्क्षी महाविद्यानिषेवकः।

एवं स्नात्वा गृहीत्वांबःकलशेन विचक्षणः।

पूजार्थं देवदेवस्य यागमण्डपमाविशेत्।

घण्टाशंखमृदङ्गानां निर्घोषैर्बृह्मवादिनाम्।

महोत्सवेषु सर्वेषु जलं नेयं जलाशयात्।

धृतोर्ध्वपुण्ड्रैःकलशैः शुक्लवस्त्रावृताननैः।

पुष्पमालावृतैस्तोयमुद्धार्यं वैष्णवोत्तमैः।

जलाशयसमीपं तु क्षालयेद्गोमयांभसा।

अस्त्रेणद्वादशार्णेन तत्राधारं तु धारयेत्।65

**इमंमे गङ्गेति** ऋचा जलमन्त्रैश्च वैष्णवैः।

क्षाळयेत्कलशंशुद्ध**मापो अस्मानिति** स्मरन्।

अथवा मूलमन्त्रेण द्वयमन्त्रेणसाधकः।

***समुद्रज्येष्ठमन्त्रेण** गृह्णीयाच्छिरसाऽथवा। ( **ऋग्वेदं- 5 अ 4 अष्टकं- 15- सू)**

***उदुत्तमेति**मन्त्रेण मुखमाच्छाद्य वैष्णवः। ( **ऋग्वेदं- 1 अ-2 अष्टकं- 5- सू)**

**(कृष्णयजुर्वेदं- 4 व काण्डं।-2व प्रश्नं)**

शिखयाचाथमूलेन ***<u>प्रसम्राजेति</u>*** सूक्तकम्। ( **ऋग्वेदं- 6 अ 1अष्टकं- 5- सू)**

प्रजपन् कवचेनापि पूजामंदिरमाविशेत्।

धान्योपरि तथा कुम्भान् न्यसेद्दक्षिणतो हरेः।

तत्र संपूज्यमन्त्रेण धूपदीपाक्षतांकुरैः।

एवं जलम् समानीय द्वारदेवान् प्रणम्य च। 70

स्वासनं तत्र संस्तीर्य स्मृत्वा गुरुपरंपराम्।

आदाय तिलकद्रव्यमूर्ध्वपुण्ड्राणि धारयेत्।

मुनय ऊचुः-

किं स्थानमूर्ध्वपुण्ड्राणां किं द्रव्यं काश्च देवताः।

को मन्त्रःकिं फलं बृह्मन्! किं कर्तव्यं तदुत्तरम्।

बृह्मोवाच-

मत्पुत्रानारदोयोगी पुरा मत्सन्निधौहरिम्।

पृष्टवान् परयाभक्त्या तदेवाहं ब्रवीम वः।

नारद उवाच-

वासुदेव जगन्नाथ! भगवन् पुरुषोत्तम।

किं मुख्यं वैष्णवानां तु वैष्णवत्वम् विधायकम्।

श्रीवासुदेव उवाच-

*धारणंचोर्ध्वपुण्ड्राणा मेकादश्यामुपोषणम्।

तदीयानामर्चनंचैव वैष्णवत्वमिदं स्मृतम्।*।75

नारद उवाच-

ऊर्ध्वपुण्ड्रविधिं द्रव्यं मन्त्रस्थानादि सम्युतम्।

ब्रूहि मे देवदेवेश यथार्हं धारयाम्यहम्।

श्रीवासुदेव उवाच-

श्वेतंपीतंतथारक्तं द्रव्यं तु त्रिविधं स्मृतम्।

पुण्ड्राणाम् धारणे विप्र! ममैव प्रकटीकृतम्।

तेषु रक्तं श्रियादेव्यामत्स्नेहात् प्रकटीकृतम्।

<u>**श्रीकुंकुमेति**</u> विख्यातं सदा माङ्गळिकं मुने।

केवलं भक्तिदं पुंसाममंगल विनाशनम्।

पुण्ड्राणामन्तराळस्थं मुक्तिदं मुनिसत्तम।

समुद्रमथनोद्भूता कमला मम वल्लभा।

य़दा तदाब्धिना पित्रा दातुम् मे समलंकृता।80

सुरासुराणां मध्ये च स्वयंवरविधानतः।

दातुम् कन्यां कंजकरां समुद्रस्समुपस्थितः।

सा तमालोक्य देवेशमात्मनोहितमीश्वरम्।

प्रेमातिशयतोनेत्रादपांबिंदूनमुंचत।

तेनाभूद्विरुधःप्रेम नियतःपरमाद्भुतः।

तेनैव सा हरिंप्राप्ता वीरुधेनस्वयंवरे।

हरिंद्राति परप्रेम्णाणि जंथोऽत्र विचार्यताम्।

प्रापणाच्च हरेस्साक्षात् हरेरत्यंत वल्लभः।

संवीक्ष्यचिह्नितं तेन भक्तं प्रीणाति केशवः।85

लक्ष्मीप्रेमात्मकंद्रव्यं साक्षात्किं न करोति च।

धनधान्यसमृद्धिं च रूपसौभाग्यसंपदम्।



www.kriyasagaram.in

विवाहव्रतबंधादि जन्मयात्रानुयुज्यते ।

द्रव्यमांगळिकं साक्षाद्दारिद्रं प्रेमभाजनम्।

य़ा नारीफालदेशे तु बिभर्ति प्रत्यहं द्विजाः।

सा नारी लभतेभाग्यं सुखं च निजमंदिरे।

लक्ष्मीर्नमुंचतिप्रेम्ना पार्श्वं तस्याऽहर्निशम्।

प्रयच्छतिवरान् प्रीता जायतेपतिवल्लभा।

"लक्ष्मीप्रेमसमुद्भूते हरिद्रे हेमसन्निभे।

बिभर्मि त्वां महाभागे वरदाभव ते नमः।"90

इतिमन्त्रेण या नारी श्रीचूर्णमभिमन्त्रितम्।

स्नात्वा धारयते नित्यं सा लक्ष्मीवद्विराजते।

लक्ष्मीरूपमिदं द्रव्यं पुण्ड्रमध्ये बिभर्ति यः।

दास्यं स लभते विष्णोः सत्यं सत्यं ब्रवीम्यह।

पुण्ड्ररूपेण मां विद्धि रेखारूपेण वै श्रियम्।

संधारयं ये फाले बाहुवक्षस्थलादिषु।

ज्ञानिनो मुक्तये चूर्णं पुण्ड्रमध्ये बिभर्ति यः।



www.kriyasagaram.in

स प्रियोह्यावयोर्भूत्वा मामकं धामयाति हि।

आज्ञोपि ज्ञानसिद्ध्यर्थं भक्त्यर्थं चापि यो भजेत्।

ज्ञानं भक्तिमवाप्नोति रहस्यं ते ब्रवीम्यहम्।95

हरिद्रासंभवंचूर्णम् **टंकणेन** ?समन्वितम्।

भावितंचाम्लद्रव्येण रक्तत्वमुपयाति हि।

वैवाहिकेषुयागेषु स्नात्वाऽऽमलकवारिणा।

संस्मृत्य परमांदेवीं कमलां ममवल्लभाम्।

"हिरण्यवर्णाममलां वसुपात्रकरद्वयाम्।

मातुलुंगधरां देवीं गंधद्वारां मनोरमाम्।

पूजार्थं तव देवेशि वैकुण्ठप्राणवल्लभे!।"

आज्ञां देहि महामाये श्रीचूर्णं साधये यथा।

हिरण्यवर्णेति ऋचां पंचकेन महामनाः।

प्रोक्षयेद्रजनीद्रव्यं पंचगव्येन शोधयेत्।100

अस्त्रमन्त्रेणसंरक्ष्य कवचेनावकुण्ठ्य च।

पंचामृतेनसंस्नाप्य तक्रमध्ये च निक्षिपेत्।

भूमिंसंलिप्य तद्भाण्डं स्थापयेन्मृण्मयोद्भवम्।

रात्रौ संरक्षयेद्दुष्टच्छायातो हृष्टमानसः।

ग्रन्थीनां तक्षणंकुर्यात् हेतिनासूक्तमुच्चरन्।

द्वितीये मृण्मयेभाण्डे छायाशुष्कं विधाय च।

प्रातस्स्नात्वा शुचिर्भूत्वा नित्यकर्मविधाय च।

पात्रमुद्धृत्य हृन्मन्त्रं जप्त्वा कुर्याद्बहिस्ततः।

भावयेदाम्लद्रव्येण शुद्धनिंबोद्भवेन च।

आर्द्रपिष्टेनचाप्यत्र टंकणंपातयेद्बुधः।105

दत्वाचैरण्डपत्राणि मुखे मारुतवर्जिते।

प्रदेशे स्थापयेद्यावत् रक्तत्वमुपजायते।

तावद्विधूपयेन्नित्यं यथाछाया न संक्रमेत्।

पश्चात्संशोध्य यत्नेन शिलया चूर्णयेद्गुडम्।

सुगंधस्नेहलेशेन भावयेच्चंद्रकेण वा।

देव्याःप्रीतिकरं चूर्णं निष्पन्नं जायते यदि।

वासयेन्मालतीपुष्पैःस्तिलानीव महात्मना।

यावत्संपद्यतेगंधः श्रीचूर्णे कमलाप्रिये।

निष्पाद्यमंगलद्रव्यं मृष्टपात्रे च धारयेत्।

पूजयेद्विविधोपायैः तथा नीराजयेन्निशी।110

द्वादश्यांजन्मसमये श्रीदेव्याः प्रयतो नरः।

संपूज्य परमांदेवीं सर्वावरणसंयुताम्।

इदंद्रव्यं मयादेवी प्रीत्यानिष्पादितं तव।

स्वीकुरुष्व महामाये विष्णुपत्नी नमोस्तु ते।

धारणार्थं पृथक्कुर्यात् बिल्वपात्रं विशेषतः।

**श्रियैजातेतिवाकेन** बिभृयादिति मे मतम्।

पुण्ड्रार्थं श्वेतद्रव्यं हि समानीतं गरुत्मता।

श्वेतद्वीपान्महाभाग! मलयाद्रौ निवेशितम्।

मलयाद्रिसमुद्भूता मृदमादाय वैष्णवः।

यःकरोत्यूर्ध्वपुण्ड्राणि स ऊर्ध्वपदमश्नुते।115

यस्यफाले हरेर्नाम श्वेतद्रव्येण दृश्यते।

अंतकालेमृतोयाति श्वेतद्वीपं स पातकी।

स तथा वल्लभं विष्णोश्चन्दनंकुङ्कुमान्वितम्।

यथामलयकूटस्थं मृद्द्रव्यं चंद्रपाण्डुरम्।

विष्णोर्ल्ललाटे यःप्रेम्णा करोति तिलकंमुदा।

श्वेतद्वीपमृदा नित्यं सप्रियःकमला यथा।

स्नानेदानेप्रयाणे च श्राद्धेपर्वणि मंगळे।

होमे सुरार्चनेपुण्ये श्वेतद्वीपामलान्वनिः।

श्रीगोपीचंदनं नाम पीतद्रव्यं महामते।

वैकुण्ठलोकादानीतं द्वारकायां प्रतिष्ठितम्।120

सर्वेषां गोपनाद्गोपो वासुदेवोऽहमेव हि।

अनंतश्शक्तयोगोप्यो मदीया एव नारद।

मदङ्गलेपितंपुण्यं वैकुण्ठेकुङ्कुमान्वितम्।

गोपीभिःक्षाळितं तस्माद्गोपीचंदनमुच्यते।

मदंगलेपितंपुण्यं  चक्रतीर्थे प्रतिष्ठितम्।

पीतंचक्रसमायुक्तं चंदनं मुक्तिदं धनम्।

मदंगलेपनंपुण्यं धृत्वा करतले पुनः।

संप्रोक्ष्य विष्णुगायत्र्या द्वादशार्णेन वा पुनः।

**विष्णोर्नुकं** पठन्पाणौ मर्धयेद्भक्तिमान्नरः।

धारयेदूर्ध्वपुण्ड्राणि ललाटादिस्थलेषु च।125

ललाटोदरहृत्कण्ठ कुक्षिबाह्वंसकेषु च।

कुक्षिबाह्वांसदेशेषु वामभागेषु नित्यदा।

पृष्ठग्रीवाबृह्मरंद्रे पुण्ड्राणि विनिवेशयेत्।

केशवादिमहामन्त्रैः देवास्तत्र त एव हि।

प्रणवाद्या नमोंताश्च मन्त्राद्वादशसंख्यया।

केशवश्च तथा नारायणो माधवसंज्ञकः।

गोविंदोविष्णुरित्युक्तो मधुसूदनवामनौ।

श्रीधरश्चहृषीकेशः पद्मनाभो महामुने।

दामोदरोवासुदेवो निजांगेषु निवेशयेत्।

रेखाःपादयुतास्तिस्त्रः पुण्ड्राज्ञेया महामते।130

प्रणवावयवास्तिस्त्रस्त्रयःकालाःप्रकीर्तिताः।

तिस्त्रोव्याहृतयस्त्रीणां छंदांसि ज्वलनास्त्रयः।

त्रीणितत्वानि पुण्ड्रेषु चिंतनीयानि सूरिभिः।

पुण्ड्रमध्यस्थितारेखा रक्तवह्नि शिखोपमा।

नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा।

नीवारशूकवत्तन्वी पीताभास्यत्तनूपमा।

विष्णुपत्नींविजानीयात् साक्षात्रैलोक्यमातरम्।

निविष्ठःपरयाशक्त्या पुण्ड्ररूपेण माधवः।

भावयन्त्यपरेभक्ताः पुण्ड्रं तु हरिमंदिरम्।

लक्ष्मीनारायणं तत्र बुध्याध्यायंति नित्यशः।135

धृत्वा पुण्ड्राणिगात्रेषु बृह्माहमिति भाविनः।

विमुक्तायांति मद्भावं शाश्वतं हेयवर्जितम्।

चिदचिद्व्यापकं बृह्म परमात्मेति कथ्यते।

व्याप्यभूतं द्वयंह्येतच्छरीरमभिधीयते।

आत्मायमपि तद्देहो बृह्मात्मकतयास्थितः।

स्थितोऽहं सर्वभूतेषु ह्यन्तर्यामितया द्विज।

मदभिन्नमिदंसर्वं दृश्यते श्रूयते च यत्।

आधारोऽहं तु सर्वेषां मत्तोज्ञानं च  विस्मृतिः।

प्रकाशकोऽहंसर्वेषां भर्ताभोक्ता च भोजकः।

मद्रूपमद्वयं बृह्म मध्याद्यंत विवर्जितम्।140

स्वप्रभं सच्चिदानांदं भक्त्याजानातिचात्मनि।

एकोविष्णुरनेकेषु जंगमस्थावरेषु च।

अनुस्यूतोपसाम्यात्मा परमात्माऽहमव्ययः।

तैलंतिलेषुकाष्ठेषुवह्निः क्षीरेघृतं यथा।

गन्धःपुष्पेषुभूतेषु तथाऽऽत्माहं व्यवस्थितः।

यच्चकिंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा।

अंतर्बहिश्चतत्सर्वं व्याप्यनारायणस्थितः।

देहादिरहितंसूक्ष्मं चित्प्रकाशं निरञ्जनम्।

सर्वानुस्यूतमद्वैतं परंबृह्माभवाम्यहम्।

प्राप्यं भोग्यं च गन्तव्यं मच्छायं मामतंद्रितः।145

भावयेत्साधनंसाध्यं प्रापकं भाजकं हरिम्।

गोपीचंदनमालिप्य नामभिःकेशवादिभिः।

एवं मां चिंतयेदीशमनुसंधानतत्परः।

दिव्यभावं समासाध्य ज्योतिरूपमनश्वरम्।

मामेवैकमवाप्नोति यतो नावर्तते पुनः।

ब्राह्मणानां तु सर्वेषाम् वैदिकानामनुत्तमम्।

गोपीचंदनवारिभ्यामूर्ध्वपुण्ड्रं विधीयते।

कैङ्कर्यमेव कर्तव्यं कृत्वापुण्ड्रस्य धारणम्।

गन्तव्योऽहं न संदेहो देवर्षे पुरुषोत्तमः।

एवं नारायणेनायं नारदःप्रतिबोधितः।150

तस्मादेवं प्रकर्तव्यं मुनयःपुण्ड्रधारणम्।

कृत्वापुण्ड्रं विधानेन प्रविशेन्मंदिरं हरेः।

देहळीमस्पृशन् पद्भ्यां स्मृत्वा तन् मुक्तिमण्टपम्।

**वास्तोष्पतेः** पठन् सूक्तं शोधयेन्मंदिरं हरेः।

अगाव* इति सूक्तेन गोमयेनानुलेपयेत्।

आनोभद्रेति* सूक्तेन रंगवल्लीं च निक्षिपेत्।

हस्तौ पादौ च प्रक्षाळ्य प्राणानायम्य वैष्णवः।

स्वयं वा वैष्णवैर्वापि पत्न्या पुत्रेण वा पुनः।

शोधयेत्विष्णुपात्राणि सद्द्रव्यश्रद्धयान्वितः।

शुचिभूमौ कुशेष्वेव संस्थाप्य जितमानसः।155

मौनेनविमुखस्पर्शो यथानस्यात्तथाचरेत्।

पतितो वर्णबाह्यश्च विकर्मस्तोह्य वैष्णवः।

अचक्रधारी नैवार्हो भगवत्पात्रशोधने।

निष्ठीवेण्णो चरेद्वातं नोच्छिष्ठवदनोभवेत्।

विशोधने च पात्राणां सुस्नातस्वोर्ध्वपुण्ड्रकः।

संयक् प्रक्षाळ्यभाण्डानि दाहयेत् तृणवह्निना।

भस्मादिना च संशोध्य क्षाळयेच्छुद्धवारिणा।

रसभाण्डानिसर्वाणि क्षाळयेच्छुद्धवारिणा।

शुद्धिंकुर्याद्विशेषेण स्पर्शादौसतियोषिताम्।

पाकपात्राणि सर्वाणि क्रामयेन्नगृहाद्बहिः।160

तैरेवनोपभुंजीत नोच्छिष्ठे परिवेषयेत्।

भगवत्पात्रभोगेन निरयंयातिमानवः।

तस्मात्सर्वप्रकारेण पात्राणि परिवर्जयेत्।

ऊर्ध्वपुण्ड्रांकणं कुर्यात् पात्रणां वैष्णवो जनः।

स्वभोगपात्रसंस्पर्शम् देवपात्रं न कारयेत्।

अन्यपाको न कर्तव्यो देवपात्रेषु कर्हिचित्।

न देयं भगवत्पात्रं अन्यस्मै विमुखाय हि।

सूतकेमृतकेवापि श्वादीनां स्पर्शने तथा।

स्पर्शनेवाप्यभक्तानां सद्य एव परित्यजेत्।

कृत्वा भाण्डस्यसंशुद्धिं अन्नानि भुविशोधयेत्। 165

गोमयेनोपलिप्तायां सुस्नातैर्वैष्णवैर्द्विजाः।

शुक्लांबरधरानार्यो गायन्त्यो मधुनाशनं।

अवहन्युर्मुदाविष्णोः पाकार्थं व्रीहिमुत्सवे।

प्रक्षाळ्य मुसलं शुद्धं हृन्मन्त्रेण विशेषतः।

शिरोमन्त्रेण व्रीहिंस्तु दद्यात् परमुलूखले।

अवहन्याद्धरेःप्रीत्यैः द्वादशाक्षरविद्यया।

निष्तुषान्निष्कणान् कृत्वा तण्डुलान् सूर्पकोटरैः।

ते तावद्वहन्तव्या विप्रैश्चक्रादिलांछनैः।

यावन्मुक्ताफलाभास्युः कृष्णबिंदु विवर्जितैः।

ब्राह्मणीभिश्च साध्वीभिस्दीक्षितानामभावतः।170

शूद्रैर्वा दीक्षितैर्दैवदासीभि प्रयतात्मभिः।

हविःपाकादिकर्मार्थं कार्यावहन न क्रिया।

निष्पण्णानस्त्रमन्त्रेण रक्षभाण्डेषु धारयेत्।

अकणानकुशानेव क्रिमिहीनानपि क्रमात्।

केशपाषाणहीनांस्तु प्राण्यङ्गरहितांस्तथा।

भस्माङ्गारविहीनांश्च अप्यभग्नानलघानपि।

विपरीतोभवेद्दोषो भगवत्पाकसाधने।

कणैस्तु भवतिव्याधिस्तुषैर् दारिद्रयकंभवेत्।

क्रिमिभिःपुत्रनाशैस्स्यात् केशैर्दार विनाशनम्।

पाषाणैमरणंविद्धि विनाशो वह्निनाजलैः।175

प्राण्यंगैर्व्याधयःप्रोक्ता भस्मना कलहोद्भवः।

अंगारैर्वह्निनाबाधो भग्नैर्भग्नस्तु विग्रहः।

प्रवासोलघुभिश्चैव तस्मात्तान् परिवर्जयेत्।

एवं शुद्धानिद्रव्याणि **ब्रह्मसूक्तमुदीरयन्**।

विलोक्य नेत्रमन्त्रेण पात्रेषु विनिधाय च।

सुस्नातैश्च सुवेषैश्च वैष्णवैःपरिचारकैः।

आनयेत्पचनागारं शंखतूर्यादिवादनैः।

द्वारस्योत्तरपार्श्वे तु लिप्तायां भुविगोमयैः।

पात्राणि विधिनामन्त्री स्वस्वस्थाने निवेशयेत्।

चतुर्भिर्व्यापकैर्मन्त्रैः संप्रोक्ष्य तुळसीजलैः।180

पाकार्थं देवपात्रेषु क्षाळयित्वा तु धारयेत्।

आहृत्यौदनपाकाग्निं कुण्डादौपासनानलात्।

चुल्यांनिदायतारेण समिद्ध **मग्निमी**तिरयेत्।

इन्धनानि विनिक्षिप्य यज्ञदारुमयानि च।

कृमिकीटविहीनानि ज्योतिरात्रीति मन्त्रतः।

प्रक्षाळ्य द्वादशार्णेन वीर्यमन्त्रेण मन्त्रवित्

घृतेनलेपयेत्स्थाल्यां अन्तरं व्यूहविद्यया।

प्रज्वाल्यव्यजनेनैव स्थाली स्ताम्रमयीस्ततः।

संस्थाप्य विष्णुगायत्र्या तण्डुलानि विनिक्षिपेत्।

**अम्भस्यपार** इति च मन्त्रेण स हृदा पुनः।185

जलेनपूरयेदूर्ध्वं तण्डुलान् पात्रमुद्यगान्।

पिधानैश्चक्रमन्त्रेण संछाद्यास्ताः क्रमेण तु।

पाकानलं समुत्पाद्य वीर्यमन्त्रेण सध्वनि।

निरीक्ष्य नेत्रमन्त्रेण दर्व्या मूलंसमुच्चरन्।

विलोड्य पूरयेद्धव्ये घृतं स नवनीतकम्।

शोधिते भूतलेतानि हवींष्युत्तार्य सर्वशः।

संस्थाप्यचास्त्रमन्त्रेण पात्राणि क्षाळयेच्छुचिः।

तेनैव प्रोक्ष्य पात्राणिचोर्ध्वपुण्ड्राणि धारयेत्।

भस्मनाचंदनेनाथ वासुदेवादिनामभिः।

साधयेदुक्तमार्गेण विष्णोस्संप्रीणनाय च।190

अन्यान्यपि च हव्यानि पायसादीनि सर्वशः।

अपूप पूलिकादीनि घृतपूरितमोदकान्।

शाकसंयावससंधान कथितांश्च प्रसादयेत्।

संप्राप्तो मंदिरद्वारमभिवाद्य सुराधिपान्।

विष्वक्सेनविहङ्गेश चण्डभद्रादिपुष्टिपान्।

कृताञ्जलिपुटो भूत्वा प्रार्थयेद्विष्णुपार्षदान्।

अनुज्ञातुमिहार्हंति भवंतश्शरणागतम्।

संसारभयसंत्रस्तो विषयव्याप्तमानसः।

विद्याम्बुनिधिंतर्तुं गुरुसंदर्शितं प्लवम्।

श्रीमदाराधनं विष्णोस्संस्थान्येभवदाज्ञया। 195

दासोऽहं शेषभूतोऽहमनन्यसुखचिंतकः।

प्रबोधयेज्जगन्नाथं दिव्यपर्यङ्कशायिनम्।

घण्टामृदंगनिनदैस्स्तवैः पुरुषविद्यया।

**तं त्वलयेति** सूक्तेन बोधयेत्कमलापतिम्।

**वनस्पतेति** सूक्तेन तुर्यघोषंनिनादयेत्।

कुर्यात्प्रदक्षिणं विष्णोर**तोदेवेत्यनेन** तु।

**तद्विष्णो** रितिमन्त्राभ्यां त्रिः प्रणम्याथवाग्यतः।



www.kriyasagaram.in

उत्थाप्य दर्शयेद्दीपकन्या गो पुण्यदर्शनाम्।

श्रियंदेवीं समुत्थाप्य दर्शयेद्दन्तधावनम्।

प्रक्षाळ्य वारिना वक्त्रं साण्गं सावरणं हरिं। 200

स्मृत्वा नीराजयेद्दीपैस्ततः पूजां समारभेत्।

पात्राद्यासादनं कुर्यात् तथाऽन्तर्यागमुत्तमम्।

आवाहनादिकं कुर्याद्बहिर्यागं समारभेत्।

शयनांतोपचारैस्तु समाराध्य जनार्दनम्।

अंते वैकुण्ठमाप्नोति प्रपन्नोऽयं हरेः पदम्। 202

इति श्री पांचरात्रे बृहद्ब्रह्मसंहितायां तृतीयपादे सदाचारनिरूपणे

<u>ऊर्ध्वपुण्ड्र श्रीचूर्ण (करण) (தயாரிக்கும்)धारणविधिः</u> नाम दशमोऽध्यायः

# इति त्रितीयपादः समाप्ता

**************************************************

श्रीः

श्रीमतेरामानुजायनमः

## बृहद्ब्रह्मे-चतुर्थःपादे प्रथमोऽध्यायः

## भूतशुद्धिकथनं

मुनय ऊचुः-

अन्तर्यागं बहिर्यागं कथं कुर्याच्चतुर्मुख।

एकादशीव्रतं यच्च पूर्वोक्तं वैष्णवार्चनम्।

विस्ताराद्वद देवेश तरामोदुस्तरंतमः।

येन तात वयंसर्वे भगवच्चरणाश्रिताः।

बृह्मोवाच-

बाह्यमाभ्यन्तरं पुत्रा विष्णोराराधनक्रमम्।

वक्ष्यामि सारतस्सर्वं न क्षमोऽखिलभाषने।

यस्य नाभिमहापद्माद्भुद्भूतोऽहं वराटकः।

बीजभूतोविसर्गस्य तस्मै धात्रे नमोनमः।

नमस्सर्वात्मने यस्य प्रसादादहमेव च।

करोमि हरते शंभुः  पालयंति प्रजेश्वराः।5

आदौ संचिंतयेत्स्थित्वा गुरुपादसरोरुहम्।

संस्कृतो येन चक्राद्यैर्मूलेन द्वयविद्यया।

प्राणायामैर्भूतशुद्धिः तथा भावनया द्विजाः।

कर्तव्याःप्रथमंविष्णोः समाराधनकर्मणि।

“शरीरंमलिनंह्येतत्प्राकृतं दोषभाजनम्।

ध्यानाग्निना च संताप्यं ह्यंतस्तापोऽयमीरितः।

आयुधैश्चबहिस्तापो धारणाख्यस्तथांतरः।

मन्त्रन्यासैश्शरीरस्य दिव्यभावो विधीयते।

बृह्मात्मकतया ध्यानमात्मानश्शुद्धिरीरितम्।

विष्णोस्वरूपस्मरणं मनश्शुद्धिरिहोच्यते।10

प्रसादतीर्थग्रहणात् प्राणशुद्धिरुदाहृता।

वाक्शुद्धिःकीर्तनाद्विष्णोः श्रवणाच्छ्रोत्रयोर्मता।

एवं शुद्धिपरो विप्र स्साक्षान्नारायणो मतः।“

पलायंते शरीरस्थाः पातकास्तस्य दर्शनात्।

विचिंत्य पापपुरुषं श्मशानस्तम्भसन्निभम्।

उपपातकरोमाणं महापातकविग्रहम्।

संशोष्यवायुबीजेन वह्निबीजेन दाहयेत्।

अमृतीकरणंकुर्याद्वारुणेनामृतात्मना।

गात्रंदाह्यं पृथिव्या च व्योम्नाचेंद्रियकल्पनम्।

एवं संशोधयेद्देहं पूरकुम्भकरेचकैः।15

विस्तरेणापि वक्ष्यामि **भूतशुद्धिं** निशामय।

भूतशुद्धिं विनानैव ह्यधिकारोऽन्य पूजने।

विचिंत्यहृदयेविष्णुं संस्थितंपरमेपदे।

बहिर्निर्गमयेत्तं तु सुषुम्ना दक्षिणेन तु।

वृत्तमण्डलमध्यस्थं सहस्रादित्यसन्निभम्।

मन्त्रात्मानं तु तं ध्यात्वा ह्युपरिद्वादशांगुले।

प्रभाचक्रं तु तदधस्तत्वाधिष्ठातृसंयुतम्।

निष्कळं मन्त्रदेहं च चिंतयेत्पुरुषोत्तमम्।

तदधस्तात्स्मरेद्भूमिं चतुरश्रां तु पीतलाम्।

शब्दाद्यैःपंचभिर्युक्तां वज्रलांछनलांछिताम्।20

पुरप्राकार सुसरिद्वीपार्णव समाकुलाम्।

बाह्यंस्वदेहेविशतीं पूरकेण विचिंतयेत्।

जान्वोःपादतलं यावत्तावद्व्याप्तां क्रमेण तु।

कुम्भकेण च तां पृथ्वीं मन्त्रसूक्तैस्स्वकेतनः।

शनैश्शनैः लयंकुर्यात् गंधशक्तौ च तां पुनः।

रेचयेद्गंधशक्तिं च सर्वभूतेष्वयं विधिः।

बहिस्थांपूरकेणैव ह्यन्तःकुर्याल्लयं नयन्।

कुम्भकेनैवतन्मात्रे रेचकेन बहिःक्षिपेत्।

तोयाख्ये च महाधारे ततस्तोयं च वैष्णवम्।25

ससमुद्रसरितस्त्रोतो रसषड्कंच सौषधि।

अर्धचंद्रसमाकार कमलध्वज शोभितम्।

वारुणंविभवं भाव्यं ध्यात्वा तेनाथविग्रहं।

संपूर्णपूरकाख्येन करणेनशनैश्शनैः।

ऊरुमूलाच्चजान्वन्तं शरीरंमण्डलंस्वकम्।

एनाखिलं तु संव्याप्तं कुम्भकेन स्मरेद्द्विजाः।

तन्मध्ये वारुणंमन्त्रं धारणाख्यं विचिंत्यत।

अंमयं विभवं सर्वं तन्मन्त्रे विलयं गतम्।

तन्मध्ये रसशक्तौ तु साशक्तिर्वह्निमण्डले।

रेचकेन विनिक्षिप्य तथा वह्नेश्च वैभवम्।30

त्रिकोणभवनाकारं दीप्तमद्भिर्विभूषितम्।

विद्युच्चंद्रार्कनक्षत्र मणिरत्नैश्च धातुभिः।

स्वप्रकाशशरीरैश्चाप्यशरीरैश्च खेचरैः।

चिह्नितं स्वस्तिकैर्दीप्तैर् ध्यात्वेवं विभवंमहत्।

तैजसं मुनयश्चाथ तन्मन्त्रं विधिनास्मरेत्।

तन्मण्डलांतरस्थं प्रोच्चरन्वै तमेव हि ।

प्रविष्ठं पूर्ववद्ध्यायेत् तेनैव करणेन तु।

आनाभेःपायुपर्यन्तं व्याप्तं कृत्वा विधाय च।

तमेव विभवंसर्वं तैजसं परिभावयेत्।

तन्मन्त्रविग्रहं शान्तं तन्मन्त्रंचानलात्मकम्।35

रूपशक्तौ लयंयातं शक्तिस्संविस्मयातु सा।

तया मन्त्रशरीरस्थं स्वशक्त्याविलयाकृतम्।

रेचकेन तु तां शक्तीं बाह्याधारे बहिःक्षिपेत्।

ततस्तु वायुबीजं वै विभवं बाह्यतस्स्मरेत्।

वृतंराजोपलाभं तु बिम्बैर्युक्तं स्व तेजसैः।

पूर्णं नानाविधैर्गंधै रनेकैस्तद्गुणैस्तथा।

स्वमन्त्रेण समाख्यातं धारणाख्येन संस्मरेत्।

तथा स्वरूपं तन्मन्त्रं ध्यात्वोच्छार्य समाहरेत्।

पूर्वोक्तकरणेनैव वायव्यं विभवंतु तम्।

अधिष्ठातृ लयंयांतं स्मृत्वा तं च महाबलम्।40

स्पर्शनाख्य महाशक्तौ तां  शक्तिमविनश्वरम्।

व्याप्तं नित्यामनित्यां च स्वशक्तिविभवन्वितम्।

शब्दाख्ये तु महाधारे निक्षिपेद्व्योममण्डले।

ध्यात्वापि विभवं सर्वं व्योमाख्यं विग्रहाद्बहिः।

नानाशक्ति समाकीर्णं तद्रूपंचाञ्जनप्रभम्।

अविग्रहैश्शब्दमयैः पूर्णंसिद्धिरसंख्यकैः।

तन्मन्त्रे धारणामन्त्रं व्योमाख्यं संस्मरेत्पुनः।

धारयन्तं स्वमात्मानं स्वसामर्थ्येन सर्वदा।

शब्दमात्रस्वरूपम् च व्यापकं विभवेष्वपि।

धिया च संपरिच्छनं कृत्वा विन्यस्य विग्रहे।45

प्रागुक्तकरणेनैव एन  व्याप्तं तु भावयेत्।

आकण्ठाद्ब्रह्मरंद्रान्तं व्योमाख्यं विभवेन च।

संधार्यकुम्भकेनैव यावत्कालंतु योगिनः।

ध्यायेत्परिणतं पश्चात् स्वमन्त्रेण तदम्बरम्।

व्योमाख्यं धारणामन्त्रं शक्तौ परिणतं स्मरेत्।

तांशक्तिं बृह्मरंद्रेण प्रयांतिमनुभावयेत्।

युक्तांशक्तिचतुष्केण गंधाद्येनाविनश्वरीम्।

आश्रये निष्कळम्मन्त्रम् तदधिष्ठातृसम्युतम्।

समन्त्रं विभवम् भौतमेवमस्तं नयेत्क्रमात्।

चैतन्यं जीवसंभूतम् स्वस्फुरस्तारकोपमम्।50

भावनीयं तु विश्रान्तं निस्सृतं भूतपंचकात्।

निष्प्रपंचे परेमन्त्रे पंचशक्त्यात्म विग्रहे।

अनेन क्रमयोगेन जीवात्मानमात्मना।

ईक्षतेतद्ददाकाशे त्वचलं सूर्यवर्चसम्।

स्फुरद्युतिभिराकीर्णमीश्वरं व्यापकं परम्।

ततो मन्त्रशरीरस्थं समाधिंचाभ्यसेत्परम्।

गंधतन्मात्रपूर्वाभिः युक्तत्वात्पंचशक्तिभिः।

हेयंचेत्तमिदंबुध्या यदा तत्स्थानबृंहितः।

अतृप्तोऽकृतःकृत्यश्च मन्त्रहृत्पद्मसेवनात्।

षष्ठेपदेह्यात्मतत्त्वज्ञानरज्जुबलेन च।

हृत्कोटराध्वनिर्यां तम् स्वात्मानं स्वात्मनास्मरेत्।

भा रूपनाडिमार्गेण मन्त्रवह्नेश्शिखात्विषा।

पद्मसूत्रप्रतिकाशा सुषुम्नाचोर्ध्वगामिनि।

तद्ब्रह्मरन्ध्रगस्साक्षात् सुखद्योतनसत्तम।

शनैश्शनैश्च स्वात्मानं रेचयेज्ज्ञानवायुना।

मात्रकारणषट्कं चाप्येवमव्यापकं त्यजेत्।

प्राप्नुयाच्च तदूर्ध्वं तु यःपरात् प्रभुविग्रहात्।

उदितो जायते तत्र तेजःपुञ्जोह्यनूपमः।

तत्प्रभा चक्रनाभिस्थ स्वानंदानंदनंदितः।

परंपरात्परस्यास्य परतत्वस्य वै ततः।60

तत्त्वं निर्मुक्तदेहस्य केवलस्य चिदात्मनः।

उदितो हि महानंद स्साशक्तिर्वैष्णवी परा।

अलुप्तकर्मकर्तारं जीवं कृत्वा तमात्मनात्।

यत्रोदिता च तत्रैव पुनरेवावतिष्ठते।

तच्चसंकल्पनिर्मुक्त मवाच्यं मुनिसत्तमाः।

एवंस्वस्थानमासाद्य त्यक्त्वाभौतं च विग्रहम्।

तरस्थितो दहेत्पिण्डं शक्ति तन्मात्रवर्जितम्।

षट्कोणं विशिखासारं निर्गतं तृणरूपिणम्।

संस्थितस्साधकोनित्यमुक्तस्वात्म शरीरिणी।

इच्छानिर्मतनोत्तेन मन्त्रजेन तु वह्निना।65

अद्वह्निदेशादारभ्य तं पिण्डं ज्वलितं स्मरेत्।

दक्षिणाग्रकराङ्गुष्ठ पान्तदेशेरमक्षरम्।

ध्यात्वायुगांतहुतभुग्रूप ज्वालाशतावृतम्।

तेन स्वविग्रहं ध्यायेत् प्रज्वलन्तं समन्ततः।

नाभिकन्दान्तरेदेशे नेत्रमन्त्रेण पावकम्।

ध्यायेज्ज्वालागुणोपेतं तं नयेत्तेन भस्मसात्।

दहनेनस्वकं देहं हृन्मन्त्रं भावयंस्ततः।70

देहजांभावयेज्ज्वालां मन्त्रनाथे लयं गतः।

भस्मराशी समप्रख्य शान्ताग्निं तदनुस्मरेत्।

ध्यात्वा तन्निसृतेनैवत्वमृतौघेन चांबरात्।

प्लावयेद्देहजं भूतिं सर्वंध्यायेत्सुधात्मिकाम्।

तत्राधारमयां शक्तिं मध्ये विन्यस्यवैष्णवीम्।

बीजभूतां च सर्वस्य तदुत्थंचांबुजं स्मरेत्।

षडत्वतत्वभूतं च सितं तेजोमयंशुभम्।

मण्डलं त्रितयात्पूर्णं स्फुरत्किरणभास्वरम्।

मन्त्रात्मानं च तन्मध्ये ध्यायेन्नारायणं प्रभुम्।

निष्कलंकेवलंशुद्धं पंचसन्मन्त्र विग्रहम्।

तन्मन्त्रशक्तिभिर्भूयो भावयेन्मूर्चितं द्विजाः।75

व्योमादोपंचभूतीय मात्रमीश्वर पंचकम्।

तेभ्यःप्रसारितं चैव व्योमाद्यं विभवं स्मरेत्।

संयोगजनितंपिण्डं ध्यायेद्विभवपंचकात्।

सहस्त्रसूर्यसंकाशं शतचंद्रगभस्तिमत्।

निर्मलंस्फटिकप्रख्यं जरामरण वर्जितम्।

जनित्वेनास्यपिण्डं तु परमं भोगमोक्षयोः।

साधनंसहजंसर्वदेहिनां मुनिसत्तमाः।

समाधितःक्रमेणैव सम्यसंक्षाळनेन च।

स्वपदान्निस्तरङ्गाच्च कृत्वाशक्त्यासहोदयम्।

स्वानन्दं च महानंदात् स्वानंदाच्चाश्रयेत्ततः।80

मारीचंनाभिकंचक्रं तस्माद्रूपं स्वकं च यत्।

सूर्यकोटिप्रतीकाशं प्रस्फुरन्तं स्वयाऽभया।

कदंबगोळकारं च निशांबुकणनिर्मलम्।

एवं मानसमानीय स्वस्थानात्स्वात्मना द्विजाः।

विशेन्मन्त्रशरीरं च बृह्मरंद्रेण पूर्ववत्।

ज्योत्स्नानाडिपथेनैव प्रविश्यच कचान्तरम्।

स्ववाचकंभावयन्वै ध्वनिना निष्कलेनतु।

ततस्तु निष्कळन्मन्त्राद्यावद्भौतिकविग्रहम्।

पंचोपनिषदात्मान मासाद्यालोकविग्रहम्।

स्वमन्त्रादमृतौघेन सेचयेद्विग्रहं स्वकम्।85

ततस्समात्रंतद्बिम्बमाकृष्य हृदयेन्यसेत्।

निस्तरंगापराशक्तिः महानंदमया च सा।

स्वानंदं च प्रभाचक्ररूपमात्मीय विग्रहम्।

सुषुम्नां तादृशंमार्गं पिण्डमन्त्रं च निष्कळम्।

सत्ताड्योमन्त्रशक्तोयो धारयेत् स्वरपंचकम्।

तेषांविर्भावसिद्धो यः पिंडस्तत्समुदायकः।

स्थूलसूक्ष्मपराख्येन त्रिविधेन तु सत्तमाः।

करणेनोदितास्सम्यक् शुद्धिरेषा च भौतिकी।

अनयाचेंद्रियाणां च शुद्धिरुक्ता महात्मभिः।

उपासकेनकर्तव्या पिण्डशुद्धिर्मुनीश्वराः।90

पश्चाद्यागःप्रकर्तव्यो बाह्याभ्यंतर भेदाः।

मुनय ऊचुः-

बृह्मन्ननुग्रहोऽस्माकं सर्वधा भवताकृतः।

यागांगभूतामन्त्रोक्त भूतशुद्धिर्यथा तथा।

आत्मशुद्धिर्प्रवक्तव्या पूर्वोक्ताभावना मया।

जीवोयं बृह्मभावेन स्वात्मानं शोधयेत्कथम्।

मुख्येयमात्मनश्शुद्धिः स्वात्मा प्राप्तो पितामह।

किं त्वंगभूता यागस्य भूतशुद्धिरिहोदिता।

श्रीभगवानुवाच-

मुनयस्स्वात्मशुद्धिर्हि मुख्यैवात्म समागमे।

अङ्गभूतापि विज्ञेया वाक्याभ्यासेन केवला।

अशक्नुवन् भावयितुं वाक्यमेवसमभ्यसेत्।95

बृह्मोवाहम् नसंसारी नित्यमुक्तो न शोकभाक्।

अच्युतोऽहमनंतोऽहमव्ययोस्मि स्वरूपतः।

इति वेदोपनिषदा भावनाह्यात्मशोधिनी।

तस्याः प्रकारं वक्ष्यामि भवंतोमेनुयायिनः।

बृह्मणःप्रकृतिर्द्वैधा जीवाजीवविभेदतः।

अजीवप्रकृतिःप्रोक्ता हरिणाक्षेत्रलक्षणा।

क्षेत्रज्ञ लक्षणाभिन्ना प्रकृतिर्जीवसंज्ञिता।

क्षेत्रस्यधारणादामा जीवोऽयमज एव हि।

धार्यं वेद्यं शरीरं हि क्षेत्रमित्यभिधीयते।

क्षेत्रसंधारणाद्बृह्मन्! क्षेत्रज्ञात्मा प्रकीर्तितः।100

धार्यं तस्य शरीरं हि जीवोऽयमवधार्यताम्।

क्षेत्रक्षेत्रज्ञयोरात्मा स्वतन्त्रस्स्वाश्रयो हरिः।

प्रयोजकःपोषकश्च प्रकाशक इतीरितः।

द्रष्टाश्रोताऽनुमंता च धारकोरंजकोऽच्युतः।

अस्मात्सत्वं सदाभाव्यं परमात्मनि केशवे।

क्षेत्रं च भगवान्विष्णुः क्षेत्रज्ञोपि हरिर्मतः।

सर्वनामासर्वरूपस्सर्वस्सर्व रसस्स्मृतः।

अचिन्नैव विनाति कोहं कस्योस्मि कुत्र च।

नातोब्र्रह्मात्मकत्वेन बोधस्तस्य विधीयते।

अहमस्मीति बोधोऽयं चेतनस्य स्वतोमतः।105

तस्माबृह्मात्मकत्वं च बृह्मधारत्वमुच्यते।

आत्मनश्चामरश्शब्धो बृह्मात्मत्व विभावनात्।

विमोक्षस्संस्मृतेर्विप्रा चेतनस्यैव निश्चितः।

प्रकृतेर्देहरूपायाः कर्तृत्वं पुरुषं विना।

विज्ञेयं बंधनायैव तत्तत्वमविजानताम्।

अचेतनस्य कर्तृत्वे स्वरूपस्यच्च्युतिर्मता।

आत्मनोपि च कर्तृत्वं बंधनायैवबोधितं।

अस्वातन्त्र्याच्छरीरत्वा दाश्रितत्वाद्विशेषतः।

स्वातंत्र्येण च कर्तृत्वे स्वस्वरूपाच्च्युतिर्मता।

तस्मात्सर्वात्मनात्स्वस्य परस्यापिह्यनात्मनः।110

आत्मत्वं तत्स्वरूपत्वं जीव एव विभावयेत्।

प्रणमेद्भगवद्बुध्या विश्वं चिदचिदात्मकम्।

कुर्यात्सर्वाणिकर्माणि वासुदेवात्मकानि हि।

बृह्मार्पणं बृह्महविर्बृह्माग्नौ बृह्मणा हुतम्।

बृह्मस्तेनगन्तव्यं बृह्मकर्मसमाधिना।

आत्मनो बृह्मभावत्वं भावयेद्बंधमुक्तये।

बोधितं श्रुतिवाक्यैश्च स्मृत्यागमशतैरपि।

नाहंदेहो न च प्राणो नेंद्रियाणि तथैव च।

न मनोऽहं न वै बुद्धिर्नैव चित्तमहंकृतिः।

नाहंपृथ्वी न सलिलं न च वह्निस्तथाऽनिलः।115

नचाकाशो न शब्दश्च न स्पर्शश्च तथा रसः।

न हि गंधो न रूपं च न मायाऽहं न संसृतिः।

अहमात्मा च सर्वेषां साक्षीचेता सनातनः।

ब्रह्मास्मीति न संसारी तत्वमस्यादि वाक्यतः।

क्षेत्रक्षेत्रज्ञयोरेवमभेधो बृह्मणा समम्।

भूतानामात्मनश्शुद्धि रुदिता मुनिसत्तमाः।

अभेधं जीववर्योर्याज्जानाति मैव हि।

तावदाचरिनैर्वसिद्धिः कल्पस्वतैरपि।

अन्तर्यागविहीनस्यपूजा भवति निष्फला।

अतोवस्संविधास्यामिह्यन्तर्यागं समासतः।120

<u>इति चतुर्थःपादे- भूतशुद्धिकथनं नाम प्रथमोऽध्यायः</u>।

## बृहद्बृहे चतुर्थे-द्वितीयोऽध्यायः।

## <u>भगवत्परिचर्या(नित्याराधन विधिः)प्रकरणं</u>

<u>बृह्मोवाच-</u>

पद्मासनेस्वस्तिको वा तथायोन्यासने मुदा।

स्थित्वानिर्बाध देशे तु ध्यानयोगं समाचरेत्।

नाभिमेड्रान्तरे ध्यायेत् **शक्तिमाधार**रूपिणं।

तदूर्ध्वे **कालकूर्मं** तु विमलंदीप्त विग्रहं।

कूर्माकारंपरंदेवं शंखचक्रगदाधरम्।

तस्याङ्केपि च **नागेंद्रं** पूर्णचंद्रनिभाननं।

"फणासहस्त्रसंपूर्णं मदाघूर्णितलोचनम्।

चक्रलाङ्गलहस्तं च प्रणमंतं परात्परम्।

तदूर्ध्वं **वसुधांदेवीं** कुंकुमक्षोधसन्निभाम्।

हेमरत्नविचित्रांगां प्रसन्नवदनेक्षणाम्। 5

बद्धांजलिंशिरोदेशे संस्मरन्तीं विभोस्मरेत्।

चतुर्थाभाजिते क्षेत्रे नाभिमेड्रान्तरस्थिते।

एवमाधारशक्त्याध्या संस्मरेद्देवता इमा।

नाभौ**क्षीरार्णवं**ध्यायेत्कुंदेंदु दवळाकृतिम्।

स्त्रोतोरश्मिभिराकीर्णं पूर्णचंद्रनिभाननम्।

गम्भीरविग्रहं ध्यायेद्रूपवंतमरूपिणम्।

ततस्समुत्थितंपद्मं ध्यायेत्क्षीरार्णवोदरात्।

प्रशांतपावकाकार मुदयादित्यवर्चसम्।

**श्वेतद्वीपं** ततो ध्यायेद्वैकुण्ठम्च चतुर्विधम्।

वैकुण्ठं दिव्यलोकं च तथा जनपदंस्मरेत्। 10
वैकुण्ठंदिव्यनगरं विमानं च तथा विधम्।
तत्रानंदमयंसाक्षाद्भावयेद् रत्नमण्डपम्।
तस्मिन् सहस्रशिरसं देवमासनरूपिणम्।
सहस्रमणिज्योत्स्नाभि दीप्यमानरुचिंस्मरेत्।
**धर्मंज्ञानं च वैराग्यं ऐश्वर्यं** च क्रमादिमान्।
आसनस्यस्मरेत्पादा नाग्नेयादिषु वैष्णवः।
पुरुषाकृतयस्सर्वे स्थितास्सिह्मासनादधः।
महोत्साहामहावीर्या भगवत्पीठधारकाः।
पूर्वादि दिग्गताज्ञेया धर्मादीनांविपर्ययाः।
**अधर्मं च तथाऽज्ञानमवैराग्यमनैश्वरम्**। 15
पुरुषाकृतयश्चेमे बंधूककुसुमारुणाः।
प्रागीशानदिशोर्मध्ये प्रागाग्नेयदिगंतरे।
नैरृतिवारुणीमध्ये पाशीवायुदिगन्तरे।
**ऋग्वेदाद्यं** चतुष्कं तु पीठं हयनराकृतिम्।
ईशानसोमयोर्मध्ये प्रागन्तक दिगंतरे।
राक्षसान्तकदिङ्ग्मध्ये वायुसोमदिगन्तरे।
कृताद्यंयुगबृंदं तु कृष्णंवृषनराकृती।

सर्वे चतुर्भुजा एते द्वाभ्यां पीठविधारकाः।

द्वाभ्यांमौलिबद्धाभ्यां प्रणमंत्यासनस्थितम्।

तेषामुपैसंचिंत्यं पीठंबुद्ध्मयं परम्।20

**अव्यक्तमंबुजं**श्वेतं तदूर्ध्वेऽष्टदळं स्मरेत्।

तदूर्ध्वे **सूर्यबिम्बं** तु सूर्यकोटिसमप्रभम्।

तदूर्ध्वे **वह्निबिम्बं** तु वह्निकोट्ययुतप्रभम्।

**तमोरजश्च सत्वं** च गुणानेतान् क्रमात्स्मरेत्।

प्रणवस्य नतश्चैव तत्संज्ञौ तनुमध्यगौ।

बुध्द्यादि सत्वपर्यन्त तत्त्वमन्त्रगणास्स्मृताः।

ततश्चिदासनं दद्यात्पराहंता स्वरूपकम्।

आनाभि हृदयांतं तु पञ्चधा भाधिते पदे।

समुद्राद्यासनान्तं तु चतुर्भिःकल्पयेत्पदैः।

एकेनपञ्चमेवैव पद्माद्यासनकल्पनम्।25

भूतान्याधारशक्त्यन्त मेतच्चमातृकंगणम्।

वागादिकं तथाऽनंते भुवि श्रोत्रादि पञ्चकम्।

मनः क्षीरार्णवं ध्याये दहंकारंततोंबुजम्।

द्विरष्टकं च धर्माद्य मासं चापि विधिस्स्मृतः।

अथाव्यक्तं तदूर्ध्वस्थ मवधातं सरोरुहम्।

तमःप्रभृतयःप्रोक्ता गुणाह्यह्वत्रयात्मकाः।

एकेकालंवदन्त्येतद्भूतादि त्रितयात्मकम्।

चिदानंदमहंतास्थं पुमांसं संवदे विदुः।

अथवा गरुडंध्यायेदूर्ध्वंचैव चिदासनात्।

आत्मानमन्तरात्मानं परमात्मानमेव च।30

ज्ञानात्मानं ततो ध्यात्वा पद्ममष्टदळं तु यत्।

तस्यपूर्वादि भागेषु विमलाद्याश्चशक्तयः।

"विमलोत्कर्षीणीज्ञाना क्रियायोगा तथैव च।

प्रह्वीसत्यातथैशाना मध्ये शक्तिरनुग्रहा।

चामरांदोळित करा विचिंत्या नवमूर्तयः।"

जगत्प्रकृतये मध्ये योगपीठाय वै नमः।

दिव्यं च योगपर्यङ्कं तत्राऽनंतासनं स्मरेत्।

तद्भोगदिव्यशय्यायां महावैकुण्ठनायकम्।

श्रीभूम्यासहितंदेवं सर्वात्मानं हरिंस्मरेत्।

मानसैरुपचारैस्तु पूजयेन्मन्त्रपूर्वकं।35

आवाहनादिभिस्तत्र मन्त्रमूर्तौ जगत्प्रभुम्।

लक्ष्म्यासहसमानीय सूक्ताभ्यां न्यासविद्यया।

पुरुषाराधनेसर्वं सूक्तपूर्वं विचिंतयेत्।

तथैव पूजयेदंते महापुरुषविद्यया।

स्तुत्वानत्वापरिक्रम्य सबद्धांजलिरानतः।

गृहाणमानसींपूजां यथार्थ परिभाविताम्।

इति संप्रार्थ्यविधिना मानसं होममाचरेत्।

संकल्पजनितैर्द्रव्यैः पवित्रैःपारमार्थिकैः।

बाह्यप्रक्रिययासश्वत् पुरस्ताद्वक्ष्यमाणया।

यजेत कमलाकांतं भोगैस्सांस्पर्शिकादिभिः।40

प्रापणांतं विधायाथ कारिणंसंस्मरेद्गुरुम्।

जीवंतमथवातीतं तस्मैदद्यात्ततोऽखिलम्।

पितृणसंप्रीणयेच्चैव प्रापणांशेन मन्त्रवित्।

जीवितोप्यथवातीतान्यथार्थेनैव चेतसा।

परिवारान् स्मरेत्सर्वान् वक्ष्यमाणा विशेषतः।

कारणेमयिसंलीनान्मनसाऽऽनीयभूरुहान्।

तत्तन्मन्त्रप्रयोगेन लयप्रक्रियया यजेत्।

कुर्याच्च मानसे होमं संस्कारंचेष्टदंशुभम्।

त्रिगुणाधारमध्यस्थे त्रिकोणेत्रिगुणाऽनले।

ध्यानारणीं तु निर्मध्य चिदग्निमवतार्य च।45

संस्कारैस्संस्कृतं कृत्वा वक्ष्यमाणधियाबुधः।

त्रिलक्षणस्थानगते वैष्णवे जातवेदसि।

नादावसानगमना त्तारिकायाःपरिष्कृतम्।

ब्राह्मंहविर्गृहीत्वाऽथ ब्रह्मरंद्रेणसंविशेत्।

ततो वह्निगृहम्गत्वा सर्पिर्संस्कृत्यशास्त्रतः।

कुर्वीतसकलंकृत्वा तेनाज्येन यथाविधि।

ततो होमावसानं तु सकलंकर्ममानसम्।

सन्न्यसेत्प्रेमभावेन वक्ष्यमाणधिया हरौ।

कथितो मानसोयागः कार्य आदेहपातनात्।

बाह्ययागं प्रवक्ष्यामि वासनामलशांतये।50

बहिर्वेद्यादिदेशस्य द्रव्यैस्तद्भावनेक्षितैः।

भोगभूतैर्हरेरिज्या बहिर्यागस्तु संस्कृतः।

मण्डपादिविनिर्माणं वेदीविरचनं तथा।

प्रागुक्तं वो मुनिश्रेष्ठास्सूर्याय  यजने यथा।

वैकुण्ठवैभवं स्मृत्वा स्मृत्वाप्राकृतवैभवम्।

उभयोराश्रयं बृह्म हृदि सूत्रमिवस्मरेत्।

आधारशक्तिमारभ्य शरीरे यद्विचिंतितम्।

पूजितंभावनाद्रव्यैर्बहिरावाहयेद्धि तत्।

वैकुण्ठवनभूपीठ नित्यमुक्तजनांस्तथा।

विचिंत्य कुसुमैर्दिव्यैसुषुम्नावर्त्मना बहिः।5

आनयेद्रचितेधाम्नि स्तंभतोरणमण्डिते।

तत्र संपूजयेद्देवं साङ्गंसायुधभूषणम्।

तत्रादौ योगपीठस्य पश्चिमेगुरुपूजनम्।

गुरुपूजार्थमाधारे पात्रंदिव्यं निवेशयेत्।

पूजयेद्गंधपुष्पाद्यै रात्मनोगुरुसंततिम्।

गुरुंनारायणाभिन्नं धृतबाहुचतुष्टयम्।

धृतोर्ध्वपुण्ड्रंपद्माक्षमालया समलंकृतम्।

कृपयाभगवत्तत्वं बोधयंतं मुमुक्षवे।

उत्तरेभगवद्भक्ता न्नारदादीन्विचिंतयेत्।

प्रणामैर्नाममंत्रैश्च पूजयेच्चंदनादिभिः।60

द्वारदेवान् समभ्यर्च्य पीठदेहंस्तथैव च।

यजेन्नारायणम्देवं कोटिबृह्माण्डनायकम्।

घण्टां वामे तु संस्थाप्य गरुडांकितमस्तकाम्।

ओंनमःपूर्वमुच्चार्य जगध्वनिपदं ततः।

मन्त्राऽत्रस्ततस्वाहा मनुर्घण्टार्चने ततः।

दक्षिणे शङ्खसंस्थानं तत्राधारं प्रकल्पयेत्।

अग्निमण्डलामाधारं दशतत्वसमन्वितम्।

शंखं सूर्यमयंध्यायेत् कलाद्वादश संयुतम्।

मध्ये तु षोडशकलं चंद्रबिम्बं विचिंतयेत्।

पूरयेत्तीर्थतोयेन कुम्भस्थेन महात्मना।65

तीर्थान्यावाहयेत् तत्र देवं तत्र प्रपूजयेत्।

आवाहनं स्थापनं च संमुखीकरणम् तथा।

सन्निरोधाऽवकुंठं च सकळीकरणं पुनः।

अमृतीकरणंकुर्यान्मुद्रया धेनुसंज्ञया।

शङ्खंदेवमयं ध्यात्वा पंचपात्राणिवै पुनः।

पाद्यार्घ्याचमनार्थं च प्रोक्षनार्थमथापरम्।

शुद्धोदकंपंचमं तु क्रमेणैव तु धारयेत्।

आधारोपरिसंस्थाप्य तोयद्रव्यैश्च पूरयेत्।

वामेकलशमाधारे स्थापयेन्मूलविद्यया।

मातृकांप्रतिलोमां च तत्वन्यासं विशेषतः।70

तेजस्सूर्यकलोपेतं मूलविद्याक्षराणि तु।

तीर्थान्यावाह्य कलशे तुळसीकुसुमोदकैः।

संपूज्यसप्तधामन्त्र्य संरक्ष्यास्त्रेणवाग्यतः।

प्रदर्श्यसुरभीं तत्र पूतंतोयं विभावयेत्।

तेनोदकेनशङ्खं च पात्राण्यन्यानि पूरयेत्।

गंधपुष्पाणिद्रव्याणि दृग्गोचरतयान्यसेत्।

प्रक्षाळ्यमूलमन्त्रेण शोध्यसंशोषणादिभिः।

पात्राणिपूततोयेनचोद्धरण्याप्रपूरयेत्।

विष्णुक्रांताचदूर्वा च श्यामाकं पद्मकं तथा।

पाद्यपात्रेप्रदेयानि तुळसीतोयमेव च।75

सिद्धार्थकांतिलान्दूर्वान् सर्षपान्सिततण्डुलान्।

तोयक्षीरफलान्यर्घ्ये द्रव्याणि परिपूरयेत्।

एलालवंगतक्कोल पुष्पाण्याचमनीयके।

सर्वौषधिसुगंधीनि स्नानीयेतुलसीम् तथा।

अन्यस्मिन्यपि पात्रेतु तोयमादायसर्वतः।

निक्षिपेन्मूलमन्त्रेन स्पृशन्  पात्रानि पाणिना।

मुद्रांकामदुघाम् तत्र प्रदर्श्यजलभाजने।

तेन पात्रांभसाप्रोक्ष्य मण्डलम् मण्डपम् तथा।

यागद्रव्यान्यशेषाणि ताडयेदस्त्रमन्त्रतः।

मूलेनपावयेत्पश्चात् तत्सर्वम्भोगतां व्रजेत्।80

ततो विष्णुं नमस्कृत्य श्रीभूम्यांसहितं तथा।

आधारशक्तिमारभ्य योगपीठांतमेव  च।

पूजयद्गन्धपुष्पैश्च तन्नामानि समुच्चरन्।

प्रणवादिनमोंतं च जेंतंनाम तथैव च।

पूजने सर्वदेवानां नाममन्त्रःप्रकीर्तितः।

पीठेन तं पादपीठं द्वारदेवम्स्तथैव च।

पूजयेत्परया भक्त्या ततो देवं समर्चयेत्।

ध्यात्वा नारायणम्देवम् नागभोगेस्थितं द्विजाः।

दोर्भिश्चतुर्भिस्संयुक्तं दिव्यसद्गुणमण्डितम्।

पंचशक्तिमयंदिव्यं पञ्चोपनिषदैस्तथा।85

साङ्गंसावरणंसास्त्रं मणिभूषणभूषितम्।

आवाह्यकर्णिकायां तु देवदेवं समर्चयेत्।

आवाहनंचासनं तु स्थापनं सम्मुखं तथा।

सन्निधौकरणम्चैव सकळीकरनम्पुनः।

प्रतिमायांप्रकर्तव्यं तत्र मुद्राप्रदर्शनम्।

प्राणप्रतिष्ठा कर्तव्या तत्वन्यासो विशेषतः।

पंचोपनिषदाबीजं मन्त्रन्यासमथाचरेत्।

मूलविद्याक्षरन्यासं तथा सूक्तम् च पौरुसम्।

मुनय ऊचुः-

आवाहनादि कर्तव्यं सूक्तमुद्राप्रदर्शनम्।

पंचोपनिषदंबीजं मन्त्रन्यास उदीरितः।90

तेषां तु लक्षणज्ञानं वक्तव्यं कमलासन।

यत्कृत्वा तु प्रकर्तव्यम् श्रीमदाराधनं हरेः।

श्रीबृह्मोवाच-

ऊर्ध्वांजलिमधःकुर्यादियम**मावाहनी**मता।

सेयं तु विपरीतास्यात् मुद्रा**स्थापन**कर्मणि।

बाह्याङ्गुष्ठद्वयामुष्टिमुद्रा स्यात्**सन्निधापनी**।

अंगुष्टगर्भिणीसैव मुद्रास्यात् **सन्निरोधनि**।

उत्थानमुष्टियुगळा **संमुखी**करणीमता।

अन्योन्यतर्जनीयुग्म भ्रामणाद**वकुण्ठनी**।

मातृकाकेशवाख्या च तत्त्वन्यसश्च वै पुनः।

करांग दशतत्वानां न्यसनात्सन्निधिर्भवेत्।95

साळग्राममणौ यंत्रे मण्डले प्रतिमासु च।

नित्यं पूजां हरेःकुर्यां न तु केवलभूतले।

पंचोपनिषदं न्यासः श्रूयतामविलंबितम्।

रहस्यस्सर्वतन्त्राणां हरिणा च प्रकीर्तितं।

"षौम्नाश्चपरायेति परमेष्ठ्यात्मने नमः।

यांनमो नमसायुक्तं परायपुरुषात्मने।

रांनमश्चपरायेति ततो विश्वात्मने नमः।

वांपरायनिवृत्यामा जेंतोनमःपुनःपुनः।

लां नमः परायेति तथा सर्वात्मने नमः।

इति मूर्ध्निच नासा हृद्गुह्यपादेषु विन्यसेत्।100

आत्मनश्चहरेश्चापि तन्न्यासःपरमाद्भुतः।

तस्मात्सर्वात्मनाविप्रः पंचोपनिषधो न्यसेत्।“

संचिंत्यनित्यममलं स्वप्रकाशमनामयम्।

सच्चिदानंदमद्वैतं भगवद्विग्रहं द्विजाः।

मूलांते देवदेवाय पाद्यादीन्क्रमशोऽर्पयेत्।

कल्पयामीति सूक्तस्यऋचाह्येकैकयाऽथवा।

पंचामृतैश्च शुद्धोदैः तथा संस्नापयेद्धरिम्।

कुम्भोदकैस्स्नानमन्त्रैः संस्कृतैस्तीर्थवारिभिः।

महाभिषेकविधिना स्नापयेत्पुरुषोतमम्।

तथा ह्याचमनंदेयं देहोद्वर्तनकं तथा।105

धौतमाचमनंदेयमुपवीतं च पादुका।

हृदयादिमहामन्त्रान् सन्यसेन्मूलविद्यया।

कर्णिकायांन्यसेद्देवं ध्यात्वा वैकुण्ठवैभवम्।

ततोऽङ्गपूजनंकुर्यात् भूषणायुधपूजणम्।

हृदयादिमहामन्त्रै हृदयादीन् प्रपूजयेत्।

पादमारभ्यमूर्धान्तं द्वादशांगेषु पूजयेत्।

प्रणवादिनमोम्तैश्च केशवाद्यैःप्रपूजयेत्।

पादजानूरु जघनः कटिनाभ्युदरेषु च।

हृत्कंठबाहुवदन ललाटेषु क्रमादिमान्।

पूजयेत्परयाभक्त्या गंधपुष्पैर्महामते।110

प्रणवादिनमोम्तैश्च केशवाद्यैःप्रपूजयेत्।

पादजानूरु जघनः कटिनाभ्युदरषु च।

हृत्कंठबाहुवदन ललाटेषुक्रमादिमान्।

किरीटादीननुध्याय चतुर्बाहुचतुर्मुखान्।

कृतांजलिपुटान्मूर्ध्नि दिव्यरूपान् प्रपूजयेत्।

किरीटादीनमध्याय किरीटाय नमो वदेत्।

दक्षिणेश्रस्वणे दक्षकुण्डलाय नमस्तथा।

वामकुण्डलमानंय वामतो वनमालिकाम्।

प्रणवादीर्नमोंतोऽयं सर्वत्र मनुरीरितः।

श्रीमत्तुळस्यै च नमः पुरतोहरमेव च।

श्रीवत्सं कौस्तुभंकाञ्चीं पीताम्बरमनुस्मरेत्।

आङ्गुळीयं च वलयमङ्गदंपादभूषणम्।

भगवद्भूषणान्येवं पूजयेत्कुसुमोत्कुरैः।115

सुदर्शनं हेतिराजं रक्तवर्णं कृतांजलिम्।

आलोकयंतं लक्ष्मीशं पुरुषं मूर्ध्निधारिणम्।

भगवच्चक्रमम ज्वालामालिवरायुधम्।

नंदकाख्यं तथा खड्गपुरुषं खड्गिधारिणम्।

तथैव पद्मपुरुषशिरस्शार्ङ्गधरं नमेत्।

सर्वं दिव्यायुधं नत्वा पादसंवाहिनीस्तथा।

चतुर्भुजं नागराजं कृतांजलिपुटं स्मरेत्। 120

हलं च मुसलंचैव धारयंतं हरेर्मुखम्।

पिबंतमुल्लसत्स्मेर सहस्रफणमण्डलैः।

एवं संपूज्य देवेशं श्रीदेवीं दक्षिणे यजेत्।

भूदेवी वामतःपूज्या नीळांचाग्रे समर्चयेत्।

विमलाद्यास्तु संपूज्या दळेष्वानीत चामराः।

वासुदेवादयःपूज्याः पूर्वादिक्रमतोबुधैः।

वासुदेवस्सीरपाणिः प्रद्युम्नश्चाऽनिरुद्धकः।

दिक्षुकोणेषु तत्पत्न्यो लक्ष्मीर्देवीरतिर्ह्युषा।

द्वितीयावरणं पश्चात्केशवाद्यास्सशक्तयः।

श्रीर्लक्ष्मीःकमलापद्मा पद्मिनीकमलालया। 125

रमावृषाकपिर्धन्या पृथ्वियज्ञा तथेंदिरा।

शक्तयःकेशवादीनां संप्रोक्ताःपरमेपदे।

संकर्षणादयश्चैव सपत्नीकास्समंततः।

संकर्षणो वासुदेवः प्रद्युम्नश्चाऽनिरुद्धकः।

पुरुषोत्तमोऽधोक्षजश्च नृसिह्मोऽच्युतसंज्ञकः।

ज़नार्दन उपेंद्रश्च हरिःकृष्ण इतीरिताः।

हिरण्याहरिणीनद्या नित्यानंतात्रया सुखा।

सुगंधासुंदरीविद्या सुशीला च सुलक्षणा।

संकर्षणादि मूर्तीनांशक्तयस्संप्रकीर्तिताः।

इज्याममत्स्यादयःपश्चात् सपत्नीकाः पृथक्पृथक्।130

वेदावेदवतीधात्री महालक्ष्मीसुखालया।

भार्गवी च तथा सीतारेवतीरुक्मिणीप्रभा।

मत्स्यकूर्मादिमूर्तीनां शक्तयस्संप्रकीर्तिताः।

पश्चात्सशक्तयःपूज्या श्शंखचक्रादि हेतयः।

शंखचक्रंगदापद्मं शार्ङ्गम् मुसलं हलस्म्।

भाणश्च खड्गखेटादि क्षुरिका दिव्यहेतयः।

भद्रासौम्या तथा माया जया च विजयाशिवा।

सुमंगला च नंदा च हेता रक्षा सुरक्षिणी।

शक्तयो दिव्यहेतीनां पूजनीयास्सनातनाः।

बहिर्लोकेश्वरःपूज्यास्साध्याश्चैव मरुद्गणाः।135

नवमावरणं सर्वमर्चयेत्परमात्मनः।

पुनरर्घ्यादिकं दत्वाधूपदीपान्निवेदयेत्।

वैनतेयादयःपूज्या विष्वक्सेनादयस्तथा।

चण्डाद्याद्वार्तपालैश्च विष्णोरतुलतेजसः।

प्रागुदीच्यां तु सेनेशं सपत्नीकं सपूजयेत्।

पत्नीं सूत्रवतीं नाम्ना नागराजं च वारुणीम्।

वैनतेयं च कांतिं च सुकीर्तिं च प्रपूजयेत्।

गजाननो जयत्सेनो हरिवक्रस्तथैव च।

कालःप्रकृतिरित्येते विष्वक्सेनानुयायिनः।

विष्वक्सेनस्तु सेनानीः पार्षदप्रवरो हरेः।140

चण्डप्रचंडोभद्रश्च सुभद्रश्च जयस्तथा।

विजयोधातृनामा च  विधाता च परोमताः।

द्वौ द्वौ पूर्वं समारभ्य द्वारदेशेषु कीर्तितौ।

सर्वे चतुर्भुजाःप्रोक्ता श्शंखचक्रगदाधराः।

पुनःपूर्वं समारभ्य कुमुदादीन् प्रपूजयेत्।

कुमुदंकुमुदाक्षं च पुण्डरीकाक्ष वामनौ।

शंकुकर्णस्सर्वनेत्रं सुमुखं सुप्रतिष्ठितम्।

ति नारायणं देवं मुमुक्षुःप्रयतस्सदा।

पूजयेत्परयाभक्त्या नानासंभारसाधनैः।

स्नानमाचमनं वासो बृह्मसूत्रोत्तरीयकम्।145

पादुकांभूषणान्यङ्गे छत्रंचामरमेव च।

चंदनंकुसुमान्येवं धूपमष्टाङ्गमुत्तमम्।

दीपं च दद्यान्मूलेन परमान्नं निवेदयेत्।

निवेदनप्रकारस्तु  श्रूयतां मुनिसत्तमाः।

पूर्वोक्तविधिना   संयङ्निष्पन्नं यद्धविर्भवेत्।

पाषण्डपतिताशुद्धविकर्मस्थान्जपेक्षितम्।

शुद्धसत्वगुणोपेतमुच्छ्वास स्पर्शवर्जितम्।

घण्टाशंखनिनादेन मानितं महानसात्।

जयशब्दैर्नमश्शब्दैः मुद्धोषितमितस्ततः।150।

स्थापयेत्पुरतोविष्णोर्मनुना शोधितेषु च।

पात्रेषुपायसंशुद्धं सिताज्यपरिपूरितम्।

सिद्धौदनंदधिक्षीर मोदकापूपमंडकान्।

पूलिकाघृतपूरं च शाकराजिफलानि च।

अन्यानि लोकरम्याणि चाविरुद्धा न शास्त्रतः।

तुळसीगंधपुष्पैश्च संपूज्यान्नं हरेःप्रियम्।

संप्रोक्ष्याऽर्घ्यजलेनैव संरक्ष्यास्त्रेणसर्वतः।

धेनुमुद्रांप्रदर्श्याऽथ देवायविनिवेदयेत्।

भोज्यासनेसन्निविष्टं श्रियासार्धंजगत्पतिम्।

अर्घ्यंपाद्यादिकंदेयं पीठेसंस्थाप्य पूर्ववत्।155

मधुपर्कःप्रदातव्यः पयोदधिमधुप्लुतः।

देयमाचमनंपश्चात् तदन्नंदर्शयेद्धरिम्।

इदंहविर्गृहाणेश रचितं तव भक्तितः।

आपोशनंजलेनैव कारयेत्परमात्मने।

प्राणाहुतिं प्रयुज्याथ तत्तन्मुद्राप्रदर्शनैः।

भोजनंभावयेत्पश्चात् मन्त्रराजं जपन्स्थितः।

मध्येनीराजयेद्दीपैः शालिपिष्टविनिर्मितैः।

राजिकालवणोपेतैः कृतैरुत्तानभाजने।

दृष्टिदोषविघातार्थं देवदेवेशमच्युते।

पुष्पंपत्रंफलंतोयं ये मद्भक्त्या प्रयच्छति।160

तदहंभक्त्युपहृतमश्नामीति वचस्तव।

इदं संचिंत्यदेवेश धीनस्य मम केशव।

गृहाण देवदेवेशप्रणतस्यदयानिधे।

कृत्वा यवनिकांमध्येनैच्यमावेदयेन्निजम्।

साङ्गं सावरणंदेवं चेतनापरिचिंतयन्।

हेमपात्रगतंदिव्यं जलंचंद्रक पंकिलम्।

शीतळं बहुळामोदमभिमन्त्र्य निवेदयेत्।

आपोशनं पुनर्दत्वा करोद्वर्तनं तथा।

शुद्धमाचमनंकुर्यात्सुगंधेन विशोधयेत्।

भोज्यासनात् स लक्ष्मीकं दत्वा सद्रत्नपादुकाम्।165

नयेत्पीठं जपन्सूक्तं ताम्बूलंप्रोक्ष्यसार्पयेत्।

पुनस्संपूजयेद्भक्त्या कुसुमैर्धूपदीपकैः।

धूपस्मंत्रेणदेवस्य धूपयेदलकावळिम्।

नीराजयेद्विधानेन नानावाद्याभिवादनैः।

आदर्शं दर्शयेत्पश्चात् प्रणिपादप्रदक्षिणम्।

कुर्यात् स्तुतिं स्थिरांभक्तिं प्रार्थयेत्पुरुषोत्तमात्।

अपराधक्षमाप्याथ  व्यजनैश्चामरैरपि।

संपूज्य भुक्तशेषेण बलिं भुविविनिक्षिपेत्।

चण्डादिद्वारपालानां सर्वेषां च दिवौकसाम्।

दद्यादुदकपूर्वं तु हविश्शेषं द्विजोत्तमाः।170

अन्त्यर्चापौरुषस्यास्य सूक्तस्य सुरसत्तमान्।

विष्णर्पितंचतुर्भागं क्रमाद्दन्यस्य चार्पयेत्।

अनंतताार्क्ष्यसेनेश पवित्राणां निवेदयेत्।

तीर्थेनसहितं हव्यं पृथक्पात्रे प्रतिक्षिपेत्।

सर्वेभ्यो विष्णुभक्तेभ्यः प्रसादं तीर्थसंयुतम्।

दत्वात्मानं च मनसा कृतार्थं भावयेत्कृती।

दासोहंभावयेत्पश्चात्स्वामिनं भावयेद्धरिम्।

चेतनाचेतनंसर्वं शरीरं स्वामिनस्स्मरेत्।

आत्मनो धारकंदेवं हरिमात्मातया स्मरेत्।

स्वकर्तृत्वं परित्यज्य तदाज्ञापालनेन हि।175

कर्तव्यं स्वोचितंकर्म यावदात्मस्थितिर्भवेत्।

स्वरूपस्थितयाश्रित्य भगवच्छेषवैभवम्।

आकांक्षेन्नित्यनिरवद्यत्यंत भगवत्सुखम्।

परमैकांतिकात्यंत परभक्ति परो भवेत्।

तेनैव नित्यकैंकर्य स्वरूपं स्थितिमेष्यति।177

इति **भगवत्परिचर्याप्रकारो (नित्याराधन विधिः)नाम** द्वितीयोऽध्यायः।

## अथ त्रितीयोऽध्यायः-

## अग्नियजन विधिः

बृह्मोवाच-

अथाऽग्नियजनं वक्ष्ये वैष्णवस्य विशेषतः।

पूजांते सर्वदा होमो ब्राह्मणस्य विधीयते।

न्यायार्जितैस्साधनैश्च दान होमार्चनादिकम्।

कुर्यान्नोचेदधोयाति नारायणपराङ्मुखः।

होमांते पितृयागंस्यात्प्रद्युम्नादि धियो द्विजाः।

वैष्णवेष्टिश्चकर्तव्या ह्याज्ञेयं परमात्मनः।

वैदिकस्तान्त्रिको विप्राः मखोयं द्विविधस्मृतः।

अधिकारस्यभेदात्तु योनोपैतिहरेःपदम्।

भूमिंविशोद्य यत्नेन समंकुर्याद्विचक्षणः।

कुण्डं तु तत्र कर्तव्यं हस्तमात्रेण यत्नतः।5

आत्मनःपंचमांशोयं हस्त इत्येकशाखिनः।

कर्तुर्दक्षिणहस्तस्य मध्यमांगुळिपर्वणः।

चतुर्विंशतिभिर्हस्तः पूर्वोक्ताद्विगुणोमतः।

युगानामसुरोधेन विज्ञेयस्सर्वकर्मसु।

पंचमांशेननिखनेदंतःकोणचतुष्टयम्।

दिशिदिश्यंतरंचैव पार्श्वस्थलचतुष्टयम्।

एवं सु लक्षणं कृत्वा बहिःकुर्याच्चमेखलाम्।

द्वादशाष्टचतुर्मानां स्वांगुळैश्च प्रकल्पयेत्।

चतुष्कंत्रितयंकुर्या देवंस्यान्मेखलाक्रमः।

कुण्डस्यपश्चिमेभागे योनिंकुर्यात्सुलक्षणम्।10

अश्वत्थपत्रसदृशीं कुण्डे किंचित्प्रतिष्ठिताम्।

षट् चतुस्त्र्यंगुलासापि भवेन्निम्नाक्रमाद्द्विजाः।

विस्तारेणापि सा योनिर्भवेत्पंचदशांगुला।

मूलंनाळं तथाऽग्रं व्युत्क्रमात्यष्टचतुस्त्रिकम्।

तन्मानांगुळमानंस्यात् तदेतत्कुण्डलक्षणम्।

एकहस्तस्यकुण्डस्य प्रकारोऽयं प्रदर्शितः।

द्विहस्तकुण्डमप्येवं द्विगुणीकृतमेखलम्।

नाभिरप्यथवाकुण्ड मेकमेखलकं भवेत्।

संक्षेपकर्मसु तथा वर्तुलं प्रोच्यते मया।

चतुष्कोणैकहस्तस्य बाह्यकुण्डस्य लक्षणम्।15

समंविधायसूत्रेण भ्रामयेदभितो द्विजाः।

कोणेकोणे यदधिकम् तद्दिक्ष्वेव विनिर्दिशेत्।

कुण्डं च वर्तुलंकुण्डं ततस्यादर्धचंद्रकम्।

दिशिचोत्तरकुंडोऽथ कोणभागेऽर्धभागतः।

बहिरैंद्र्याश्ववारुण्या यत्नान्मध्ये तु लांछयेत्।

संस्थाप्य भ्रामयोदेवमर्धचंद्रं सुशोभनम्।

मेखलाद्यष्टपत्राणि वर्तुलस्यविभोदत।

पद्माकारंभवेदेतत्पुण्यं सर्वफलप्रदम्।

शतहोमेऽरत्निमात्रं तदर्धेमुष्टिसम्मितम्।

द्विहस्तमयुतेलक्षे चतुर्हस्तमुदीरितम्।20

दशलक्षेषु षट् हस्तं कोष्ठमष्टकरं स्मृतम्।

एकहस्तमिदंकुण्डं एकहस्ते विधीयते।

लक्षाणांदशकरंयावत्तावद्धस्तेन वर्धयेत्।

दशहस्तमिदंकुण्डं कोटिहोमेपि शस्यते।

इति वा कुण्डमानंस्यान् **मेखलामानमु**च्यते।

कुण्डानांयादृशंरूपं मेखलानांच तादृशम्।

कुण्डानांमेखलास्तिस्रः सत्वादिगुणरूपतः।

मुष्टिमात्रे तु ताः प्रोक्ता उत्सेधायामतस्समाः।

द्व्येकर्धांगुलमानेन भवंतिमुनिसत्तमाः।

अरत्निमात्रेकुण्डेस्युस्ता स्त्रिद्व्येकांगुळात्मिकाः।25

एकहस्तमितेकुण्डे वेदाग्निनयनांगुळाः।

मेखलानांभवेदंतः परितोनेमिरंगुळात्।26

एकहस्तस्यकुण्डस्य वर्धयेत्तांक्रमात्सुधीः।

दशहतांतमन्येषा मर्धांगुळवशात् पृथक्।

कुण्डेद्विहस्ते तान् ज्ञेयारसवेदगुणांगुळाः।

चतुर्हस्ते तु कुण्डे तावतावस्व ऋत्वर्क गुणांगुळाः।

कुण्डेरसकरे तास्स्युर्दशाष्टत्र्यंगुळान्विताः।

वसुहस्तमितेकुण्डे भानुपंक्त्यष्टकांगुलाः।

दशहस्तमितेकुण्डे मनुभानुदशांगुलाः।

होतुरग्रेयोनिरासा मुपर्यश्वत्थपत्रवत्।30

मुष्टयरत्न्येकहस्तानां कुण्डानां योनिरीरिता।

षट् चतुर्व्यंगुळायाम विस्तारोन्नतिशालिनी।

एकांगुलं तु योन्यग्रं कुर्यादीषदधोमुखम्।

एकैकांगुळतोयोनिं कुण्डेष्वन्येषु वर्धयेत्।

यावद् द्वयक्रमेणैव योन्यग्रमपि वर्धयेत्।

स्थलादारभ्यनाळम्स्याद्योन्या मध्ये सरंद्रकम्।

नार्पयेत्कोणकुण्डेषु योनि होमपरायणः।

कुण्डानांकल्पयेन्मध्ये नाभिमंबुजसन्निभाम्।

तत्तत्कुण्डानुरूपं वा मानमन्यानिगद्यते।

मुष्ठ्यरत्न्येकहस्तानां नाभिरुत्सेधमानतः।35

नेत्रवेदांगुळोपेतां कुण्डेष्वन्येषु वर्धयेत्।

यावद्वयक्रमेणैव नाभिं पृथगुदारधीः।

योनिकुण्डेयोनिमब्जं कुण्डेनाभिं विवर्जयेत्।

नाभिक्षेत्रं त्रिधाभित्वा मध्ये कुर्वीतकर्णिकाम्।

बहिरंशद्वयेनाष्टौपत्राणि परिकल्पयेत्।

कुण्डानांनवकंप्रोक्तं स्वस्वकर्मानुसारतः।

मुमुक्षूणां वैष्णवानां चतुरश्रं प्रकीर्तितम्।

सकामानां क्षत्रियाणां वर्तुलंपरिकीर्तितम्।

वैश्यानामर्धचंद्राभां शूद्राणांत्र्यश्रमीरितम्।

एतद्वर्णानुसारेण न निषिद्धंकदाचन।40

विशेषकाम्यहोमे तु सर्वेषामखिलानि तु।

पुत्रार्थं तु चतुर्णां तु योनिकुण्डे प्रकीर्तितम्।

अर्देंद्वाख्यं तु सर्वेषाम् वश्यादिशुभकर्मणि।

शतृक्षयार्धेत्र्यश्रंस्याद् वर्तुलं शांतिकर्मणि।

छेदमारणयोःकुण्डं षडश्रं तु प्रकीर्तितम्।

पद्माभं वृष्टिदंप्रोक्त मष्टाश्रं रोगनाशनम्।

विप्राणांचतुरश्रं तु मखे निष्कामकामयोः।

चतुरश्रंनिवृत्तानां सर्वेषामेवमीरितम्।

स्वरूपं च प्रवक्ष्यामि संस्कारं च विशेषतः।

"प्राच्यांशिरस्समाख्यातं बाहुदक्षिणसौम्ययोः॥45

उदरंकुण्डमित्युक्तं योनिःपादौ तु पश्चिमे।

स्थण्डिले वा प्रकर्तव्यो नित्यहोमो मनीषिणा।

विचारःकुंडनिर्माणे बहुःप्रोक्ताविचक्षणैः।

**<u>अष्टादश च संष्काराः</u>** कुण्डानां तु प्रकीर्तिताः।

वीक्षणं प्रोक्षणंचैव ताडनाभ्युक्षणे तथा।

खननंपूरणंचैव समीकरणमेव च।

कुट्टनंमार्जनं लेप त्रिसूत्रीकरणेपुनः।

अर्चनं वज्रकरणं चतुःपथ विभावनम्।

तनुपादाक्षीकरणं संस्काराष्टदशस्मृताः।

वीक्षणंमूलमन्त्रेण शरेणप्रोक्षणं मतम्।50

तेनैवताडनंदर्भैः वर्मणाऽभ्युक्षणं मतम्।

अस्त्रेण खननंचाग्नेर्हृन्मन्त्रेण प्रपूरणम्।

समीकरणमस्त्रेण सेचनं वर्मणामतम्।

कुट्टनं हेतिमन्त्रेण वर्ममन्त्रेणमार्जनम्।

विलेपनंकलारूपकल्पनं तदनंतरम्।

त्रिसूत्रीकरणंप्रोक्तं मेखलापरिवेष्टनम्।

अर्चनंगंधपुष्पाद्यैः अस्त्रेणधृडतां नयेत्।

हृन्मन्त्रेणकुशैश्चैव तत्र कुर्याच्चतुष्पथम्।

कवचेनैवकर्तव्यं तनुपादाक्षिपाटनम्।

पूर्वोक्तभूतशुध्यादि पात्रासादनमेव च। 55

पूजनं द्वारदेवानां मण्डपस्य च पूजनम्।

कृत्वा संप्रार्थ्य च गुरुं यागकर्मसमारभेत्।

संस्थाप्य प्रोक्षणीपात्रं प्रक्षाळ्य च सृचं सृवम्।

प्राणानायम्य मनसा श्रीमद्वैकुण्ठवैभवम्।

स्मृत्वा जप्त्वा मनु परं श्रीमदष्टाक्षरं सुधीः।

आज्ञयावासुदेवस्य तेनैवाहं प्रवर्तितः।

दासोऽहमधुनासम्यगार्जितैर्यज्ञसाधनैः।

स्वात्मानंसर्वगं सर्वशरीरं पुरुषोत्तमम्।

यक्ष्ये स्वरूपसंप्राप्तिद्वारा कैङ्कर्यसिद्धये।

कुण्डेवा स्थण्डिलेवापि रेखास्तिस्त्रःप्रकल्पयेत्। 60

ऊर्ध्वगाःप्राक्प्रतीचीस्तिस्त्रश्चोत्तर दक्षिणाः।

**प्रागग्राणां स्मृतादेवा मुकुंदेशपुरंदराः।**

**रेखानामुदगग्राणां बृह्म वैवस्वतेंदवः।**

आदायाष्टदळंमध्ये षट्कोणं त्र्यश्रगर्भितम्।

केवलाष्टदळंवापि वैष्णवानां प्रकीर्तितम्।

सर्वाण्यभ्यर्च्यतारेण योगपीठमथार्चयेत्।

ऋतुस्नातांमहालक्ष्मी मानयेत्कुशविष्टरे।

संपूज्य लक्ष्मीमनुना पद्माक्षींपद्मसंभवाम्।

क्षीरांबुराशिसंभूतां विष्णोरनपगामिनीम्।

मातरंसर्वजगतोरिरंसुं विष्णुमानयेत्।65

तिष्ठंतमृतुदानाय कर्तारमखिलेश्वरम्।

रेतोरूपं समानीय वह्निंचाऽरणिसंभवम्।

वैष्णवायतनाद्वापि विष्णुयाग समुद्भवम्।

आनीतं पात्रमध्यस्थं क्रव्यादांत्र विवर्जितम्।

चतुर्भिश्चैव संस्कारैस्संस्कृतं वीक्षणादिभिः।

योजयेद्वह्निबीजेन चैतन्यंपावके तदा।

तारेणमन्त्रितंमन्त्री धेनुमुद्राऽमृतीकृतम्।

अस्त्रेणरक्षितंपश्चात् कवचेनाऽवकुण्ठितम्।

अर्चितंत्रिःपरिभ्राम्य कुण्डस्योपरिदेशिकः।

प्रदक्षिणं स तारं च मन्त्रमष्टाक्षरं जपन्।70

आत्मनोऽभिमुखं वह्निं जानुभ्यामवनींगतम्।

विष्णुवीर्यधियादेव्या योनावेनं विनिक्षिपेत्।
पश्चात्तयोप्रदातव्यं विधिनाऽऽचमनादिकम्।
वह्निमन्त्रेणप्रज्वाल्य तत्र ध्यानं समाचरेत्।
विन्यसेदात्मनोदेहं मन्त्रैर्जिह्वा हविर्भुजी।
जिह्वास्तु त्रिविधाप्रोक्ता  गुणभेधेन कर्मसु।75
वैष्णवैस्तु सदापूज्या स्सात्विक्यो यागकर्मसु।
हिरण्याकनकारक्ता कृष्णान्यासुप्रजायते।
बहुरूपा च रिक्ता च सात्विक्यः परिकीर्तिताः।
काम्यकर्मसु राजस्यस्तामस्यः क्रूरकर्मणि।
नोपयुक्ता वैष्णवानां विष्णोराज्ञानुवर्तिनाम्।
लिङ्गपायुशिरोवक्र घ्राणनेत्रेषु सर्वतः।
हिरण्यायां न्यसेद्धीमानंतर्यामिणमास्मरन्।
वह्नेरंगमनून्यस्ये त्तनावुक्तेनवर्त्मना।
सहस्रार्चिस्स्वस्तिपूर्ण उत्तिष्ठपुरुषः पुनः।
धूमव्यापी सप्तजिह्वो ह्यनुर्भृद्धुतभुक्रमात्।
हृदयादिषडङ्गेषु मूर्तिरष्टौन्यसेत्पुनः।
जातवेदस्सप्तजिह्वा हव्यवाहनसंज्ञकः।
अश्वोदरजसंज्ञोऽस्य पुनर्वैश्वानराह्वयः।

कौमारतेजास्स्याद्विश्वमुखो देवमुखस्तथा।80

ताराग्नयोपदाद्यास्युर् नत्यंता वह्निमूर्तयः

मूर्धाक्षिपार्श्वकट्यंस भृकूटीपार्श्वकेषु च।

विष्ण्वात्मकंस्मरेद्वह्निं शंखचक्रगदाधरम्।

पद्महस्तं चतुर्बाहुं हेमाभरणभूषितम्।

**परिषिंचेत्ततस्तोयैर्विशुद्धैर् मेखलोपरि॥**

**दर्भैरगर्भैर्मध्यस्थ मेखलायांपरिस्तरेत्।**

**निक्षिपेद्दिक्षुपरिधीन् प्राचीवर्जं नरोत्तमाः।**

प्रादक्षिण्येन संपूज्यास्तेषु बृह्मादिमूर्तयः।

वैश्वानर जातवेदो लोहिताक्ष इहावह।

सर्वकार्याणि मे देहि स्वाहावह्निमनुस्स्मृतः।85

पूजयेद्गंधपुष्पाद्यैः यज्ञकाष्ठैःप्रदीपयेत्।

प्रदीप्तेऽग्नौप्रकर्तव्यं सृक्स्रुवादि विशोधनम्।

पाणिभ्यां सृक्सृवौधृत्वा कृत्वा तावप्यधोमुखौ।

त्रिशःप्रतापयेदग्नौ दर्भानादाय मन्त्रवित्।

तदग्रमध्यमूलानि शोधयेत्तैर्यथाक्रमात्।

गृहीत्वा वामहस्तेन प्रोक्षयेद्दक्षिणे न तु।

पुनःप्रतप्यतौ मन्त्री दर्भानग्नौ विनिक्षिपेत्।

आत्मनोदक्षिणेभागे स्थापयेत्तौकुशास्तरे।

आज्यस्थालीमथादाय प्रोक्षयेदस्त्रवारिणा।

तस्यामाज्यं विनिक्षिप्य क्षिपेत्तत्पूतयेकुशौ।90

पवित्रीकरणंह्येतत् कुशौसंदीप्यवर्मणा।

नीराज्याज्यंक्षिपेदग्ना वभिद्योतनमीरितम्।

कुशान्प्रज्वाल्यचास्त्रेण घृताक्तान्जातवेदसि।

न्यसेदुद्योतनंप्रोक्त मथोत्पावनमाचरेत्।

गृहीत्वाघृतमंगारान् प्रत्यूह्याग्नौ जलंस्पृशेत्।

अंगुष्ठोपकनिष्ठाभ्यां दर्भैप्रादेशसंमितौ।

धृत्वोत्पुनीयादस्त्रेण घृतमुत्पवनंत्विदम्।

तद्वद्धृदयमन्त्रेण कुशाभ्यामात्म संमुखम्।

घृतेसंप्लवनंह्येते सम्स्काराष्षडुदीरिताः।

प्रादेशमात्रं सग्रन्धि दर्भयुग्मंघृतान्तरे।95

निक्षिप्यभागौ द्वौकृत्वा पक्षौशुक्लेतरौ स्मरेत्।

वामेनाडीमिडां भागे दक्षिणे पिङ्गलांपुनः।

सुषुम्णांमध्यतो ध्यात्वा कुर्याद्धोमं यथाविधि।

स्रुवेण दक्षिणाद्भागा दादायाज्यं हृदामुदा।

जुहुयादग्नयेस्वाहेत्यग्नेर् दक्षिणलोचने।

वामतस्तद्वदादाय वामे वह्निविलोचने।

जुहुयादथसोमाय स्वाहेति हृदयाणुना।

मध्यादाज्यं समादाय मध्येफालविलोचने।

जुहुयादग्नीषोमाभ्यांस्वाहेति हृदयाणुना।

हृन्मन्त्रेण स्रुवेणाज्यं भागादादायदक्षिणात्।100

जुहुयादग्नयेस्विष्टकृतेस्वाहेति तन्मुखे।

इत्यग्निनेत्र वक्त्राणां कृत्वाचोत्पाटनं बुधाः।

सताराभिर्व्याहृतीभि राज्येन जुहुयात्पुनः।

अष्टाभिराज्याहुतिभिःप्रणवेन पुनः पुनः ।

गर्भादानंपुंसवनं सीमन्तोन्नयनं पुनः ।

अनंतरं जातकर्मस्यान्नामकरणं तथा।

उपनिष्क्रमणंपश्चादन्नप्राशनमेव च।

चौलोपनयने भूयो वेदाद्ययनमेव च।

गोदानं च विवाहश्च संस्काराशुभकर्मणि।

ततश्च पितरौ तस्य संपूज्यात्मनि योजयेत्।105

समिधःपंचजुहुयान्मूलाग्र घृतसंप्लुताः।

तदा हृदयमन्त्रेण विधिवत्स्वाहा या विना।

महागणेशमन्त्रेण विष्वक्सेनस्यपार्षदम्।

गजाननंप्रजुहुयात् संयगेकादशाहुतीः।

सामान्यंसर्वमन्त्राणा मेतदग्निमुखंमतम्।

ततः प्रज्वलितेवह्नौ पीठमभ्यर्च्य वैष्णवम्।

पूजयेत्परमात्मानं साङ्गंसावरणायुधम्।

पंचविंशतिसंख्याक माज्येनाष्टमुखेहुनेत्।

मूलेन वक्रीकरणमिदमुक्तं निबोधत।

वह्निदैवतयोरैक्यमात्मना सह भावयेत्।110

बृह्मार्पणंबृह्महविर्बृह्माग्नौ बृह्मणाहुतम्।

मूलमन्त्रेणजुहुया दाज्येनैकादशाहुतम्।

नाडीसंधानमुद्धिष्टमेतदागम शासने।

श्रीमद्वैकुण्ठलोकं तु प्रकृतेःपरमुत्तमम्।

विरजांनगरंविष्णोर्विमुक्तिमणिमण्डपम्।

स्मृत्वाज्येन हुनेन्मन्त्रैरेकैकामाहुतीं पुनः।

ततो वै चरुणा होमंकुर्याद्वै मूलविद्यया।

पौरुषेणतुसूक्तेन श्रीसूक्तेन च वै पुनः।

अन्यैर्वा वैष्णवैस्सूक्तैः तिलाज्यमधुरैरपि।

पायसेनापिपुण्येन नानाद्रव्यैर्यजेद्धरिम्।115

वस्त्रैराभरणैस्स्त्रग्भिः फलैर्नानाविधैरपि।

शतं सहस्रमयुतं लक्षं कोटिं विधानतः।

वैष्णवैर्द्विजमुख्यैस्तु जुहुयाद्विभवे सति।

वैकुण्ठपार्षदान्नित्यान् मुक्तान् विष्णुप्रियानथ।

नाममन्त्रैः प्रजुहुयात्प्रत्यहं मुख्यपर्वसु।

द्वादश्यामिष्टकाले तु संक्रान्तौ श्राद्धवासरे।

अन्येषु च विवाहादि व्रतबंधेषु सद्मनि।

वापीकूपतटाकादौ प्रपाऽऽराम प्ररोपणे।

नवाब्धे जन्मदिवसे विष्णुयागं समाचरेत्।

दीक्षायांचोत्सवेप्राप्ते शयन्यांबोधवासरे। 120

परिवर्त उपाकर्म गोदाने दानकर्मणि।

यात्रादौग्रहणेचैव प्रायश्चित्ते विशेषतः।

प्रतिष्ठायांहरेर्डोलारोहणे विजयोत्सवे।

कार्तिकेमार्गशीर्षे च मकरेमेषभास्करे।

मलिंलुचेसिनीवाल्यां युगमन्वादिवासरे।

रथयात्रादमनक पवित्रारोपणेषु च।

अवतारजयंतीषु वैष्णवानां समागमे।

एवं होमंविधायाथ वैष्णववैष्णवोत्तमः।

नैमित्तिकं ततःकुर्यादाग्ज्ञेयं परमात्मनः।

ततस्विष्टकृतंहुत्वा घृतेन मुनिसत्तमाः।125

जलेनविधिनासंयक् परिषिच्यसमंततः।

ततःपूर्णाहुतिं दद्याद्वैष्णवैर्ब्राह्मणैस्सह।

ओं भूरन्नमग्नये पृथिव्यै महते स्वाहाया ततः।

भुवो वायवेचांतरिक्षाय महतेस्वाहाया ततः।

स्वश्चंद्रमसेदिग्भ्यश्च नक्षत्रेभ्यश्च स्वाहाया ततः।

ओंभूर्भुवस्वश्चंद्रमसे नक्षत्रेभ्यश्च महते स्वाहा।

इति हुत्वा स्रुक् स्रुवौ च घृतेनापूर्यते पुनः।

होमद्रव्याणि निक्षिप्य नाभौ संस्थाप्य वैष्णवः।

ब्रह्मार्पणेन मनुना दद्यात्पूर्णाहुतिं पुनः।

इति सर्वप्राणबुद्धिदेहधर्माधिकारतः।130

जाग्रत्स्वप्नसुषुप्त्यवस्था सुमनसावाच कर्मणा।

*हस्ताभ्यसंपद्भ्यामुदरेण शिश्न्या यत्कृतं -

यत्स्मृतं यदुक्तं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा।*

इति पूर्णाहुतिंदत्वा ध्यात्वासाङ्गं हरिं पुनः।

गृहीत्वात्र्यायुषंप्रोक्ष्य प्रोक्षणीयजलेन च।

आत्मानं कुसुमंदत्वा साङ्गंदेवं विसर्जयेत्।

नारायणात्मके क्षेत्रपाले बलिमथाचरेत्।

ब्र्ह्मात्मकतयेंद्रादीन् मुन्यन्येन बलिंनयेत्।

नित्यनैमित्तिकोहोमो मयावस्वमुदाहृतः।

अन्वादानादिकंकर्म यत्कुर्यान्नित्यहोमके।

ततो गुरुंभागवतान् पूजयेत्परयामुदा।135

अनर्चितेगुरौसर्वं निष्फलं भवति क्षणात्।

गुरुरेवहरिस्साक्षाद् विष्णुरेव न संशयः।

कर्तृत्वफलसंयोगं हित्वायागं समाचरेत्।

वैष्णवस्स्वात्मलाभाय न लाभोऽन्योमनागपि।

इति श्रीबृहद्बृह्मे चतुर्थे **वह्नियाग विधिःनाम** त्रितीयोऽध्यायः।

श्रीबृहद्बृह्मे चतुर्थे चतुर्थोऽध्यायः

## श्राद्धविधानम्

मुनय ऊचुः-

पितृयागःकथंप्रोक्तो वैष्णवानां पितामह

किंरूप काश्चपितरःकिंफलं वदविस्तरात्।

प्रवृत्तिनिरतानां च यासमाराधनक्रिया।

एकरूपाऽथवाभिन्ना फलभेदोऽस्तिवा न वा।

श्रीबृह्मोवाच-

मुनयस्साधुपृष्टोस्मि लोकनां हितकाम्यया।

पितरो हि हरिस्साक्षाच्चतुर्व्यूहात्मकस्तथु यः।

पुरा नारायणंद्रष्टुं नारदो गंधमादनम्।

भगवत्प्रेमसंपन्नो दैवे पित्र्ये  च कर्मणि।

स्थितं ददर्श देवेशं नरेणसहितं विभुम्।

तदाश्चर्यमना विप्रः कर्मांते वाक्यमब्रवीत्।5

देवदेवेशविश्वेश परमात्मन् परात्पर।

करोषि किमिदंकर्म दैवे पित्र्येच केशव।

श्रीनारायण उवाच-

पितरस्सर्वभूताना मस्माकं च मुनेस्स्वयम्।

भगवान् वासुदेवो हि मूलप्रकृतिरुच्यते।

प्रकृतिर्यो हि भूतानां येनसर्वमिदं ततम्।

स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः।

पिताहमस्य जगतो माता दाता पितामहः।

वेद्यं पवित्रमोंकार ऋक्सामायजुरेवच।

गतिर्भर्ता प्रभुस्साक्षी निवासश्शरणं सुहृत्।

इति मामवदत्पूर्वं भगवान् भूतभावनः।10

दैवे पैत्र्येच भगवान् संपूज्यः परमिच्छताम्।

चतुर्विद्ये नमोदेवस्सर्गादीन् प्रकरोति हि।

वेदस्यकारणं बृह्मन्! सन्मात्रमभिधीयते।

तस्मिन्नाधारभूता हि सन्नामकमभूज्जगत्।

सूक्ष्ममग्ज्ञेयमग्राह्य मनौपम्यमिदं मुने।

दंडाहतोरगीवासीर्निष्क्रियं नामवर्जितम्।

अधिष्टानादभेदेन भाति द्रव्यगुणो यथा।

सिसृक्षयासृजत्तद्वै स्वाश्रितं नामरूपयेत्।

निमित्तभूतं यत्तत्त्र नमस्वेति तदेव तत्।

आत्मा भवति सर्वेषां तत्तन्नामेतिकीर्तितम्।15

कारणेस्वाश्रितंकार्यं सदेवमभिधीयते।

कार्ये तदेव तन्नाम तद्रूपगुणभाग्भवेत्।

ततस्सूक्ष्ममविज्ञेय मव्यक्तममलं ध्रुवम्।

इंद्रियैरिंद्रियार्थैश्च सर्वभूतैश्च वर्जितम्।

सह्यंतरात्मभूतानां क्षेत्रज्ञश्चेति कथ्यते।

क्षेत्रंशरीरमित्यहु स्तक्षेत्रं द्विविधं स्मृतम्।

चिदचिच्छब्दनिर्धिष्टं तयारालंबनंच सः।

चिदोऽभवच्छरीरं् हि यदचिच्छेषसंज्ञितम्।

क्षेत्रज्ञो यस्सचित्प्रत्यगात्मांशो यःप्रकीर्तितः।

परात्मनोह्ययंतावत् क्षेत्रभूतोमतो मम।20

क्षेत्रज्ञोप्ययमेवोक्त स्तस्यक्षेत्रद्वयं यतः।

त्रिगुणाद्व्यतिरिक्तो वै पुरुषश्चेतिकल्पितः।

तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम।

अव्यक्तव्यक्तभावस्ता या सा प्रकृतिरव्यया।

तां योनिमावयोर्विद्धि योऽसौ सदसदात्मकः।

आवाभ्यां पूज्यतेऽसौ हि दैवे पित्र्येच कर्मणि।

नास्तितस्मात्परोऽन्यो हि पितामाताऽथवा द्विज।

आत्मा हि नौ स विज्ञेयस्ततस्तम् पूजयावहौ।

पिता पितामहश्चाथ प्रपितामह एव च।

एतेषामंतरंगो हि विश्वात्मा पुरुषोत्तमः।25

तदभेदेन यष्टव्यसर्वेषां मुनिसत्तम।

सामानाधिकरण्येन पित्राधिकृतनामकः।

तदंतर्यामियजनं वैष्णवानां निरूपितम्।

मुमुक्षूणां च सर्वेषां विष्णोराज्ञानुसारतः।

तेनैषाप्रथिताबृह्मन्! मर्यादालोकभाविनी।

दैवंपित्र्यं च कर्तव्यं इति तस्यानुशासनम्।

बृह्मस्थाणुमरुद्दक्षो भृगुर्धर्मस्तथा यमः।

मरीचिरंगिरोऽत्रीच पुलस्त्यःपुलहःक्रतुः।

वसिष्ठःपरमेष्ठीच विवस्वान् सोम एव च।

कर्दमश्चापि यः प्रोक्तः क्रोधोविक्रीत एव च।30

एकविंशतिरुत्पन्नाः ते प्रजापतयस्स्मृताः

तस्य देवस्य मर्यादां पूजयंतस्सनातनीम्।

चिदचित्परमात्मेति तत्त्वत्रय विचिंतनात्।

दैवं पित्र्यंचकुर्वंति ज्ञानपूर्वं निरंतरम्।

ते कर्मबंधनिर्मुक्ता ज्ञानाकारनिषेवणात्।

ज्ञानैकाकारमात्मानं प्राप्नुवंति न संशयः।

ये तु ज्ञानमृते दैवंपित्र्यं कर्मह्युपासनात्।

ते भिन्नफलभोक्तारस्संसारं प्रविशंति हि।

अंतर्याम्यनुसंधानं फलसंग निवर्तनम्।

आत्मनश्चाय कर्तृत्वं ज्ञानमेतद्धि कर्मणि।35

सर्वत्रयजनंविष्णो रंतर्यामितयामुने।

वैष्णवानांगृहस्थानां धर्मोऽयं पारमार्थिकः।

दैवं पित्र्यं च सततं तस्यविज्ञाय तत्त्वतः।

आत्मप्राप्याणि च ततः प्राप्नुवंतिद्विजोत्तमाः।

स्वर्गस्था अपि ये केचित् तं नमस्यंतिदेहिनः।

ते तत्प्रसादाद्गच्छंति तेनादिष्ठफलांगतिम्।

ज्ञानिनां तु फलंवेकं निर्धिष्टं दैवपित्र्योः।

अज्ञानां तु फलं नाना निष्फलंखलुचैव तत्।

ज्ञानिनःकर्मकर्तारः कर्मायत्प्रतिबंधकम्।

निवर्त्यस्वात्मनंप्राप्तौ मुक्ता एव भवंति हि।40

येहिनस्साप्तदशभिर्गुणैः कर्मभिरेव च।

कलापंचदशत्युक्ता स्तेमुक्ता इति निश्चयः।

मुक्तानां तुगतिर्ब्रह्मन्! क्षेत्रज्ञ इति निश्चिता।

स हि सर्वगुणैश्चैव निर्गुणाश्चैव कथ्यते।

प्रकृतेर्गुणसंयोगात् त्रिगुणःपुरुषोत्तमः।

नित्यात्मगुणसंपन्नस्सच सर्वगुणो मतः।

अव्यक्तोपि ह्यदृश्योपि दुर्गमापि महामते।

ज्ञानेनकर्ममिश्रेण दुष्टकर्मव्यपोह्य च।

व्यक्तिमायाति विप्रर्षे भगवान् सात्वतांपतिः।

परमैकांतिनांगम्यो नात्रकार्यविचारणा।45

दृश्यते ज्ञानयोगेन ह्यावां च प्रसृतौ ततः।

एवं ज्ञात्वा तमात्मानं पूजयावस्सनातनम्।

तं वेदाश्चाश्रमाश्चैव नानामतसमाश्रिताः।

भक्त्यासंपूजयंत्याशु गंतिचैव ददाति सः।

ए तु तद्भावितालोके ह्येकांतित्वं समास्थिताः।

ए तदभ्यधिकं तेषां यत्ते तं प्रविशंत्यत।

दैवं च पित्र्यं  च कर्तव्यं तदाज्ञापालनाय हि।

प्रीतःप्रयच्छति क्षिप्रं धर्ममेकांतिनां हरिः।

इति नारायणेनोक्तं नारदाय विपृच्छते।

द्वयोरेकफलं विप्रा द्वयोरेकं च दैवतं।50

दैवेसाक्षाद्धरिःपूज्यश्शंखचक्रगदाधरः।

अंतर्यामिधियापैत्रे पूज्यः पित्रादिरूपतः।

वैष्णवानांविशेषोऽयं पित्र्ये कर्मणिवर्तते।

तदहं संप्रवक्ष्यामि संक्षेपान्मुनिसत्तमाः।

विष्णुशेषेणयष्टव्याः पितरो द्वादशीदिने।

अन्यथा निरयंयांति पितरोयेऽस्यजन्मदाः।

वैष्णवानां विशेषोऽयं दैवेपित्र्येच कर्मणि।

पशुघातो न कर्तव्यो मुन्यन्नेनपरागतिः।

न श्राधेह्यमिषांदेयं पितृणां च कदाचन।

न चामिषाशिनःपित्र्ये यष्टव्याश्राद्धकर्मणि।55

वैष्णवस्सततं पूज्या वैष्णवाब्राह्मणाद्विजाः।

नच मांसाशिनश्शैवाः शाक्ताश्चापि ह्यवैदिकाः।

लिंगिनोऽशुचयक्षुद्रा भूतभैरवचिंतकाः।

नानादेवैकनिरताः प्रयोगादिविधायिनः।

देवान्नसेविनो मंत्रपीठ विक्रयणश्चये।

प्रेतान्नभोजनोविप्रा न पूज्याश्श्राद्धकर्मणि।

अनूर्ध्वपुण्ड्रिणश्शंखचक्रलांछन वर्जिताः।

एकादश्यन्नभोक्तारो गुरुधर्म विनिंदकाः।

अमेध्यस्पर्शनिरतास्त्यक्त विष्णूत्सवाश्च ये।

अगीतापाठनो विष्णौ सामान्यमतयोद्विजाः।60

अमन्त्रतिलकावामा नित्यकर्मविवर्जिताः।

अनुक्तकारिणोऽनुक्तभोजिनोऽनुक्तसेवकाः।

दैवे पित्र्येनवैभिज्या जटाभस्मादिधारिणः।

मध्यपानरतानां च पातकौषधसेविनाम्।

रसविक्रयाणांसंगं दूरतःपरिवर्जयेत्।

अज्ञातगोत्रप्रवरा विप्रा ये कूटसाक्षिणः।

श्राद्धादौ नैवसंभाष्या विप्राश्चांत्यज वृत्तयः।

श्राद्धकालस्तु संप्रोक्तो विष्णुना प्रभविष्णुना।

वैष्णवेन प्रकर्तव्यं श्राद्धं सच्छ्रद्धया द्विजाः।

नारदाय मयाप्रोक्तो धर्मोऽयं मुनिसत्तमाः।65

मदुकेशकितमना निर्दारायगतो हरिम्।

नारदेन पुरापृष्टो भगवान् मधुसूदनः।

प्रपन्नस्त्वं हरे देव कथं देवांतरं यजेत्।

श्री भगवानुवच-

नचदेवांतरधिया वैष्णवैरर्च्यते परः।

कर्मत्यागेन मे विप्र! शासनंकुत्रविद्यते।

कर्मणामनसावाचा यत्नात्कार्यं सदैव हि।

सत्रृणैरनृणैर्वापि यावद्देहक्षयं द्विज।

विविक्तंधर्ममेतावत् सिद्धानामपि देहिनाम्।

संसेव्यमाज्ञयामे तु नात्रकार्यविचारणा।

असिद्धेनतु कर्तव्यं ज्ञानपूर्वं द्विजोत्तम।70

आत्मसिद्ध्यर्थमप्येष सिद्धोऽयंलोकसंग्रहात्।

नाचरेद्योपिवैसिद्धो लौकिकंधर्ममग्रतः।

उपप्लवं स कुरुते धर्मस्य मम नारद

त्यागाद्धर्मस्यलोकस्य ग्लानिर्भवति सर्वतः।

तद्दर्धमहमेवापि न त्यजामि सनातनम्।

विवेकज्ञैरयंतस्माल्लोकाचारपथास्थितः।

आदेहपाताद्यत्नेन रक्षणीयःप्रयत्नतः।

आचाराणां हि सर्वेषां धर्माणां मुनिसत्तम!।

श्राद्धंमेरोचते यादृक् तादृग्ज्ञैर्वा परं तुवै।

तस्यकालं विधानं च यथावदवधारय।75

सिताऽसितेचद्वादश्या वमावास्याच पूर्णिमा।

राहुसंदर्शनंचैव सूर्यसंक्रमणं तथा।

श्राद्धं तत्रप्रयत्नेन काम्यं कुर्याच्च भक्तितः।

नवान्नप्राशनेचैव तीर्थेवाऽऽयतने हरेः।

पात्रेक्षेत्रेप्यसंसिद्ध प्रतिष्ठायांपवित्रके।

वापीकूपतटाकानां वृक्षाणांपरिरक्षणे।

गोदानादौ धनत्यागे व्रतारंभे तदंतः।

शास्त्रश्रवणनिष्पत्तावारंभे च तथैव हि।

वत्सरेवत्सरे विप्र मित्राप्तानां कुटुंबिनाम्।

युगादिषुचमन्वादौ श्राद्धंकुर्याद्विचक्षणः।80

पूजयित्वा पुरादेवं तर्पयित्वा हुताशनम्।

पूर्वोक्तेन विधानेन ततस्त्वाहूयवैष्णवान्।

प्रक्षाळितांघ्रीन् स्वाचांतान् प्रोक्षितेनास्त्रवारिणा।

रात्रौस्त्रीसंगरहितान् विष्णुसूक्तप्रपाठकान्।

पवित्रहस्तान् संशुद्धान् परनिंदाविवर्जितान्।

संमुखान्मन्त्रनाथस्य चोत्तराभिमुखानपि।

आसनेषुविविक्तेषु परिच्छिन्नेषु नारद।

गायत्र्याभस्मरेखासु शंकुनास्त्रान्वितेन वा।

हृदस्त्र परिजप्ताना मासनानामथोर्ध्वतः।

प्रतिष्ठाप्यासनेपूर्वे त्वेकमादौतु वैष्णवम्।85

हृद्युक्तेनाथ तेनैव स्वधासंपूजितेन च।

पितुःपंक्त्यावसाने तु नाम्नाऽन्यमुपावेशयेत्।

शिरसासंयुतेनाथ गृहीत्वापाणिना द्विज।

नाम्नापितामहीयेन प्रतिष्ठाप्यासने परम्।

नेत्रस्वधावसानेन त्वक्षरेण स्वमूर्तिना।

प्रपितामह नाम्नातु वैष्ण्वंचापरं न्यसेत्।

चत्वार एव वै पूर्वं मन्त्रपीठस्यसंमुखाः।

लक्ष्मीमन्त्रचतुष्केण मातुस्वस्यकुलस्यवा।

अस्त्रेणपितृवर्गस्य तूत्तराभिमुखंद्वयम्।

प्राङ्मुखौदैविकौविप्रौ विप्रास्त्रय उदङ्मुखाः।90

एकिकोभयत्रस्या दसंपत्तावितिक्रमः।

पात्रं वा  दैविकंकृत्वा विप्रएकस्तुपैतृके।

इति वा निर्वपेच्छ्राद्धे निर्धनश्चान्यदाचरेत्।

संपत्तावपिपात्राणा मेकैकस्यत्रयस्त्रयः।

पित्रादेःवैष्णवःप्रोक्ताः चत्वारोवैश्वदेविकाः।

द्वौवापि दैविकेप्रोक्ता वेकैकोवा न दोषभाक्।

स्यान्मातामहिकेप्येव मेकोवैश्वदेविके।

मातामहे तु कर्तव्यं षड् दैवत्यमथापि वा।

पार्वणद्वयकंवास्यान्मुनीनांमतभेदतः।

आसनादिप्रदानेन स्थापितान् वैष्णवान् द्विजान्।95

द्वादशार्णेनमन्त्रेण पूजयेद्विधिना कमात्।

मन्त्रन्यासश्चसर्वेषां कर्तव्योद्वादशाक्षरैः।

ऋग्भिःपुरुषसूक्तस्य मन्त्रराजस्यचाक्षरैः।

सर्वेचतुर्भुजाज्ञेया श्शंखचक्रगदाधराः।

किरीटकौस्तुभधरा वैनतेयासमार्जिताः।

प्रोद्यता इव चोर्ध्वंतु पितृभूतस्य नारद!।

ततो हृदयमन्त्रेण चार्घ्यपात्रोदकेन तु।

सिंचेत्क्रमेणांघ्रियुगमेकैकस्मिन् महामते।

मूलमन्त्रेण तदनु पाणिभ्यां तु तिलोदकम्।

वैष्णवानां च पितरो नवैनरकवासिनः।100

नयांयातनायांयांति न वैवस्वतसद्मनि।

पितृलोकेन ते संति परमैकांतिनो हि ते।

साक्षाद्वैकुण्ठनाथस्य द्वारदेशाऽवलंबिनः।

प्रद्युम्नसंकर्षणकवासुदेव स्वरूपकाः।

पितापितामहश्चैव तथैव प्रपितामहः।

अस्मिन्ममाध्वरेयूयं विष्णुशेषं निवेदये।

गंधपुष्पादिकंसर्वं स्वीकुरुध्वं स्वधा हि वः।

इदमर्घ्यादिकंदिव्यं तुळसीदळमिश्रितम्।

निर्णेजनंभगवतः पादयोःप्रतिगृह्यताम्।

धूपशेषंभगवतः तथा दीपो नमोस्तु वः।105

अर्घ्यंदत्वा पुनःपात्रे समाहृत्यास्त्रमन्त्रतः।।

पूजयेद्गंधपुष्पाद्यैः पवित्रारोपणोत्तरम्।

पवित्रं तु कुशैःकार्यं तुलसीपल्लवैश्च वा।

संस्थाप्याग्रे भगवतः संपूज्यार्घ्यादिभिर्द्विजान्।

तेषु तांश्चिंतयेत्प्राज्ञः पितृन्मातामहानपि।

विश्वेदेवांस्तथाध्यात्वा विष्णोःपारिषदोत्तमान्।

आदायशिरसातेषा माज्ञां वै श्राद्धकर्मणि।

आगता हि महाभाग स्स्वागतं कृपया मयि।

यावच्छ्राद्धंप्रवर्तेत तावत्सन्निहितानन्नु।

निमंत्रितान् द्विजान् प्रार्थ्य संस्थितानर्पितासने। 110

प्रार्थयेद्भगवंतं तु पितृणांयागकर्मणि।

भगवन् पितृयागार्थं प्रार्थये त्वं विशेषतः।

तेषामनुग्रहार्थं च  यागमाहर मेऽच्युत।

एवं संप्रार्थ्य देवेशं कर्मपात्रं निधाय च।

संसादयेच्चरुंधीमान् क्षीरेणसुरभेस्स्वयम्।

प्रोक्षयेदस्त्रमन्त्रेण भक्तं सुव्यंजनान्वितम्।

सर्वंसंसादितंकिंचिद्भक्ष्यपानादि भोजनम्।

चेतसा कल्पयेत्सर्वं  पितृणां तृप्तयेतु तत्।

यथा निवेशिताःपूर्वं मण्डलेह्यथ नारद।

अस्त्रेणप्रणवेनैव  पात्राणिक्षालयेत् क्रमात्। 115

पितृपात्राणिदैवाणि स्वेस्वेस्थाने निवेशयेत्।

प्रजपेयुर्द्विजास्तावद्वैष्णवा स्वासनेषु च।

परिवेषणंतु यावत्स्यात् सूक्तानिहरितुष्टये।

दधिक्षीरान्नपानं च क्रमादन्येप्सितं च यत्।

तुळसीदळसंमिश्रं पात्रेषुपरिवेषयेत्।

अर्घ्यैःपुष्पैस्तथाधूपैः लेपनंजनदीपकैः।

संपूज्यपरयाभक्त्या पुनःपृच्छां समाचरेत्।

तृप्तास्मोवादिनोयावत् प्रब्रूयुर्वैष्णवाद्विजाः।

स्वल्पंस्वल्पंप्रदातव्यं मुन्यन्नं विष्णुदर्शितम्।

भुंजानंतदशेषेण स्मरेन्नारायणं हरिम्।120

हविष्यन्नंघृतोपेतं क्वथितावटकादिकम्।

तद्वीर्यमूष्मणासार्ध मस्मिन्परिणतं स्मरेत्।

तेन संभावयेत्तृप्ति मतीवमुनिसत्तम।

सर्वेषामन्नवीर्यं चाप्येवं परिणतंस्मरेत्।

प्रणवेनाऽमृतेनैव ततो नारायणात्मने।

तदंते तु नमःकुर्या न्मन्त्रोऽयं पितृतर्पणे।

दीक्षितानेवसच्छ्राद्धे पितृनुद्दिश्यतर्पयेत्।

दक्षिणांमुखवासं च दत्वा विप्रन् विसर्जयेत्।

अथासनेषुपविष्ठा नन्यानन्नं प्रदापयेत्।

सगोत्रिर्बंधुभिस्साकं स्वयंभुंजीतवाग्जितः।125

एवंश्राद्धपरोविप्रो महाभागवतो मतः।

सदैवंदीक्षितानां च यागमन्त्रेण वैष्णवः।

सर्वान् संपाद्य यत्नेन यथालब्धेन केनचित्।

वस्तुनापिपवित्रेणचेदंश्राद्धं समापयेत्।

कदन्नेनकुदेशेचाप्यापन्नेनापि नारद!।

ज्ञानविज्ञानमन्त्राद्यै संपाद्यंविद्धि शाश्वतम्।

देशेकालेतथापात्रे श्रद्धापूतं तु किं पुनः।

वैष्णवैःपरमंप्रात्रं देश आयतनं हरेः।

द्वादशीसर्वकालानामुत्तमा परिकीर्तिताः।

नैमित्तिकेषु यो भेद श्राद्धेप्रोक्तो मयाद्विज।130

जयशास्त्रज्ञयासर्व मवधार्यं विपश्चिता।

पुत्रो मे नारदो विप्रा श्र्त्वाभगवतोदितम्।

निस्संदेहोऽभवत्पूर्वं श्राद्धंविष्ण्वेक दैवतम्।

ब्राह्मणानांभोजनं च पिण्डानामर्चनं तथा।

केपीच्छंति महाभाग! शाखाभेदाद् द्विजन्मनाम्।

श्रौतेनविधिनावापि वैष्णवानां समर्चनम्।

तैस्तैर्मन्त्रैःप्रकर्तव्यमंतर्यामिधिया तथा।

पितृईन् प्रद्युम्नादिधिया दनिरुद्धस्त्वयं यजेत्।

वैष्णवानांगृहस्थानां कर्तव्यं दैवकर्मवत्।

इदं तु वैष्णवंश्राद्धं मुन्यन्नेनैव वर्तयेत्135।

नामिषं नमधुप्रोक्तं खड्गपात्रं सचैव हि।

नैकादश्यां प्रकर्तव्यं न तिर्यक्पुण्ड्रधारणम्।

नानिवेद्यप्रदातव्यम् नादैवं कुत्रचिन्मतम्।

काकपिण्डं न दातव्यं वैष्णवानांकुलेयतः

नागतिर्जायते विप्रा मृतानां पापिनामपि।

नृत्यंतिपितरस्तेषां प्रनृत्यंति पितामहाः।

वैष्णवो नःकुलेजातः किंकरिष्यति नो यमः।

शोचंतिपितरोऽन्येषां यज्वानस्स्वर्गता अपि।

नास्माकंवैष्णवोजातो यो ननयेत् गवत्पदम्।

अस्माभिरार्जितेपुण्ये क्षयंयाते च कःपुनः।140

वारयिष्यति नःपाताद्विना श्रीवैष्णवान् सुतान्।

आर्जितंसुकृतंलोके यज्ञदानदयादिभिः।

नार्जितंवैष्णवंकर्म नार्जितोवैष्णवस्सुतः।

दैवंपित्र्यंमानुषं च तस्यतावदिहस्थिरम्।

यावत्सर्वात्मना विष्णुं शरणंनैतिमानवः।

तस्मादनन्यशरणाः पुरुषोत्तमस्य

लीलागृहीत वपुषो भवताच्युतस्य।

सर्वस्तदैवभवतां सफलो मुनीशा

स्स्वाध्याय योगज पदानक्रियाकलापः।

इति बृहद्ब्रह्मे चतुर्थे **पितृश्राद्धविधानं** नाम चतुर्थोऽध्यायः।

श्रीः

# बृहद्ब्रह्मे-चतुर्थे-पंचमोऽध्यायः

## एकादशीमाहात्मियम्।

### श्रीब्रह्मोवाच-

एकादश्याश्चमाहात्म्यं प्राक्पृष्टं शृणुतामलाः।
वैष्णवानांपरंनास्ति व्रतं लोकेषुमुक्तिदम्।
अनादिवासनाबद्धो जीवोऽयं परिमुह्यति।
विषयानटमार्गेषु नैतिशांतिंमनागपि।
परहिंसारतालोभमोहानृत भयाकुलाः।
संसरंतिभवांबोधौ जनादुःखौघबागिनः।
तान् विलोक्य महादेवीलक्ष्मीर्जलजलोचना।
पप्रच्छशेषपर्यंके निरूपितपदांबुजम्।
भगवन्! भवितासुप्तो मायायांप्रीतिचोदितः।
जीवो वै नाभिजानाति तमसाव्याप्तलोचनः।५
भोधितं नाचरेत्कर्ममुक्त ये यदिकश्चन।
मित्रस्य नैवदोषोऽस्ति दोषोऽस्यैवास्ति केवलम्।
कंटकेषुकुमार्गेण गच्छंतं न निवारयेत्।
दोषस्सहचरस्यैव प्रतिबुद्धस्य केशव।

त्वंसखा सर्वजीवानांमाश्रयः प्रतिबोधकः।

त्वद्भासाभासतेसर्वं जगत्स्थावरजंघमम्।

त्वंभाश्चक्षुर्हि जीवानां त्वंगतिस्त्वं परायणम्।

अतस्त्वमेवजीवस्य निस्तारोपायमावह।

केन जीवस्यनिर्मोक्षो वासनाजालपंजरात्।

कोजपः किंव्रतः कांत! किंतपःकश्चसंश्रयः।10

बद्धस्यपंजरान्मुक्ति स्सुलभावैकदेशतः।

बाह्यंतरनिबद्धस्य दुस्त्यजंतवबंधनम्।

चक्षुषास्थूलरूपेण रज्ज्वारूपस्वरूपया।

निबद्धोवासनारूप तंतुभिर्बहुभिस्सितः।

श्रोत्रनासास्यत्वङ्मेड्रनिबद्धश्रवणादिभिः।

तद्वृत्तितंतुजालैश्च कथं मुक्तो भवेदिह।

श्रीनारायण उवाच-

जप्यस्त्वष्टाक्षरो देवी व्रतंत्वेकदशीव्रतम्।

तपस्संतोष आख्यातं संश्रयोभगवत्प्रिया।

एकादश्यश्च सर्वेषामाश्रयः कमलालयः।

त्रिभिर्निष्पद्यतेकांते चतुर्थंव्रतमुत्तमम्।१५

आद्याजन्मकृतंदेवी जपादीनां चतुष्टयम्।

एकादश्यांकृतंकांते! सर्वं तत्समतामियात्।

त्रिरात्रं तु व्रतंह्येतल्लोकानां पावनाय मे।

निहितंस्वकरेदेवी सर्वबंधननाशनम्।

पृथिव्यादीनिभूतानि कालःक्षणलवादिकः।

इंद्रियाणिच देवाश्च मामेवमुपतस्थिरे।

सर्व ऊचुः-

भवतोत्पादितास्सर्वे निदेशमनुवर्तिनः।

किंकुर्मःकथयेशानः किमर्थोत्पादितावयम्।

श्री भगवानुवाच-

सर्वेषामहमधारो मयिसर्वमिदं जगत्।

प्रलीनंबीजरूपेण चेतनाचेतनात्मकम्।२०

उत्पादिता मयासर्वे यूयम् जिवस्यभुक्तये।

अशरीरोममांशोऽयं नायंभोक्तुमिहार्हति ।

भवद्भिस्साध्यतामेषां शरीरादि च सर्वशः।

एकीभूय महाभाग! भूतेंद्रियसुरैःखलु।

त ऊचुः-

भोक्तायद्यप्ययंजीवो यस्य वैस्यामचालयम्।

तथापि तत्प्रसंगेन तत्तत्भूताभिमानिनः।

मालिन्यमभियास्यामः कथंनो निष्कृतिर्भवेत्।

इति श्रुत्वा वचस्तेषामहमूचे वरानने।

श्रीनारायण उवाच-

इंद्रियाणांचादेवानां पातकानां प्रशांतये।

शरीराकारभूतानां शुद्धये निर्मिते मया।२५

एकादशीतिविख्याता तिथीनामुत्तमातिथिः।

तस्यास्संमानतोदेवास्सर्वेषांशुद्धिरुच्यते।२६

तीर्थस्नानेनयाशुद्धिर्याशुद्धिः प्राणसंयमात्।

भुतानाम् भुतशुद्ध्याच या शुद्धिः परिकीर्तिता।

एकादश्यातु सा शुद्धिर्भविष्यति न संशयः॥

विनान्नप्राशनात्तापो यो भविष्यति देहिनाम्।

तेन तापेन कायस्य शुद्धिर्देवार्चने मता।

देहस्थानांच भूतानाम् द्वयमप्यन्न सेवनात्।

देहस्य दारनम् चैव प्रमादालस्य मेवच।

प्रमादादिभिरानन्द मूर्तिसम्सेवनेन हि।३०

अन्नदोष इतिप्रोक्त तस्योपायोद्विधामतः।

परित्यागो द्वितीयस्तु विधिना तन्निशेवणम्।

सात्विकं वैष्णवैर्विष्णोरर्पितम् शुद्ध व्रित्तिजं।

ज्ञान प्रदम्च मनसः प्रसाद् जनसंस्मृतम्।

सर्वदातत्त्परित्यक्तुं नैवशक्यम् शरीरिना।

एकादश्याम् परित्यागः कर्तव्यो हितमिच्चता।

अनामाश्रत्यतिष्ठंति पातकानिमहन्त्यपि।

एकादश्याम् यतोविष्णोरंतरायकरंति तत्।

मन्त्राभ्यासोदिने पूजध्यानं जागरणम्निशि।

कर्तव्यम् कीर्तनंवाद्यं नर्तणम् हरिसन्निधौ।३५

मादंतलग्नस्यान्नस्य जिह्वस्पर्शो भवेदिति।

दंतधावनकं वर्ज्यमेकादश्यामतो भुधैः।

कीर्तनेन वचस्शुद्धिर्जायते वार्षिकीप्रिये।

बिंबस्य दर्शनात् विष्णोश्चाक्षुषीशुद्धिरीरिता।

श्रवाणाद्यशसोविष्णो श्रोत्राणां शुद्धिरीरिता।

नत्याचशिरसाशुद्धिस्त्वचसा साष्टाङ्ग वन्दनात्।

उत्तीर्णधूपपुष्पाद्यैर्नासाशुद्धिर् वरानने।

करयोर्मार्जनादिभ्यः प्रादक्षिन्यात्पदैरपि।

एकादश्याम् सकृत् कृत्वा सर्वेषां देहवासिनाम्।

आजीवनांतं या शुद्धिस्साशुद्धिर्जायते ध्रुवं।४०

रात्रौजागरणंकार्यं तत्र चाहूयवैष्णवान्।

महामायानिशान्तेन निस्तीर्ना जायतेकलौ।

न भेतव्यं न भेतव्यं पातकैःपक्षसंचितैः।

एकादशिनि सा तस्मिन् नायास्यति स वल्लभा।

नभेतव्यं नभेतव्यं पातकैर्वर्ष संचितैः।

एकादश्येतिविख्याता याऽतीव हरिवल्लभा।

भोदेवाःकरणस्ताहि माखिद्यंतु मनागपि।

भवद्भिस्साद्यतां देहस्साधितैकादशि मया।

करिष्यन्ति जनास्सर्वे पक्षयोरुभयोरपि।

तेनवस्स्वर्गतिस्तस्य देहस्थानां भविष्यति।४५

एकादशिव्रतस्तस्य एच संभन्दिनो मताः।

चेतनाचेतनास्सर्वे कृतार्था नात्र संशयः।

सूर्योदये भवद्भिस्तु स्वाम्शैरास्तीयतां तनुः।

नरैराचरिता पूजामदीयैकदशी दिने।

तेन यद्भवितास्थानमक्षयं तद्भविष्यति।

नाकृत्य दोषसंपर्को भविष्यतिमनागपि।

भवतामुपकारेणजीवोयं पापपंजरात्।

निर्गमिष्यति सुस्थानं कृत्वाचैकदशीव्रतं।

भवदर्थं कृताचैष तिथिरेकादशी मया।

जनैराचरितेदेवा गतिंदास्यतिनिश्चितं।५०

अतः कुरुद्वं संभूयसृष्टिं स्वांशैर्दिवौकसः।

इति श्रुत्वा वचोदेवी प्रहृष्टा सृष्टिकारिणः ।

शरीरं जनयामासस्तेदेवा विष्णुतेजसा॥

इति संसाधिता देवी मयासृष्टं वितन्वता।

अतस्सर्वैर्जनैस्सेव्यं सामान्यैस्तद्वदन्महत्।

मयादेवीवरोदत्तो देवानां हितमिच्छताम्।

भवतां पातकैस्तेषां गतिश्चाधोभविष्यति।

ये लब्ध्वामानुषंदेहं करिष्यंति नमद्दिनम्।

निद्रयासक्तमन्नाद्यैर्दिवार्चार्थै हयातथा।

तस्मादेकादशीचाष्टवर्षादारभ्य भामिनी ।५५

कर्तव्याऽशीतिपर्यंतं निराहारेणसर्वदा।

जलाहारेण वा कुर्यादशक्ते सफलादिभिः।

नक्तेन वा हविष्येणचैकभुक्त्यानिरंधसा।

जपवोजातुवत्याभ्योह्याज्ञेयं मामकीप्रिये।

यस्याहं मोक्षमिच्छामि तस्मै दद्यांमतीं वर।

एकादशी न कर्तव्या विद्धाचैवाऽरुणोदये।

वैष्णवैस्तु विशेषेण विद्धात्याज्या वरानने।

दशमीप्रेतराजाय तिथिर्दत्ता मया पुरा।

तस्यायोगे न कर्तव्यं मामकंदिनमुत्तमम्।

यावंतिव्रतमुख्यानि मदीयानि हरिप्रिये। ६०

अन्यवासरमिश्राणि न कुर्यादरुणोदया।

तिथिप्रवेशमिच्छंति मामका अरुणोदयात्।

स एव मुख्यकालस्तु संकल्पस्यावधार्यताम्।

दशमीदिनमारभ्य मामकं तुय् दिनत्रयम्।

माननीयं विशेषेण जनैःकांस्यादि वर्जनैः।

वैष्णवैरुत्सवःकार्यो ज्ञात्वा मज्जन्मवासरम्।

वितानतोरणालेपनेक मार्जन दीपकैः।

पूजनं केशवादीनां मूर्तीनां कमलालये।

पंचामृतैश्चनैवेद्येर्हवनै स्संस्तवैरपि।

सहस्रनामपठनैर्महापुरुषविद्यया। ६५

कुसुमांजलिभिर्विष्णु तथा वैकुण्ठपार्षदान्।

तोषयेत्परमान्नेन नृत्यगीतोत्सवादिभिः।

रजनीं गमयेत्प्राज्ञः पुनश्चाऽरुणनिर्गमे।

कृत्वाचावश्यकं कर्म पूजायागं समारभेत्।

विप्रान् द्वादशचाहूय महाभागवतान् प्रिये।

अधीतविष्णुसूक्तं च केशवादिधियोऽर्चयेत्।

सांगंसावरणम्देवं पूजापीठे निवेश्यच।

पंचामृतेनसंस्नप्य तथा सर्वौषधैरपि।

गंधैधूपैस्सुरभिभिः पुष्पैश्चैव प्रपूजयेत्।

नीराजनार्घ्यदानैश्च कुसुमांजलिभिस्तथा। ७०

सूर्यसंदर्शनात्पूर्वं द्वादश्यां पूजयेद्धरिम्।

हरिवासरमुत्सृज्य विप्रान् संतोष्य वैष्णवान्।

द्वादश्यांपारणंकुर्याद्धुत्वाऽग्नौ मूलविद्यया।

पारणं तु त्रयोदश्यां कुर्याद्विद्धां परित्यजेत्।

पारणाहे मुहूर्तेपि द्वादशी तु भविष्यति।

तस्यां वै पारणंकुर्यात् कृत्वा माध्याह्निकीं क्रियाम्।

दिवास्वापं मैथुनं च परान्नं तत्र संत्यजेत्।

इयं तु द्वादशीपुण्या चतुर्था मम वल्लभा।

शयनीबोधिनीदेवी त्रितीया परिवर्तनी।

मार्गशीर्षभवायातु शुक्लावाराहवल्लभा। ७५

आनुपुण्यासुमामेकमुत्सवैस्सं प्रपूजयेत्।

रथोत्सवंनिरूप्याथ गत्वापुण्याम् सरिद्वराम्।

श्वेतद्वीपं प्रकल्प्यात्र संपूज्यस्वापयेद्धरिम्।

आषाढ्यांवैष्णवैस्साकं जयमङ्गळनिस्स्वनैः।

प्रतप्तं शंखचक्राद्यै रंकयेद्भुजमूलयोः।

आदिपादेऽनुराधाया स्तदभावेतु केवले।

प्रस्वापयेद्धृषीकेशं दृष्टिनाशोऽन्यथा भवेत्।

परिवर्तस्तु कर्तव्यो द्वादश्यां श्रवणस्य च।

मध्यपादेमहाभागे मासे नभसिशोभने।

आविर्भावं वामनस्यह्यस्यामेव विनिर्दिशेत्।८०

वैष्णवान् पूजयेत् भक्त्या कृत्वाहोमं हुताशने।

कार्तिकेशुक्लपक्षस्य द्वादशीरेवतीयुता।

तस्यां प्रबोधयेद्विष्णुं चतुर्थेचरणेमुदा।

विष्णुंप्रबोध्यदेवेशं प्रसुप्तं क्षीरसागरे।

शय्यायांपन्नगेंद्रस्य श्रियासाकंमहोत्सवैः।

महापूजाप्रकर्तव्या ह्यभिषेचनकैर्जलैः।

सप्तावरणसंयुक्तं संपूज्यपुरुषोत्तमम्।

रथयानं प्रकर्तव्यं दीपवृक्षान् विधाय च।

वादयेत्सर्ववाद्यानि पाठयेन् मङ्गळस्तवान्।

ब्रामयेत्स्यंदनंविष्णोर्वैष्णवै स्समलंकृतैः।८५

आनीयमंदिरंदेवं भक्त्या नीराजयेद्धृशम्।

मुद्राधारणपूर्वं तु कुर्यादेतन्महोत्सवम्।

प्रातस्संपूज्यहुत्वाऽग्निं वैष्णवान् भोजयेद्द्विजान्।

द्वादशीमार्गशीर्षस्य देवीमाचेऽति वल्लभा॥८७

अस्यामभ्यर्चनंनूनं कोटियज्ञफलप्रदम्।

इष्टींभागवतींकुर्या दस्यामेव वरानने।८८

विधिमिष्ट्या प्रवक्ष्यामि जनानांगतिदायिनीम्।

उपोष्यैकादशींशुद्धाम् द्वादश्यांपूर्ववद्धरिम्।८९

अर्चयित्वा विधानेन गंधपुष्पाअक्षतादिभिः।

पौरुषेणतुसूक्तेन् श्रीमदष्टाक्षरेण वा।९०

अर्चयेज्जगतामीशं स र्वाभरणभूषितम्।

ततो भागवतान् सर्वानर्चयेत्परितो द्विजान्।

पुष्पैर्वा तुळसीपत्रैः सलिलैरक्षतैरपि।

प्रह्लादंनारदंचैव पुण्डरीकंविभीषणम्।

रुक्मांगदंतत्सुतं च हनूमन्तंशिभिं भृगुम्।

वसिष्टंवामदेवं च व्यासंशौनकमेव च।

मार्कण्डेयंचांबरीषं दत्तात्रेयपराशरौ।

हारीतात्रि एकतं च द्वितंचैवत्रितं तथा।

भारद्वाजंबलिंभीष्म मुद्धवाऽक्रूरपूर्वकान्।

गुहं शुकं चवाल्मीकिं मनुं स्वायंभुवं तथा।९५

मतङ्गंशबरींचैव पृथुंभागवतोत्तमम्।

सनंदनं च सनकं कुमारं च सनातनम्।

वोडुंपंचशिखंचैव गजेंद्रं च जटायुषम्।

सुशीलांत्रिजटांगौरीम् शुभांविद्यावळीं तथा।

अनसूयां द्रौपदीं च यशोदांदेवकीं तथा।

सुभद्रांचैव गोपींच शुभानंदव्रजेस्थिताः।

नंदं च वसुदेवं च दिलीपं च विशेषतः।

सभर्तृकां च कौसल्यां जनकंवसुसंज्ञकम्।

भूतभव्यभविष्यंश्च महाभागवतानिमान्।

नारदादीन् प्रपन्नांश्चाप्यनन्तं विहगेश्वरम्।१००

सेनेशंनित्यमुक्तांश्च स्थापयेत्परितो हरेः॥

दीक्षितानांद्विजातीनां तनुष्वावाहयेदिमान्।

पाद्यार्घ्याचमनादीनि दत्वाचोद्वर्तनैःपुनः।

पंचामृतैःपञ्चगव्यैः कषायौषधिवारिभिः।

स्नापयेत्क्रमशोभक्त्या स्वाधिकारेणसंस्थितान्।

हृदादिमन्त्रकल्पैश्च कुर्यादुपकृतिं क्रमात्।

दत्वाचमनकंधौतवस्त्रं प्रोक्षणिकं तथा।

कुशादिनिर्मितेष्वेव पीठेषुविनिवेशयेत्।

उत्तरीयाणिदेयानि द्वादशाक्षरविद्यया।

ऊर्ध्वपुण्ड्राणिविधिना केशवादिकनामभिः।१०५

कुर्यादंगेषु गंधेन लेपनं भक्तितत्परः।

तुलसीमालिकाभिश्च धूपदीपनिवेदनैः।

भक्ष्यैर्भोज्यैश्च चोष्यैश्च पेयैर्नानाविधैस्तथा।

भोजयेत्परमान्नेन विधिनासाधितेन वै।

यद्यदिष्टतमं यस्य तत्तस्मै विनिवेदयेत्।

ततस्सुशीतलांवारि चंद्रकोशीरवासितम्।

अर्पयेद्भक्तियुक्तेन चेतसावीजयेच्चतान्।

ततः पूगफलोपेतैरेला पुष्पलवंगकैः।

सचूर्णपूगताम्बूलं मूलेनाशु समर्पयेत्।

दक्षिणावस्त्रगोस्वर्ण कर्णकुण्डलमुद्रिकाः।११०

हरिर्मे प्रीयतांभक्त्या विप्ररूपो जनार्दनः।

प्रणमेद्दण्डवद्भूमौ साष्टाङ्गं प्रेमविह्वलाः।

धन्योऽहं भावयेद्विप्र पादशौचावने जनैः।

नीराजयेत्ततोविष्णोःपादमूलं विचिंतयेत्।

अनयावैष्णवेष्ट्या मे वासुदेवादयानिधिः।

कैंकर्यं मे ददात्वीशश्श्रीभूनीळापतिः प्रभुः।

परधर्मपरज्ञान परभक्तिसमन्वितम्।

करोतुमामचिंत्यामा भगवान्भक्तवसलः।

अनन्यशेषतांचैव तथाऽनन्य प्रयोजनम्।

अनन्यसाधनत्वंच देवोमह्यंप्रयच्छतु। ११५

अहंभुवेतिसूक्तेन दद्यान्नीराजनंहरेः।

क्षामयित्वास्वापराधान् वैष्णवांस्तु विसर्जयेत्।

आकारत्रयसंयुक्तान्नवेज्याकर्म तत्परन्।

वैष्णवानामभावेतु वैष्णवैकं प्रपूजयेत्।

अर्थकपंचक तत्त्वज्ञान् महाभागवतान्नयेत्।

न नयेद्वासरंवंद्यं स्तवैर्नत्या प्रपूरयेत्।

इमांतु वैष्णवीमिष्टीं सर्वदातु समाचरेत्।

मृताहे जन्मदिवसे वैष्णवस्य गुरोरथ।

स्वस्यवा धर्मकार्येच विवाहे सर्वपर्वसु।

विष्णोराराधनांते तु होमांतेच वरानने। १२०

पूजयेद्विधिना विप्रान्महाभागवतान् मुदा।

अनंतविहगेशादि पार्षदप्रवरोत्तमान्।

मान्याचतुर्विधात्वेवं द्वादशीपरमादरात्।

मद्भक्तेनस्यहस्तेऽहं वशीभूतो वसाम्यहम्।

चैत्रे तु शुक्लद्वादश्यां पवित्रारोपणंमम।

कृत्वा डोलोत्सवंपूर्वं एकादश्यां वरानने।

एकादशींसमारभ्य वैशाखं सकलं नयेत्।

कृत्वा नानाविधैःपुष्पैर्डोलामांदोळनेनमे।

यथैवैकादशीप्रेष्ठा तथैव द्वादशी मम।

तथैव वैष्णवश्रेष्ठा स्तथैव मधुमाधवौ। १२५

श्रावणेद्वादशीप्रोक्ता पवित्रारोपणप्रिये।

त्वयोऽहं पूजितोभद्र प्रयच्छामि निजंपदम्।

एकादशीसमोनैव वासरोममवल्लभः।

नाष्टाक्षरसमोमन्त्रः नधर्मो वैष्णवात्परः।

जीवानांप्रतिबुद्धानां मुक्तयो हि मयाकृता।

एकादशीयंनभवेद्द्वादशी सहिताकलौ।

मम त्वयावैष्णवैश्च संतोषो सजपेनच।

निष्पन्नोजायतेदेवी वल्लभैकादशीमम।

एकास्याचरितासंयङ्महापातकिनामपि।

पातकंक्षाळयेत्देषा शरज्जलमलं यथा। १३०

चिंतामणिःकाम्धेनुर्यथा कल्पतरुर्नृणाम्।

तथैव कामदालोके मताह्येकदशीतिथिः।

भुक्तिमुक्तिप्रदानान्या गंगेव वरवर्णिनी।

नचाऽहमिवलोकेस्मिन् नाश्रयोऽस्तिविचिंतय।

तस्मात्प्रवर्तयोपायं मत्प्राप्तौ देविसत्वरम्।

प्रसुप्तेषुजनेष्वेत्देक मेकादशीव्रतम्।

श्रुत्वैवंमनयालक्ष्म्या लोअनांश्रेयसाव्रतम्।

विष्वष्वक्सेनायसंप्रोक्तं विष्वक्सेनेन वै मम।

एवमेकादशिपुत्रस्तथा वैष्णवपूजनम्।

द्वयंप्रोक्तं भवत्प्रीत्या किमन्यच्छ्रोतुमर्हथ। १३५

इति श्रीःबृहद्बृह्मे <u>एकादशी माहात्मियं</u> नाम पंचमोऽध्यायः

**<u>अथ षष्टोऽध्यायः</u>**

**रुद्रगीतायां-<u>भगवतः तत्वनिरूपणम्</u>**

मुनय ऊचुः-

भगवन् रुद्रगीतेन भद्रबाहुश्च गौतमः।

कथं भागवतौभूत्वा गतिंभागवतीं गतौ।

किंतत्वं वासुदेवस्य रुद्रेणोक्तंपुरातनम्।

कुतश्चाद्यागमज्ञानं पादोदकशिराश्शिवः।

बृह्मोवाच-

न बोधमगमद्राजा भद्रबाहुर्यथा पुरा।

शिवेनबोधितोपीह वाक्यैर्वेदांतनिर्मितैः।

पप्रच्छप्रणतोभूत्वा शंकरंवृषभध्वजम्।

भगवन् भवताप्रोक्तो मोक्षदःपुरुषोत्तमः।

मम कस्मादयंदेव गौतमोऽवंचयत्कथम्।

प्रवक्ता तव तत्वस्य कर्ताशास्त्रस्य शंकर।5

तदहं श्रोतुमिच्छामि विस्तरेणमुखात्तव।

संशयो मे महानस्ति नान्यस्त्वत्तोऽस्यनाशकः।

परस्यरूपं जीवस्य स्वरूपं बंधमोक्षयोः।

निर्णयंवासुदेवस्य विभूतेश्च निरूपय।

श्री शिव उवाच-

नमो जलजनेत्राय सर्गस्थित्यंतकारिणे।

नारायणायदेवाय विशुद्धज्ञानमूर्तये।

राजंस्तेऽहं प्रवक्ष्यामि श्रृणुष्वैकमनानृतम्।

वचःश्रुतिकथोपेतं परमात्मानिरूपणम्।।

अप्येतिसकलं यस्मिन्यत्संज्ञां प्राप्यतिष्ठति।

एकमेवाऽद्वितीयं च तद्ब्रह्मेत्यवधार्यताम्।10

यस्मिन्स्थूलविशेषोयं नास्तिमायाविनिर्गतः।

निर्विशेषोऽवशिष्टोयं सूक्ष्मरूपेणमानद।

सन्नामकमिदंब्रह्मरूपनामादिवर्जितम्।

अनामरूपंतद्ब्रह्म स्वाश्रयंत्ववधार्यताम्।

यस्यांशभूतकालेन यस्याज्ञामनुवर्तिना।

सिसृक्षाजायते यस्य तद्ब्रह्मेत्यवधार्यताम्।

यदेकोऽहंबहुस्यामि त्युत्थाप्यात्मगतं जगत्।

नराणामयनं यत्स्यादित्याहश्रुतिरात्मना।

निर्विशेषंनिराधारं निस्संकल्पं निरंजनम्।

नारायणेतिशब्देन सर्वावस्थासु बोध्यते।15

बृहंतोऽस्मिन्गुणास्सत्य ज्ञानंदादयोनृप।

तस्माद्ब्रह्मेति शब्देन सर्वावस्थासु बोध्यते।

नारायणेति ब्रह्मेति परमात्मा विशिष्यते।

मायातीतस्यनामानि नित्यानि विलसंति हि।

कर्मस्वभावयुक्तेषु स्वसत्तावत्सुकारणम्।

चिदचित्सुसमन्वेति तद्धारकतया मतः।

परमात्मेतिविख्यातः प्रवेशाद्विष्णुरुच्यते।

समावस्थामवष्टभ्य स्थितस्सर्वासुमानद।

कर्तृत्वपालयितृत्व संहर्तृत्व गुणैर्युतः।

स्वकृतान्नियमात्काले करोत्यवति हंति च।20

स एव सर्गकाले तु संप्राप्तेपुरुषोत्तमः।

क्षोभयामाससंसुप्तं पुरुषंप्रकृतिं पुनः।

सासूतत्रिगुणक्षोभंतैरनूत महत्तरम्।

महत्तत्त्वं महाभाग! तत्रान्वेति यदृच्छया।

विशेषसंज्ञासंभूतात् सविशेषस्स उच्यते।

कार्योनारायण मयाद्याकृतोऽव्याकृतादयम्।

नारायणाभिव्यक्तिस्तु बहुधा समजायत।

अयनाद्यक्तभूतानां सर्वेष्वायतनादपि।

जलेषुशयनच्चापि नारायण उदीरितः।

परमात्मादि शब्दाना मेवेमेवान्वयादिह।25

विशेषेबहुनामानि सगुणानि भवंति हि।

निर्गुणान्येवराजेंद्र निर्विशेषं भवंति हि।

महदादिषुकार्येषु महदादिकसंज्ञितः।

भूतेषु भूतिकेष्वेकः प्राणेंद्रियमनस्सु च।

आत्मासमभवद्ब्रह्म वेदांतैकविदो विधुः।

एवं संकल्पमात्रेण सर्वं समभवत्पुरा।

बहुत्वमेवमाप्;न्न एक एवा भवत्तु यः।

सर्वेषांयोनिरप्येष सर्वेषांसन्निधिस्त्वयम्।

सर्वेषामवधिश्चात्मा सर्वेषां पुरुषोत्तमः।

सब्ऱह्मासहरिस्सेंद्रो न यमो वरुणोवसुः।30

नसूर्यो न शशांकश्च नाग्निर्नापो नवैमरुत्।

न प्रजापतयश्चान्ये मनवो न मरुद्गणाः।

नदिशो विदिशोनैव नांतरिक्षं नवैक्षितः।

एकोनारायणस्त्वासी दाधारस्वाश्रयोगुणः।

नित्यानंतगुणोपेतो बीजभूतोऽव्ययोऽच्युतः।

तस्माद्ब्ऱह्मासमभव द्धरोऽहं वासवोयमः।

वसुस्सूर्यश्शशांकश्च वह्निरापो नभःक्षितिः।

मनुःप्रजापतिमुखस्तस्मा देवव्यजायत।

तस्मात्पुरुष एवेदं भूतंभव्यं भवच्च यत्।

यथाऽस्यशक्तिःप्रकृतिः त्रिगुणा परमेश्वरी।35

कोटिबृह्माण्डबाण्डानां संश्रयःकारणात्मिका।

सच्छब्द्वाच्यासर्गादौ साक्षाद्बृऱह्मस्वरूपिणी।

विकारोजायतेतस्मात् सर्वोपि बृऱह्मसंज्ञितात्।

देवरूपेणकार्येण सर्वास्वाप्नोतिपूरुषान्।

अतःप्रकृतिरात्मेति गीयते कार्यरूपिणी।

विश्वस्मिन् सकलंवस्तु चेतनाचेतनं नृप।

विनाप्रकृतिसंसृष्टिं विद्यते नैव किंचन।

तथास्यचेतनाशक्तिः प्रकृतिर्जीवसंज्ञि?ता।

धात्री सर्वविशेषस्य प्राकृतस्य विशांपते।

आब्रह्मभुवनाल्लोकानावृत्य प्रभयास्वया।40

व्याप्यतिष्ठति सर्वत्र तस्मादात्मेति कथ्यते।

अचेतनमिदंसर्वं चेतनस्य महामते।

शरीरभूतं विज्ञेयं नेंगतेचेतनं विना।

अण्विंजीवकलामेतां प्रविश्यसकलां तनुम्।

प्रवर्तयति तेनैष विष्णुरित्यबिधीयते।

वसत्यस्मिन् शरीरस्थे वासुदेव इति स्मृतः।

अचेतनाद्बृहंतोऽस्मिन् प्राणास्संति नृपोत्तम।

तेनास्य संज्ञाब्रह्मेति जीवस्यापि विधीयते।

जीवो हि सच्चिदानंद लक्षणःप्रकृतेःपरः।

अचेतनायाःप्रकृतिः चतुर्विंशतिधास्मृता।45

शरीरभूता साराजंश्चेतनायत्तवैभवा।

चेतनाप्रकृतिर्नाम प्रतिदेहं व्यवस्थिता।

**ज्ञा**नाकारेणैकरूपा परायत्तस्थितिर्हि सा।

चेतनाचेतनं सर्वं शरीरं परमात्मनः।

परमात्मास्वतंत्रोयं राजन् सर्वेश्वरो हरिः।

चेतनेषु च सर्वेषु चेतनोऽयं प्रजापतिः

बृह्मात्मनोगुरुर्ज्ञेयः कृपापात्रं रमापतेः।

समष्टिस्सर्वजीवानां जलानां वारिधिर्यथा।,

सोऽस्यनाभिहृदांभोजादाविर्भूतश् चतुर्मुखः।

नायंसाधारणो जीवः साक्षात्प्रतिनिधिर्हरेः।50

उत्कृष्टाद्रजसोजात स्संकल्पेनार्हसाधकः।

सर्वजीवनिकायोसौ भगवत्प्रतिमोमतः।

प्रभावाद्यस्स्वयंह्येष पाद्मंकल्पमथासृजत्।

स तु नारायणसुतो व्याप्तोबृह्माण्डविग्रहे।

व्यष्ट्यात्मको यथाजीवः स्वशरीरे महामते।

सर्वेषांहृदयज्ञोयं प्रेरकस्सर्ववृत्तिषु।

परमात्मासृजो राजन् समष्टीवपुषोननु।

अस्यबृह्माण्डदेहस्य सत्तावृत्तियतः पुमान्।

आत्मा चतुर्मुखोज्ञेयः पूज्यो वंद्यस्तु देहजैः।

द्विपरार्धावसानोयं सर्वेषां वरदोमतः।55

सर्वेश्वरस्सर्वपतिः सर्वेषांच पितामहः।

सर्वेभ्योजीवजातेभ्यस्स्वतंत्रो नित्यवैभवः।

बृहंतोऽस्यगुणास्तस्माद्बृह्माचेत्यभिधीयते।

ईश्वरोमुक्तिदःपुम्सां तेजोगर्भस्स्वरीश्वरः।

वेदगर्भोवेदमुखो वेदसृग्वेदबोधितः।

सर्ववेदांतवाक्यानामतो बृह्मागतिर्मतः।

अंशभूतोभगवतो महाभागवतोत्तमः।

नारायणश्रितोऽसमो यतोऽयंबृह्मसृड्मतः।

ततोयं विशतोंडांते भक्त्याप्रकृतिवर्जितः।

आश्रयांतरनिर्मुक्तो नित्यानंत गुणास्पदम्।60

प्राप्योभोग्योऽथगम्यश्च सर्वेषां नृपसत्तम।

प्रसादजोयथाह्येष क्रोधजोहं तथैव हि।

तमसाघोररूपेण संहर्तातत्प्रसादतः।

पंचवक्त्रोमहादेवो महाकायो महेश्वरः।

मृत्युरूपेणसर्वत्र व्याप्तोहं प्राकृतेषु च

यमरूपेणरौद्रेण शतृरूपेण भूपते।

कलयामि जगत्सर्वं भूतप्रेतगुणाधिपः।

आवयोर्न समस्तेन कुतोऽधिकतरस्ततः।

तदाश्रयत्वाप्रेर्यत्वात् स एव परतः परः।

सर्वात्मा सर्वभर्ता च सर्वेशस्सर्वसंश्रयः।65

सदनंतगुणाधारो मुक्तिदःकृपयासताम्।

शरीरत्वाद्वयंसर्वे तस्येशस्य रमापते।

गीयामहेऽनन्य एव तत्वमस्यादि वाक्यतः।

आत्मैवपर्युपास्योयं मुक्तिमिच्छद्भिरेव हि।

लक्षणैश्चास्यनिष्पत्तिः कर्तव्या वेदवादिभिः।

एते वयं महाभाग! स्वस्यचेतसि नित्यशः।

चिंतयामो घनश्यामं योगमार्गं विशोधिते।

नारायणंश्रियोपेतं वनमालिनमव्ययम्।

चोदयंतं च नो बुद्धिमनःप्राणेंद्रियाणि च।

भक्तानामात्मनोरूपं व्यंजयंतं मनोहरम्।70

अभक्तानांमनोवृत्तेर्धूरा दूरतरं मतम्।

निश्चितं सर्ववेदेषु वैष्णवं परमंपदम्।

गुणत्रयाद्यतीतं च व्यापकं हेयवर्जितम्।

नात्रकालगतिर्ज्ञेया ह्येवंरूपं सनातनम्।

सान्तंविकल्परहितं निर्विशेषमगोचरम्।

नित्यानंदमनौपम्यं परमंवैष्णवं पदम्।

नातःपरंप्रगन्तव्यं सर्वावधितयामतम्।

येन न प्राप्यते राजन्! भगवान् भूतभावनः।

प्राप्यं नाधिगतं तेन पृथैवभ्रमतासता।

विभूतयेवयंसर्वे बृह्माद्यास्सकलेश्वराः।75

प्रविशामो मुहुस्तस्मिन् सरितस्सागरे यथा ।

त इमे नामरूपाभ्यां बुद्बुदा इव वारिधौ।76

उत्पद्यन्ते प्रलीयन्ते कर्मवातेरिता मुहुः।

परतन्त्रा वयं सर्वे वाक्तन्त्र्या विनियोजिताः।77

न शक्नुमो महाराज दातुम् भोक्तुं मनागपि।

वहामो हि बलिं तस्मै विष्णवे प्रभविष्णवे।78

कालरूपेण यो लोकान् ग्रसते निरनुग्रहः।

वीक्षणाद्यस्य जायन्ते ब्रह्माण्डानां च कोटयः।79

संलीयन्ते च संकोचाज्जलेषु लवणं यथा।

चतुर्धापि क्षयो यस्मिन् जायते परमेश्वरे।80

तमिमं प्रणतास्सर्वे विसर्गोऽपि यतो मतः।

जीवोऽयं विषाति व्यक्ते व्यक्तं च परमात्मनि।81

परमात्मा निजेरूपे लीनमादाय तिष्ठति।

व्यक्ताव्यक्तं विनिर्मुच्य यदा भागवतो भवेत्।82

अभ्येति वैष्णवंधाम यतो नावर्तते पुनः।

यावत् प्रकृतिसंबन्धो राजन् जीवस्य तिष्ठति।83

तावन्न प्राप्यते ब्रह्म स्वाधिष्टानामनामयम्।

"अटन्तु सर्वतीर्थाणि पठन्तु सकलागमान्।84

यजन्तु निखिलान् यागान् नाप्नोति परमं पदम्।

नाविद्या हीयते राजन् विनाभक्तिं जनार्दने।"

आकारत्रयसंपन्ना या भक्तिः प्रोच्यतेबुधैः।

स्वरूपविस्मृतेराजन् यो दोषस्समपद्यत।86

कथं तस्य निरासस्याद्विना विष्णुपदाश्रयात्।

तपो योगव्रतादीनां फलमेकं विनिश्चितम्।87

गोविन्द्चरणांभोजे या हि भक्तिप्रजायते।

तपसा सर्वसामर्थ्यं जायते तपसत्तम।88

न वैकुण्ठपदांभोजरतिलेशो भवेदिह।

अनुग्रहो यथा विष्णोर्जायते हेतुवर्जितः।89

तदा हि जायते काचिद्रतिर्नित्यानपायिनी।

भक्त्यातयामलं राजन् निर्दहेदात्मनस्तु यः।90

स्वरूपं भासते तस्य मायासंसर्गवर्जितम्।

ज्ञानरूपमनौपम्यमसंकुचितवैभवम्।91

निर्मलं सत्यसंकल्पं सदैकरसमक्षरम्।

परसौम्यं गतं विष्णोर्भोगसाम्यमपि ध्रुवम्।92

देवास्समुपतिष्ठन्ति संकल्पादेव भूपते।

तदा स केवलीभावं संप्राप्तो भविता मुनिः।93

परभक्त्या पुनस्त्यैव ह्यात्मस्थं विश्वकारणम्।

नारायणं जगन्नाथं सर्वकारणकारणम्।94

स्वाधारं स्वाश्रितं नित्यमेकरूपमनामयम्।

स्वयं ज्योतिस्स्वयं धाम स्वतन्त्रं पुरुषोत्तमम्।95

परमं पदमाप्नोति भक्त्या नास्त्यस्तु साधनम्।

राजोवाच-

परमं शरणं विष्णोः प्राप्यं भोग्यं निरूपितम्।96

परमत्वं कथं तस्य लक्षणं वद शंकर।

श्रीशिव उवाच-

प्रकृतिः पदमेकं तु प्राकृतं कथितं तु तत्।97

प्राकृतं रूपमाप्नोति यत्रासक्तोऽयमक्षरः।

नावैति स्वात्मनो रूपं शरीरं परमात्मनः।98

देहोऽहमिति संस्थानलक्षणं प्राकृतं पदम्।

आत्मैवाहं न देहोऽहं द्वितीयं पदमात्मनः।99

देहादिवासनाव्याप्तं मलिनं तत्प्रकीर्तितम्।

शुद्दरूपं तृतीयं तत् केवलं ज्ञानलक्षणम्।100

कैवल्यमश्नुते यस्य संप्राप्तो पुरुषो नृप।

परमं तु पदं बृह्मन् वैष्णवं परिकीर्तितम्।101

स्वाधारभूतमात्मानं निर्गुणं बोधलक्षणम्।

यं प्राप्य भूपते मुक्ता भवन्ति मुनिसत्तमाः।102

इति श्री बृहद्ब्रह्मे चतुर्थभागे रुद्रगीतायां **तत्त्व निरूपणं** नाम षष्टोऽध्यायः।

अथ सप्तमोऽध्यायः

**रुद्रगीतायां भक्तिनिरूपणं**

राजोवाच-

कथंस्थानत्रयातीतं चतुर्थं परमंपदम्।

समभ्येति दयासिंधो वद नो वदतां वर।

श्रीरुद्र उवाच-

कर्मज्ञानोपासनं च भगवत्प्राप्तिसाधनम्।

कथितं सर्ववेदेषु पुराणागमवर्त्मसु।

नारायणात्मकं कर्म कर्मबंधनिवर्तकम्।

मुमुक्षूणां सदासेव्यं ज्ञानैकसदृशं हि तत्।

यत्कर्तृत्वाभिमानेन फलमुद्दिश्य वा कृतम्।

बंधकंनृपशार्दूल कर्मतत्परिकीर्तितम्।

न तत्ब्रह्मात्मकंकर्म त्वज्ञान जनितं हि तत्।

दुष्टंक्षरफलंसर्वं कर्मजन्मैकसाधनम्।5

राजोवाच-

यदज्ञानकृतंकर्म सफलंदृश्यते हि तत्।

वद नो ज्ञानरूपंतद्येनबंध निवर्तनम्।

श्रीरुद्र उवाच-

ज्ञात्वात्मानं सदानंदलक्षणं बोधरूपिणम्।

गंतव्यमेकरूपं च परिणामादिवर्जितम्।

चिन्मयं भगवद्व्याप्तं भगवच्छेषवैभवम्।

नित्यमक्षरमव्यक्त मजमव्ययमुज्ज्वलम्।

देहादिकृतनानात्व रहितं निर्गुणंपरम्।

विकारवर्जितं ज्ञानप्रकाशपरिपूरितम्।

बद्धंप्रकृतिसंयोगात् अल्पज्ञमसुखात्मकम्।

विज्ञायात्मानुभूत्यर्थमविद्या कर्मशांतये।10

नारायणाज्ञयानित्यं नैमित्तिकमथाचरेत्।

स्ववर्णाचारतःप्राप्तं निवृत्तान्यप्रयोजनः।

सर्वत्रसुगतंब्रह्म नारायणमनुस्मरेत्।

शरीरत्वाद्भगवतः चेतनस्यजडस्य च।

न तदस्तिजगत्यस्मिन् चेष्टतेयद्धरिं विना।

तमेवभांतमनुभाति सर्वंचिदचिदात्मकम्।

आत्मन्यग्नौहविष्येच यष्टव्येषु कुशेषुच।

मन्त्रे चरुपुरोडाशे बृह्मात्मत्वं विधापयेत्।

कर्तृत्वंफलसंयोगं स्वत्वं कर्मण एव च।

हित्वात्रयं यत्कुर्वीत कर्मबृह्मात्मकंत्विदम्।15

ज्ञानरूपमिदंकर्म कर्मबंधनमुक्तिकृत्।

यावदात्मस्थितिस्तावदनुष्टेयं विपश्चिता।

अकर्तृत्यस्यरूपस्य संधानादत्र कर्मणि।

व्यापिनोवासुदेवस्य स्वरूपास्यानुचिंतनात्।

भोग्यत्वस्यात्मरूपस्य स्वेतरानित्यभावनात्।

कृतंज्ञानात्मकंकर्म न बंधाय भविष्यति।

स्वर्गादिवन्नात्मगतिफलं नाशाय हि स्मृतम्।

नोत्पद्यते नवंकिंचिदात्मनोस्य नृपोत्तम।

नातःकर्मफलंह्यात्मा किमात्माज्ञानकर्मणा।

आत्मांतरायकं दुष्टं कर्माणेन निवार्यते।20

ज्ञानमात्मस्थितिंविद्धि रागद्वेषादि संचयम्।

नेगतेदेहबुद्ध्या तु मनाङ्मानापमानयोः।

शीतोष्णसुखदुःकेषुसमस्वत्मसुखास्पदम्।

ज्ञानैकाकारमात्मानमनुपश्यति सर्वतः।

मायामात्रमिदंसर्वं देहंदेहानुगं च यत्।

हेयबुद्ध्या न गृह्णीयाद् राजन्नात्मस्थितो नरः।

नान्यत्कर्ममहाराज कर्तव्यमवशिष्यते।

स्वात्मप्राप्तौ महाभाग सर्वयत्नविवर्जितः।

परकीयमिवात्मीयं देहंयोमनुते पुमान्।

न तत्र युज्यतेहर्ष शोकहेतोरुपस्थितौ।25

अयमेवस्तिथप्राज्ञो गुणा तीतोमथोबुधः।

ज्ञानयोगरथासाक्षा दात्मभूतस्तुकेवलः।26

ब्रह्मभावमनुप्राप्तास्स्वात्मन्येवनरेश्वर।

गुणो हि गुणिनाभिन्नो यथा नैवार्हति स्थितम् 27

अहमेवं ब्रह्मणास्मीत्यभेदमनुसंस्मरेत्।

एवं ज्ञानी यदात्मस्तमात्मानमनुपश्यति।

आत्मस्थं परमं प्रेष्टं नारायणमनामयम्।

प्रीत्याऽतिशयभावेन क्षणमेकं न मुञ्चति।

दर्शनैकसमे ध्याने परप्रेमास्पदं हरिम्।

ध्यायेदनन्यभावेन सा भक्तिः परमा मता।30

उक्ता भागवती भक्तिरखण्डस्मृतिलक्षणा।

तयात्मानं हरिः साक्षात्सन्दर्शयति भूमिप।

भक्त्या केवलया ग्राह्यो भगवान् जलजेक्षणः।

अनन्तनित्यनिस्सीमकल्याणादिगुणास्पदम्।

सर्वाधारस्सर्वशेषी दिव्यमङ्गलदेहभृत्।

शङ्खचक्रगदापद्मधारी चारुचतुर्भुजः।

प्रियोऽयं परमस्तस्य तथास्य सपरप्रियः।

नैनं स काङ्क्षतेत्यक्तुं न चायं तमधोक्षजम्।

एवं परानुरागेन जाता भक्तिः परस्परम्।

पराकाष्ठेयमादिष्ठा भक्तानां नृपसत्तम।35

देहाभिमानेनिर्मुक्ते तदात्माभिमतिर्गता।

केवलं परमात्मात्मभावो भागवतो मतः।

चंचलंचापि राजेन्द्र! मनोदुर्निर्ग्रहं धिया।

निरोधायमतातस्य धारणाशास्त्रपारगैः।

दोषबुद्धिं च सर्वत्र मायामात्रे नरेश्वर।

अमायिकेचात्मनि च सुखमात्यन्तिकं स्मरेत्।

पराकाष्ठा तु भूपाल परमात्मनि संस्थिता।

ज्ञानाभ्यासातिरिक्तेन मनसा नाधिगम्यते ।

यो विज्ञायाभ्यसेद्राजन् कर्मणोपासनेन वा।

धानेन सोऽश्नुते सम्यगात्मानं प्रकृतेः परम्।40

सुकरः कर्मयोगो हि श्रद्धामात्रमपेक्षते।

अदृश्यमानं तत्तत्वमनुसन्धायचेतसा।

दृष्टार्थेन क्रियां कुर्वन्न प्रमाद्यति कर्हिचित्।

चेतसो बाह्यवृत्तित्वा ज्ञानस्य सहकारिता।

पूर्तिष्टेतिद्विधा प्रोक्तं कर्मनिष्कामलक्षणम्।

कूपारामादिकं पूर्तमिष्टंयज्ञादिलक्षणम्।

अग्नौ वा स्तण्डिले वापि प्रतिमायामथापि वा।

पूजनं विविधैर्मन्त्रैरिष्टिरेषा प्रकीर्तिता।

फलमेषां परित्यज्य ज्ञानेन सहकारिणा।

नित्यं कर्म प्रकर्तव्यं तत्तु भागवतं पुनः। 45

उद्दिश्य वासुदेवं च लक्ष्मीकान्तं धराधिप।

सात्विकीर्द्रव्यमन्त्रैश्च तादृशैरपि भूसुरैः।

राजसस्तामसस्तेर्न कर्तव्यंकर्मसात्विकम्।

मुमुक्षूणां महाभाग चेतसः शान्तिमिच्छता।

विष्णोर्निकेतनं चैव पञ्चकालोपसर्पणं।

वापीकूपप्रसाराम तटाकादिप्रवर्तनम्।

अन्तर्यामिधिया विष्णोर्व्यापकत्वमनुस्मरन्।

सर्वतश्चोपकुर्वीत वैष्णवेषु विशेषतः।

विप्रेषु सुरवर्येषु नारायणविभूतिषु।

हरिबुध्या समभ्यर्च्य राजन् नारायणात्मकः।50

एवं ज्ञानात्मकं कर्म सुकरं प्रतिबोधितम्।

दुष्करे ज्ञानयोगे तु मनः शांतिरपेक्षिता।

तत्रांगप्राणसंरोधो योगेनैव विशांपते।

अपेक्षितो मुमुक्षूणामात्मतत्त्वमभीप्सताम्।

यमैश्च नियमश्चैवाप्यासनप्राणरोधनैः।

प्रत्याहारध्यानधृति समादिभिरभिक्ष्ण सः।

मनो निगृह्यते राजन् इन्द्रियं धारणाश्रये।

निरुध्य परमोपायैस्थूले भगवतस्तनौ।

धारयेत्प्रथमं राजन् यावत्सूक्ष्मे प्रवर्तते।

सूक्ष्मे भगवतो रूपे स्थितं सत्संप्रसीदति।55

सूक्ष्मं तु भगवद्रूपमन्तर्यामितया स्थितम्।

हृत्पुण्डरीके विमलं सर्वेन्द्रियविकासकम्।

तेजोमयं चतुर्बाहुं पुण्डरीकनिभेक्षणम्।
पीताम्बरधरं भास्वत् कुण्डलाभ्यां विराजितम्।
रुचिरोष्ठ्ःपुटं चारु दशनावळिलालितं।
कृपया प्रणतं भक्तं वीक्षमाणं मुहुर्मुहुः।
शान्तमानन्दनिलयं श्रीदेवी परिसेवितम्।
वाङ्मनोगोचरंदिव्यं गुणत्रयविवर्जितम्।
एतद्धारणयाध्वस्तमायावरणविभ्रमः।
ब्रह्मानन्दैकनिलयमात्मानं प्रतिपद्यते।60
आत्मानन्दैकनिलये निवृत्ताशेषवाससः।
स्वात्मभूते हरौ साक्षाद्रतिमाप्नोति पुष्कलाम्।
उपेक्षितान्यतत्साम्य भोगैश्वर्य महोदयः।
आप्नोति विरजं ब्रह्म कायान्ते नृपसत्तम।
विमोक्षकाले संप्राप्ते कायस्य विगतौ मयः।
प्राणायमबलेनैव स्वात्मानं चोर्ध्वमुन्नयेत्।
ऊर्ध्वस्थानेषु विश्रान्तो मूर्ध्निनिर्बध्य निर्गतः।
सुषुम्ना वर्त्मना मुक्तो बहिर्निष्क्रमते मुनिः।
अर्चिरादिभिरानीतो याति सूर्यपथा पुमान्।
निर्दग्ध्वासनादेहः सूक्ष्मरूपमुपेत्य च।65

प्रयातिब्रह्मणो लोकं पूजितः पथिवासिभिः।

महाभागवतो नूनमिति बुध्या विरिंचिना।

कृतोत्सवेन राजेन्द्र धन्योऽहमिति वादिना।

ततश्चोर्ध्वं प्रयातीह निवृत्ता शेषवाससः।

भूतसूक्ष्माणि भूतानि मनो देवानतीत्य च।

सायुज्यं तत्र तत्रायं क्रमादनुभवन्नसौ।

त्रिविधां प्रकृतिं हित्वा महत्तत्त्वमतीत्य च।

प्रकृतिं चानिरुद्धादीनतीत्य भगवत्प्रियः।

प्रयातिपार्षदैर्नीतः तद्विष्णोः परमं पदम्।

यतो नावर्तते भूयो यत्र कालबलं न हि।70

द्विपादिरहितं साक्षाद्धाम भागवतं महत्।

निर्गुणं निर्मलं शान्तं निर्गुणोऽयं विशेत्पुनः।

परमात्मसुखास्वाधे राजन्नास्ते निरन्तरम्।

यत्सुखास्वाद कोट्यंशो ब्रह्मादीनां न विद्यते।

कोटि कोट्यंशलेशेन कृतकृत्यविभाविनः।

नयांतु तत्पदं राजन् चिन्तयामो निरन्तरम्।

प्राणायामस्थितस्सर्वे स्वाधिकारेषु सर्वदा।

धन्या भागवता लोके सद्यश्श्रीकान्तविष्टरम्।

प्रयान्ति नृपशार्दूल परमैकान्तिनोऽमलाः।

योगिभ्यश्चाधिका प्रोक्ताः परमैकान्तिनो नराः।

विनायोगं विनाकर्म विना साधनकोटिभिः।75

निर्हेतुककृपालेशाद्धरिणा वीक्षिता नृप।

एकान्तिभावोपगतायान्ति सद्यो हरेः पदम्।

राजोवाच-

परमैकान्तिनो देव कीदृशाःसन्ति मे वद।

शिष्योऽहं त्वां प्रपन्नोऽस्मि कैलासकृतकेतन।

श्रीरुद्र उवाच-

योगादिकारणं नैव विद्यते नृपसत्तम।

अन्यथाचेद्वयंसर्वे तथा भूताभवेम हि।

यमेव वीक्षते साक्षाद्भगवान् पुरुषोत्तमः।

सएव लोके भवति ह्येकान्ती नृपसत्तम।

नारायणार्थनिर्मुक्त दारपुत्रधनादयः।

अनित्यलोकसंबंध  देहदेवान्तरस्स्पृहम्।80

भोगमोक्षस्स्पृहं हित्वा हित्वा चान्यार्हशेषताम्।

नारायणं प्रपन्ना ये नारायणपरायणाः।

भगवद्रससंविद्धहृदयादीनवत्सलाः।

नारायणमृतेकर्म न  कुर्वंतिमनागपि।

हरेः संबन्धिनंहित्वा भोजनादिक्रियादिषु।

संगो न विद्यतेऽन्येषां दर्शनस्पर्शनादिभिः।

नानिवेदितमश्नन्ति न वसन्ति वृथाक्षणम्।

मनसा वचसा विष्णोर्नाममन्त्रैकजल्पकाः।

न च मन्त्रान्तरं ह्येषां न व्रतान्तरसेवनम्।

न फलान्तरजिज्ञासा न देवान्तरदर्शनम्।85

नान्यशेषस्य ग्रहणं फलादेरपिभूमिप।

नान्यचेष्टानुकरणं नान्यपर्वानुमोदनम्।

नान्योत्सवावलोकश्च नान्ययात्राप्रवर्तनम्।

नान्यव्रतानुचरणं नान्याशक्तिर्मनागपि।

नान्यार्थं जीविकाकार्या नान्यार्था पाकसत्क्रिया।

नारायणमृते राजन् सर्वेषामात्मदैवतम्।

देहयात्रा भरन्यासं कुर्यान्मातरि बालवत्।

वासुदेवे भगवति स्वाधिष्ठानेनियोक्तरि।

स्वस्य सर्वभरन्यासं कृत्वोपासनमाचरन्।

भृत्यस्स्वामिनि तस्याज्ञां पालयत्यनुवासरम्।90

सेवाभंगस्यचिन्तैका न चिन्ता स्वात्मरक्षणे।

वृत्तिंदास्यतिविश्वासः सद्भृत्यस्य यथा तथा।

वासुदेवैकनिलयो वासुदेवैकसंश्रयः।

सेवां कुर्वन् भगवतो वृत्यर्थं नावसीदति।

येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः।

मयूरास्चत्रिता येन स मे वृत्तिं विधास्यति।

**गच्छंस्तिष्ठन्निति ध्यायेत् स्खलन् भुंजन् पिबन्नृप।**

**नारायणेतिवागेषा जिह्वाग्रे वर्तते सदा।**

आब्रह्मजीवलोकेषु हरिसंबंधवर्जिते।

देवेनरेचतिर्यक्षु स्वबुध्या नार्पयेन्मतिम्।95

संबंधो द्विविधो विष्णोर्वस्तुमात्रेषु विद्यते।

साधारणो हि राजेन्द्र तथाऽसाधारणो मतः।

चतुर्विधेषु भूतेषु तदात्मत्वेन मानद।

तज्जन्यत्वेन वाज्ञेयस्तदाधारतया हि सः।

साधारणो हि संबंधो न स संसारनाशनः।

दानत्वेन च संबंधो द्वितीयो मोचको मतः।

तापादि  पंचसंस्काराद्यो जातो जगतीपते।

तदनन्यार्हशेषत्वमात्मनो ह्यनुभावनम्।

तत्संबन्धानुसन्धानं तनुवाक्कायमानसैः।

नेदं साधनसंसिद्धं किंतु या वै हरेः कृपा। 100

सर्वतोमनसो राजन् निस्संगत्वं प्रजायते।

विना योगसमाधिं हि केवलं कृपया हरेः।

दृष्ट्वा हि खलु राजेंद्र लोकरीतिमनुत्तमम्।

वैराग्यं सर्वभावेषु राजन् जायेत पुष्कलम्।

दारास्सुताःप्रियाःप्राणा राज्यं यद्यदवैष्णवम्।

न प्रियाणिभवंतीव कामिनःकामिनीं विना।

इयमात्यंतकी राजन् भक्तिर्गोविंदपादयोः।

प्रासादेनैवसंसाद्य सत्यं सत्यंवदाम्यहम्।

यस्यानुग्रहमात्मीय माकांक्षति दयानिधि ।

तस्यवैकांतिकीप्रीतिर्जायते नान्यसाधना। 105

प्रतिज्ञा तं भगवता श्रृणु राजन्यसत्तम।

परमैकांतितोपायस्स्वहस्ते विधृतो यथा।

तेषांसततमुक्तानां भजतांप्रीतिपूर्वकम्।

ददामि बुद्धियोगंतं येन मामुपयांति ते।

तेषामेवानुकंपार्थ महमज्ञानजंतमः।

नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता।

जायमानं हि पुरुषं यं यं पश्यति चक्षुषा।

स एव भवतिक्षिप्रमेकांती पुरुषेषु हि।

एकांतिनो महाभाग!गृहीता हरिणा स्वयम्।

भगवद्दत वैराग्य ज्ञानयोगादिभिस्तथा।110

चितैकतानमाश्रित्य वासुदेवोऽखिलात्मनि।

प्राप्नुवंति परंधाम वैष्णवं शाश्वतंपदम्।111।

इति श्रीपांचरात्रे बृहद्ब्रह्मे चतुर्थे रुद्रगीतायां **भक्तिनिरूपणंनाम** सप्तमोऽध्यायः।

## अथ अष्टमोऽध्यायः।

आदौ तु कर्मजिज्ञासा कर्तव्या नृपसत्तम!।

ज्ञात्वा बृह्म ततःकुर्याल्लक्ष्यमात्मशरस्य हि।

श्री राजोवाच-

अलक्ष्ये लक्ष्यताकार्या लक्ष्ये वा लक्ष्यतानु किं।

अद्येत्वसंभवोदेवत्वनुवादो द्वितीयके।

श्री रुद्र उवाच-

सर्वप्रमाणासिद्धत्वान्नालक्ष्यं बृह्मभूपते।

सन्मात्रं स विशेषोऽस्य यत्रसंधार्यते मनः।

सन्मात्रं संशयच्छेदो न संयगभिजायते।

स्थाणुर्वा पुरुषोवेति न निर्धारयितुं क्षमः।

विशेषोऽस्यसतो राजन् निस्संधेहकरो मतः।

विशेषेधारणायोगो निर्विशेषेणसेत्स्यति।5

सन्मात्रदोषरहिते दोषःद्रष्टुःपरंतप।

भासमानोविशेषो हि भासतेन कथंचन।

राजोवाच-

पुरुषस्सविशेषो वा निर्विशेषोऽथवा प्रभो।

विचार्य मम वक्तव्यं भगवन् शरणार्थिनः।

श्री रुद्र उवाच-

प्रश्नोयं तव राजेंद्र स विशेषं प्रयच्छति।

स प्रकारकतापन्ने संदेहोजायतेयतः।

निर्विशेषे विस्षाणादौ संदेहो न कदाचन।

जायते नृपशार्दूल ह्यवस्तुद्धाद्विमर्शतः।

राजोवाच-

शशे विषाणरहिते कर्णाभ्यांदूरदोषतः

शृङ्गप्रतीतिर्भवति देवतद्वदिहापि हि।10

श्रीरुद्र उवाच-

शृंगप्रकारतापन्न एकदेशेशे स शस्यतु।

शृंगबुद्धिःप्रवतिनतुसाऽकर्णके शशे।11

किं सादृश्य धियो राजन्! बृह्मणी प्रतिभाति ते।

तदीये धर्मसच्छावे सविशेषो न संशयः।

शशस्यश्रृंगाभावेपिश्रृंगभाव विधायके।

कर्णे तास्यान् महाराज निष्प्रकारे कथंभ्रमः।

राजोवाच-

के ते विशेषाःपुरुषेयेषां ज्ञानान्निवर्तते।

संसारोदीर्घरोगोऽयं येनदुःखं पदेपदे।

कर्तृत्वमस्यजगतःतथा च परिपालनम्।

सन्निरोधोविमोक्षश्च विशेषोऽयंपरात्मनः।15

किं बृह्मेति पुरा पृष्टे श्रुतिरेवोत्तरं जगौ।

यतोभवंतिभूतानि येनजीवंति सर्वतः।

यत्प्रयंतिविशंतीति तद्बृह्मेत्यवधार्यते।

लक्षणंब्रह्मणस्तावच्छ्रौतं भवति भूमिप।

राजोवाच-

सत्यंभवति देवेश लक्षणं श्रुतिबोधितम्।

एतैस्तु लक्षितं बृह्मन् लक्ष्यंभवति योगिनः।

अदृष्टोभवतिद्रष्टा विज्ञाताआज्ञात एव च।

असृतोभवति श्रोतोऽमतोमंता प्रकीर्तितः।

अकरेव तथा कर्ता ह्यधर्ताधारकोमतः।

अभोक्ता सर्वमश्नाति निर्विशेषोविशेषवान्।20

यद्यद्विलोक्यतेतुच्छं सर्वंमिथ्येति गीयते।

अतोऽस्यकारणं बृह्म कर्तृवेतिनिरूपितम्।

अकर्तृत्वं तु देवेश लक्षणंप्रतिभाति मे।

रूपं च लक्षितं तत्र धारणापि भविष्यति।

निर्विशेषंनिराधारंनिर्गुणं च निरंजनम्।

इत्येवं भावनासाक्षाद्धारणं गिरिजापते।

किं न स्यादिति मे शंका जायते सुदृडो प्रभो।

तां निवर्तय सद्युक्त्या यदियोग्योऽस्मि भाषितम्।

श्रीरुद्र उवाच-

स्वातंत्र्येणस्यदोद्रष्टा श्रोतामंता च विद्यते।

अतो विशेष्यते राजन्नेतैरेव विशेषणैः।25

अयं यमनुगृह्णाति परमात्मा सनातनः।

स एव तं विजानाति यास्यत्यखिलसंश्रयम्।

मंता स एव भवति नान्यो राजन् कदाचन।

प्रसादादेवदेवस्य विशेषोह्यवधार्यते।

आत्मत्वात्वर्वभावानामंतस्सूक्ष्म स्वरूपतः।

प्रविष्ठःपुरुषश्रेष्टः तस्मन्नैवोपलक्षयेते।

शरीरभूतमखिलंमात्मानं पुरुषोत्तमम्।

न विजानाति राजेंद्र! इत्याहुर्माध्यंदिनास्तु तम्।

यःपृथिव्यादिवाक्येषु चिदचित्सु विशांपते।

आकाशवत्समन्वेति तदेतदवभासयन्।30

अदृष्टस्वात्मरूपत्वा द्रष्टा भवति चिंतय।

पारतंत्र्य स्वभावत्वादनयोर्दृष्टि दृश्ययोः।

द्रष्टानचातोऽयं राजन्! यं विना प्रभवत्युत।

अतोद्रष्टाहरिस्साक्षा द्यथावीणारवोमतः।

अनुप्राणंति यं प्राणाःप्राणांतं सर्वजंतुषु।

अपानं तमपानंति नरदेवमिवानुगाः।

सर्वत्र सर्वभूतोऽयं यथाभूतो विराजते।

द्रष्टाप्यदृष्टोराजेंद्र दृश्यतेचापि पश्यताम्।

भिद्यते हृदयग्रंथि छिद्यंते सत्वसंचयाः।

क्षीयंतेचास्यकर्माणि तस्मिन्द्रष्टेपराऽपरे।35

यदापश्यःपश्यतेति श्रुत्या दृश्यत्वमप्युतः।

प्रसादेवैवजायेत विष्णोरेवाविलोकनम्।

तस्यात्मत्वेनसर्वेषां रूपत्वेन च तत्वतः।

विशेषरूपविज्ञानं दर्शनं नृपसत्तम।

विशेषरूपविज्ञाना द्भिध्यते ग्रंथिरात्मनः।

क्षीयंतेचापिकर्माणि छिद्यंते सर्वसंशयाः।

स्वरूपंवैभवंशक्ति बलपौरुषमस्य च।

साकल्येन न संश्रोतुं शक्यते नृपसत्तम।

अश्रुतोऽतश्रुतस्तावद्वाक्यै र्वेदांत संभवैः।

तंत्वौपनिषदंदेवं पृच्छामीति श्रुतेर्बलात्।

अस्यमानंमितिर्नास्ति तस्मादुक्तोमतोमितः।

यं विनामियतेनैव मितमेतच्चराचरम्।

आविर्भावस्थिरोभाव स्सूक्ष्मरूपेण संस्थितः।

यस्मिन्नाभाति विश्वस्य न चाधारतया मतः।

अनंताख्याविशेषोयंमाधाराख्यस्य भूपते।

न मितोवासुदेवस्स तस्मादमत उच्यते।

विज्ञातंस्याद्यतस्सर्वं स्थूलसूक्ष्मतयास्थितम्।

कस्तमन्योविजानीया दविज्ञातस्ततस्मृतः।

ईशोऽस्तिसर्वजगतो न गोप्तत्वादन्यभासते।

अदृश्यस्यापि राजेंद्र बृह्मणःपरमात्मनः।45

यथाहमितिभूतानां प्रतीतिःखलु भूपते।

अद्यप्रसूतादारभ्यचाशतां तात्प्रतीयते।

तथापि पामरेणापि प्रोच्यते पुरुषोत्तमः।

विज्ञातएव राजेंद्र प्रतीत्याऽनुभवेन च।

यथान्यन्नास्ति वाक्येन शून्यमाकाशमेव हि।

परिस्फुरतिसर्वेषां भूप जानीहि सर्वतः।

आकाशमस्तीति पुनश्चोत्तरं किं न दीयते।

विशेषास्फुरणात्तात तन्यायैह युज्यताम्।

देहादि प्राणमनसां सहैवाहंकृते ग्रहाः।

विशेषाग्रहणात्स्वस्य तन्न्यायैहयुज्यताम्।50

नाहमन्यो न चात्मानो विशेषःपरजीवयोः।

अज्ञसर्वज्ञरूपेन्योविशेषोपि न गृह्यते।

जीवस्य कर्मकर्तृत्वं कर्मणा प्राक्तनेन हि।

यथा हरेर्नकर्तृत्वं कर्मलोपो न विद्यते।

एनकर्ता महीपाल परमात्माऽयमीरितः।

प्रकृतेरपि कर्तृत्वं यदायत्तंरमापतेः।

रमापतेस्तथानैव ह्यकर्ता तेनमाधवः।

न कर्ता माधवोज्ञेय श्रुतिस्मृति विरोधतः।

कर्तृत्वंवास्तवंपुंसो वासुदेवस्य भूमिप।

उभयोःपरतंत्रत्वात्कर्तृत्वं नोपपद्यते।55

अज्ञानेन यथा धर्तादेहस्यपुरुषोमतः।

देहोऽहमभिमानेन न तथा पुरुषोत्तमः।

धर्ताविशेषिणीभूत चिदचिद्देहयोर्हरिः।

विद्दतिस्सेतुरूपेण श्रुतिराह विशांपते।

अवश्यभक्तोजीवस्या द्राजन् स्वीयस्य कर्मणः।

फलंशुभाशुभस्यात स्संसारेस्मिन्निबध्यते।

अप्राकृतस्यभोक्तायं भक्त्या भक्तार्पितस्य च।

हेयप्राकृतरूपो ये विशेषस्तेन वर्जितः।

महदादिविभेदेन कार्यावस्थानुरूपतः।

स्वानंतशक्तियोगेन नित्यस्वाभाविकस्तु यः।60

हेयांशावर्जितो राजन् विशेषस्तेनसंयुतः।

चिदचिच्छब्दवाच्यो ये विशेषणतयास्थितः।

सर्वावस्थाश्रयस्तस्मिन् विशेष्य परमात्मनि।

विशेषस्सर्वकालेषु निवर्तेत कर्हिचित्।

धारकःप्रेरकोभर्ता सर्वस्यास्य प्रकाशकः।

सदनंतगुणावासश्श्रीभर्ता मोक्षकृत्स्वयम्।

अन्यव्यावर्तकानेक विशेषण विशेषवान्।

विभाति भगवानेको निर्विशेषो न भूमिप।

अनादिवासनाबद्धो जीवस्संकुचितस्स्मृतः।

विशेषंवासुदेवस्य न जानति कृपांविना।65

अयं यमनुगृह्णाति यमंगीकर्तुमिच्छति।

शास्त्रसंगोभवेत्तस्य सदाचार्यस्यसन्निधौ।

विशेषं तस्य विज्ञाय तत्रारोप्यमनोधिया।

विमुक्तोभवतिक्षिप्रं जन्मसंसारबंधनात्।

सदैकरूपाभावात्तु जगन्मिथ्येति गीयते।

न मिथ्याऽन्यादृशं नैव भ्रमोरज्जुभुजंगवत्।

राजन् कार्यस्यमिथ्यात्वं नैर्गुण्यं परमात्मनः।

आभासवादोजीवस्य पाषंडैरुपकल्पितः।

<u>नैतद्विश्वासनीयं ते मयोक्तमपि मायया।</u>

<u>आज्ञया वासुदेवस्य मोहनाय सुरद्विषाम्</u>।70

प्रवर्तितमसच्छास्त्रमयदार्थस्य दर्शनात्।

तर्कसिद्धाद्विशेषेण तामसानांप्रियं हि तत्।

अयंवेषो महाभागा जटाभस्मास्ति कल्पितः।

स्मशाननिलयावासो ऽमेध्यभोगोमदाश्रितः।

तामसंसर्वमेतद्धि स्यादिष्टं पिशिताशिनाम्।

नारायणसमत्वेन देवतांतर चिंतनम्।

मायाविद्याविभागेनचेशजीव विकल्पनम्।

मायाविद्याविनाशे तु नेशोजीवो न विद्यते।

यथाघटमठाभावे तदाकाशो न विद्यते।

बंधमोक्षौभ्रमस्यातां नस्यातामीश जीवकौ।75

निर्विशेषं निराभासं बृह्मनिर्धर्मकंतहा।

ध्यात्वा ध्यानं न हि ध्येयंमस्तिनास्तीति नैव हि।

अनिर्वाच्या हरेश्शक्तिर्मिथ्या मायेति पार्थिव।

मायावादमिदंशास्त्रं मायामोह प्रवर्तितम्।

सत्यंनैवाद्दतं सद्भिर्ज्ञात्वा मोहनमात्मनः।

मुमुक्षुभि र्नसंधार्यं न श्राव्यं मुक्तिमिच्छताम्।

पाषंडमयथार्थं च श्रुतिस्मृतिविरोधतः।

गौतम उवाच-

निर्विशेषमहादेव विशेषोयं भवेद्यति।

को दोषस्यादुमाकांत वद मे वदतां वर।

श्रीरुद्र उवाच-

निर्विशेषं प्रवदतां भवतां कोऽयमाशयः।80

निर्विशेषेविशेषस्तु मतोव्यावर्तकोनवा।

अद्येव्यावर्तकोधर्मो निर्विशेषेपि सिद्ध्यति।

द्वितीये निर्विशेषोपि न सिद्ध्यति महामते।

अव्यावृत्तेर्विशिष्टात्तु निर्विशेषःकिमुच्यताम्।

निर्विशेषं न वस्त्वस्ति सदसत्स्वपि किंचन।

लक्ष्यंलक्षणनिर्दिष्टं सर्वंभवति गौतम।

व्यावर्तकत्वंसर्वत्र स्वेतरस्य द्विजोत्तम।

सधर्मकस्त्वं संसिद्धं तेन सर्वत्रसर्वदा।

आधारंसर्ववस्तूनां भासकानां च भासकम्।

बृह्मनस्तु कथंब्रह्मन्निर्विशेषं भवेदिदम्।85

गौतम उवाच-

सर्वस्य स विशेषत्वात्सधर्मत्वात्कृपानिधे।

सर्वतो हिविजातीयमुक्तं ब्रह्मसनातनम्।

अतोनिर्धर्मकंब्रह्म निर्विशेषं विनिश्चितम्।

सविशेषस्यनष्टत्वं द्रष्टुंप्रत्यक्षतो मया।

श्रीरुद्र उवाच-

विशेषस्त्वेव विप्रेंद्र बृह्मणःपरमात्मनः।

विजातीयत्वमाख्यातं विशेषोदन्यनिष्ठितात्।

सर्वेतरविजातीय विशेषेणविशेषितम्।

ब्रह्मवेदांतसिद्धांत संसिद्धमिति चिंतय।

चेतनाऽचेतनश्चेति विशेषोऽयं महामते।

विशेषणतया तत्र पर्येतिपरमात्मनि।90

विशेषश्चिदचिद्रूपःपरतंत्रोयमीरितः।

तस्माद्विलक्षणोधर्मभूतोदेवस्यशार्ङ्गिणः।

अनंतनित्यनिस्सीम शुद्धंदोष विवर्जितः।

अहेयाभावनातीता गुणाविष्टोर्निरूपिताः।

धर्मभूतास्तु ते सर्वे कल्याणादिकसंज्ञिताः।

सच्चिदानंदरूपाश्च कृतिशक्त्यादि रूपिणः।

नान्यत्रेवंविधगुणा श्चिदचित्सु द्विजोत्तम।

नैनंविधगुणैःपुष्टःपुरुषोन्योमया मतः।

परिच्छिन्नविशेषात्तु गुणाद्वा पुरुषादपि।

सविशेषगुणापन्नो भिन्नोऽयंपुरुषोत्तमः।95

विष्णोर्गुणानांवैजात्त्य मस्तिचान्यगुणैस्सह।

विष्णोरभेतदोषस्याप्यन्येन गुणिना सह।

असाम्यान्निर्विशेषत्वं गुणानां गुणिनोऽपिवा।

विशेषान्मुनिशार्दूल निर्विशेषत्व संक्षयः।

निर्विशेषेविशेषोस्तीत्येवं वक्तुं न शक्यते।

योयंविशेषस्सोप्यत्र कस्यवाऽभिमतस्त्वया।

निर्विशेषस्यचान्यस्य स्वस्यवेति द्विजोत्तम।

अध्येतुवचसस्तावद्व्याघातस्या द्वितीयके।

अन्यस्यसत्वंवाऽसत्वमाद्येऽद्वैत संक्षयः।

द्वितीये चासतस्तावत्संबंधो नैव सिद्ध्यति। 100

त्रितीयोत्वा श्रयमृते विशेषो नास्ति कुत्रचित्।

नतु तावद्विशेषोऽयं शुक्तौरजतवत्स्मृतः।

मिथ्यैवदोषश्चसतैतिचात्रैव सिध्यति।

दोषाभासस्तवमते दोषःक्वापि निराश्रयः।

आश्रयो निर्विशेषो हि तथा निर्धर्मकस्स्मृतः।

दोषस्यसत्वेद्वैतंस्या दसत्वेनापरोक्षता।

मिथ्यात्वेवस्थास्या द्दोषांतरविकल्पनात्।

निर्विशेषे विशेषोऽयमितिभ्रांतिर्विचार्यताम्।

स विशेषस्य विप्रेंद्र द्वयंसिध्येद्विमर्शतः।

कैश्चिद्विशेषैस्संव्याप्तिःरव्याप्तिःकैश्चिदेव हि। 105

स विशेष द्विजश्रेष्ठ निर्विशेषत्वसंभवः।

गौतम उवाच-

व्याप्ताव्यातत्वमित्युक्तं स विशेष दयानिधे।

कैर्व्यापिःकैर्नचव्याप्तिरिति मे संशयं नुद।

श्रीरुद्र उवाच-

महदादिकृतायेच विशेषास्तैरसावृतम्।

सृष्टौकदाचिद्भवती तद्व्याप्तं मुनिसत्तम।

प्रधानादि विशिष्टोपि निर्विशेषस्तु कारणे।

प्रलीनत्वाद्विशेषाणां सर्गादादौ विशेषवान्।

निजासाधारणाकार गुणाशक्तिविशेषयुक्।

न ज्ञायते मुनिश्रेष्ठ!विना भगवतःकृपाम्।

वैशिष्ट्यं वासुदेवस्य न विहन्येत कर्हिचित्। 110

विशिष्टंयेनतच्चापि स देवपरमात्मनः।

अनित्यत्वादसत्वं तु मिथ्यात्वं श्रुतिरुज्जगौ।

विशेषस्यापरोक्षस्य प्राकृतस्य विनाशतः।

नित्यानां तु विशेषाणां विनाशो नैवविद्यते।

स्वरूपहानिरेवस्यादन्यथा मुनिसत्तम।

विशिष्टंबृह्मणोरूपं सदसद्भ्यांविनिश्चितम्।

स्वस्मिन्प्रकारतापन्न सदनंतगुणान्वितम्।

स्वरूपलक्षणंतावच् छ्रुतिभिःक्रियते द्विज।

सत्यंज्ञानमनन्तं च बृह्मेत्यादिभिरेव च।

तथा कर्तृत्ववचनैः स्वरूपं लक्ष्यते सदा।115

विकारे निर्विशेषस्य तथाऽऽहुश्श्रुतिरेवहि।

सविशेषं परबृह्माधारणैक समाश्रयम्।

विज्ञायगुरुवाक्येन श्रवणादिभिरेव च।

नामसंकीर्तनैश्चैव स्तवनैर्वंदनैस्तथा।

ध्यानेनभक्तियोगेन तत्सांयमधिगम्यताम्।

तत्सांयलक्षणोमोक्ष स्सायुज्यमभिधीयते।

यतोनावर्ततेभूयो भोगसाम्यमुपैति हि।

ऋषिराजश्चविप्रश्च श्रुत्वा शंकरभाषितम्।

आदाय तौ परंधर्मं शरणागतिलक्षणं।

व्यवस्थावचनैस्तावन्निस्संदेहौ बभूवतुः।120

स्थूणासंखनसन्न्याया त्सांदिहानावपृच्छताम्।120 1/2

इति श्रीबृहद्बृह्मे चतुर्थे बृह्मविचारोनामाऽष्टमोऽध्यायः।

## <u>अथ नवमोऽध्यायः।</u>

ता ऊचतुः-

पंचवक्र महादेव विशिष्टं बृह्मलक्षणैः।

लक्षितं तत्र संदेहमावयस्त्वं निशामय।

सत्यादिलक्षणैर्लक्ष्यं कीदृशं बृह्म शंकर।

सत्यादिभिस्तु किंवाच्यं स्वरूपं धर्म एव वा।

सत्यस्वरूपंचेद्बृह्म त्वितरैः किंप्रयोजनम्।

इदंसर्वंसमाचक्ष्व विष्णुसिद्धांत गर्भितम्।

श्रीरुद्र उवाच-

सत्यादिलक्षणैर्लक्ष्यं बृह्मसत्यादि लक्षणम्।

स विशेषं निर्धर्मं निष्क्रियं तावदिष्यते।

सत्यादिभिस्तु सत्यत्व धर्मसत्वं प्रपंच्यते।

तादृशो बृह्मणोरूपं सत्यत्वादिभिरुच्यते।5

अन्यथा तु विरोधस्स्याच्छ्रुत्यास्मृत्या च मुक्तिभिः।

विरुंधंतोऽपरुंधंति सर्वेसिद्धांतशंसिनः।

ता ऊचतुः-

अन्यथा कोविरोधस्स्याद् वद नौ वदतां वर।

सत्सात्वतागमाभ्यास सिद्धांतार्थ निरोधकः।

सत्यादिभिस्स्वरूपं किं सूच्यते दूषणं च किम्।

स्वरूपमात्रकथने धर्मसत्वं निवार्यते।

श्रीरुद्र उवाच-

सत्यादिलक्षणैर्लक्ष्यं यदिस्यादितरन्नृप।

तदाऽसत्वं प्रपद्येत सतु सत्यस्वरूपकम्।

नीतिस्सत्यादिशब्दानां सामानाधिकरण्यजा।

अपेक्षिता तु सर्वेषां तदभावःप्रसृज्यते।10

येचसत्यादयश्शब्दा स्समानाधिकरण्यतः।

बोधयंति शिष्टं हि सत्यादिक विशेषणैः।

न च सत्यादयो राजन्! प्रतिकूलेन वर्त्मना।

एकस्यबृह्मणस्तावन् निर्विशेषत्वमज्जगुः।

एकार्थ परतासिद्ध्ये द्व्यावृत्तीनां बहुत्वतः।

न चेदसत्यव्यावृत्तिस्सैवस्या दन्ययोरपि।

नव्यावृत्तिबहुत्वंस्यादिति चात्रोपयुज्यते।

असद्व्यावृत्तिमात्रेण द्वयोव्यावृत्तिरेवचेत्।

बृह्मस्वरूपसिद्धित्वादंत्ययोः किं प्रयोजनम्।

तत्तद्व्यावृत्त्यवच्चिच्छन्नं स्वरूपं परमात्मनः।

अतश्चैकार्थपरता त्रयाणामभिधीयते।

इतिचेदागतोमार्गे स विशेषप्रसंगतः।

स्वरूपस्यविशेषः क इति चेदुच्यते द्विज।

व्यावृत्तीनां स्वरूपस्य व्यवच्छेददकताहि या।

स विशेषो हि राजेंद्र! सत्यादिभिरुदाहृतः।

यथा सत्यादिभिर्बृह्म कर्तृत्वादिभिरच्युतः।

तथैव बोध्यते राजन् द्विजःपर्यस्वरूपतः।

तावूचुः-

शोधकैबोधकैर्वाक्यैस्स्वरूपं यदि बोध्यते।

पौनरुक्त्यं कथं नस्यादिति नौ संशयोमहान्।

श्रीरुद्र उवाच-

कर्तृत्वादिक वाक्यैस्तु निमित्तं बृह्मचोच्यते।20

उपादानं च जगतो बोधितं नृपसत्तम।

यथा बोधकवाक्यैश्च प्रोक्ताकारणरूपता।

तथा शोधकवाक्यैस्तु साजात्यं दोष एवच।

पर्याते नृपशार्दूल मुनेतर्कनिदां वर।

तेनशोधकवाक्यानां न वैयर्थं भवेदिह।

उभाभ्यांबृह्मणोरूपं निर्दोषमवसीयते।

माभूयादिहशंकावां यथा नो बृह्मनिश्चयः।

न तु बोधकवाक्यैस्तु वैलक्षण्यं निरूपितम्।

चेतनाचेतनाभ्यां च शोधकैःकिं भवेदिह।

तत्र साजात्यदोषो हि कथं प्राप्नोतिवार्यते।25

इतिचेच्छ्रूयतांसत्यं तद्यामद्य वदांयहम्।

प्रकृतेःपुरुषःद्वापि भिन्नेपि परमात्मनि।

विकारोपि हि साजात्यदायातिक केवले।

सत्यंज्ञानमनन्तं च पदानि क्रमतो नृप।

बृह्महोर्धारणौमूलं विमुक्तिर्येन जायते।

तत्र सत्यंपदं तावदाह बृह्मसनातनम्।

निरूपादिक सत्सत्ता योगितेन निवारितम्।

अचेतनंविकाराणामास्पदं चेतनं पुनः।

तत्संस्पृष्टन्महाभागौ ततो ज्ञानपदं च यत्।

असंकुचितबोधैकाकारमाह परात्परम्।30

पूर्वं संकुचितज्ञाना मुक्तास्तेन निवारिताः।

आहनंतपदंब्रह्मपरिच्छेद विवर्जितम्।

व्यावृत्तास्तेन नित्यास्तु पूर्वकोटिविलक्षणाः।

स्वरूपेणगुणैश्चैवा नंत्यमस्ति हरौमतः।

नित्यमुक्तनिबद्देषु नैवंभूतोऽस्तिकश्चन।

तस्मात्सत्यादिकपदैर्गुणभूत विशेषणैः।

विजिज्ञास्यं परंब्रह्म सर्ववस्तु विलक्षणम्।

तावूचतुः

कथंनिमित्तथाचास्य ततोपादानता कथम्।

ब्रह्मणो वद विश्वेशगंगाधररुहेश्वर।

श्रीरुद्र उवाच-

चिदचिदप्रकृतिद्वेधा विशेषणतया हरौ।35

तद्विशिष्टंपरंब्रह्म श्रुतिराहमहामते।

सदेवेदं पूर्वमासीदेकमेवाद्वितीयकं ।

तदैक्षतासृजल्लोकान् सूक्ष्मभूतान् स्वसंस्थितान्।

असृजन्नामरूपाभ्यां तत्र तत्रान्वगात्स्वयम्।

तत्तन्नामाभवद्राजन् नाकारांतरसंग्रहात्।

विशिष्टमेवभवति प्रकारांतरमाश्रितम्।

स्थूलावस्थौ चिदचितौप्रकारांतरसंस्थितौ।

तत्तन्नियमनार्हत्वमुपादानं प्रकीर्तितम्।

यं विशंतीति वाक्येन प्राग्विलीनमिदं जगत्।

स्थूलाकारपरित्यागो लयोनामनिरूप्यते।40

स्थूलाकारानुकरणं प्रभवोनाम गौतम।

न च द्रव्यांतरोत्पत्तिराकरांतरमेव च।

वचारंभणवाक्येन निर्णीतं परमर्षिभिः।

उपादायेदमखिलं निर्विकारतयान्वयम्।

नामरूप विभेधेन परिणामाव्यवस्थितः।

तद्भागित्वमुपादानं सत्यसंकल्पता हरे।

निमित्तत्वं तु निर्णीतं चेतसाह्यवलोक्यताम्।

निमित्तत्वं चिदचितोर्विशेषण विभूतयोः।

स्थूलाकारप्रघटना योग्यत्वं ब्रह्मणस्स्मृतम्।

यतस्संकल्पपूर्वैषा सृष्टिरुक्ता द्विजोत्तम।45

अतोनीत्तं च भगवान् संकल्पश्च निरामयः।

येनपूर्वं जगदिदं निवीतं प्रविलापितम्।

उत्ससर्जतमेवैकंसंकल्पं लयकारणम्।

पुनस्संकल्पयन्स्वस्मिन् विलीनं बहिरुत्सृजन्।

एकोऽहं नामरूपेण बहुस्यामित्यचिंतयत्।

संकल्पेनासृजत्तस्मान्निमित्तं स्वयमेव च।

स्वयमेवाभवत्पश्चात् प्रविश्यंतश्शरीरयन्।

उभयत्वं समाम्नातं सर्वशक्तेःपरात्मनः।

सांकर्यंजायते नैव न च दोषस्य संश्रयः।

न चास्य ज्ञानसंकोचः प्रकृतिं पर्यणामयत्।50

सूते सा महदा दिभ्यः प्राकृताण्डं नरोत्तम।

सचाशेषस्यजातः प्राकृतस्यप्रयोजकः।

महापुरुषनामासौ सहस्त्राननशीर्षवान्।

सहस्त्रकरबाह्वंघ्रिस्संचिंत्योऽस्ति मनीषिभिः।

तस्य नाभिसरोजांतं पंकजं तु हिरण्मयम्।

तस्मादभूच्चतुर्वक्त्रो ब्रह्मलोकपितामहः।

समस्तजीवजातानां निलयःपुष्करासनः।

तस्मादहंतामसानं जनकस्समजायत।

तस्य प्रसादात्त्रिजगत् संहरामि हराह्वयः।

मनुस्समभवत्तस्माद्यस्तु स्वायंभुवाह्वयः।55

मनुष्याणामशेषेण धर्मानाह सनातनात्।

दक्षादयस्तथाऽन्ये प्रजानांपतयोऽभवन्।

तेभ्यो मरीचिरभवद्यत्सृष्ट्याद्यो विलोक्यते।

मरीचिःकश्यपोजात स्तस्मात्सस्थिरजंगमाः।

अदितेर्द्वादशादित्या दितेर्दैत्याःपतत्रिणः।

कद्रुवास्समभन्सर्पान् विनतायाःपतत्रिणः।

तथाचैकजाता द्विशफाः पशुजातयः।

यदांसिसरितश्चैव पर्वतास्सागरास्तथा।

ऋषयःपितरोदेवा मनवस्सिद्धचारणाः।

गंधर्वाप्सरसोयक्षा रक्षोभूतगणाश्च ये।60

कलास्सर्वेभगवतो विष्णोरतुलतेजसः।

शरीरभूतविज्ञेयाः पुरुषस्यमहात्मनः।

आत्मा तु भगवान् राजन् यः प्रविश्यप्रवृत्तिदः।

उपास्यस्थूलरूपेस्मिन् तदभेदधिया मुने।

अस्य लोकस्य रक्षार्थं धत्तेविष्णोर्महाकृतिः।

यस्समाराध्यपुरुषो याति निर्गुणतामयम्।

प्रकृतेर्गुणविस्तार स्सप्तावरणवेष्टितः।

असंख्यातोऽपरिच्छिन्नो लोकातीतोह्यलौकिकः65।

नित्योहेयगुणातीतः पंचोपनिषदात्मकः।

असंख्यातोऽपरिच्छिन्नो मुक्तिस्थानमितीरितः।

प्राकृताप्राकृतावेतौ बद्धमुक्तिनिकेतने।

अनयोर्लोकयो राजन्नाधारो भगवान् हरिः।

स्थूलसूक्ष्मस्वरूपेण सर्वं यत्रावतिष्ठते।

एतद्विशेषणाविष्टं ब्रह्मवेदांत संम्मितम्।

भासकंसर्वकार्यस्य धारकंमुनिसत्तम।

येनेदं च यतश्चेदं यत्रेदं च यदात्मकं।

विश्वमेतन्महाभाग प्राप्यंभोग्यं तथैव च।

गंतव्यमयनंसाक्षाद्देवो नः प्रणतेपदम्।

वयमंशकलास्सर्वे तदायत्तप्रवृत्तयः।

स च स्वामी वयंदासा दासास्वामीस्वरूपतः।

तस्यैवाहं सचास्माकमनन्यार्हःपरस्परम्।

चिदचिद्वसजातीयं साक्षादात्मतनौ स्थितम्।

परमैकांतिभिर्ध्येयं विशिष्टंब्रह्मकेवलम्।

ईषणात्रयनिर्मुक्ता वासुदेवकृतायनाः।

उक्तानुसंधानवरास्तस्मिन्नेव विशंति ते।

हेयंमायिकमाज्ञाय हित्वा तस्मिन्ननूचितम्।

आत्मानं तदसंश्लिष्टं ब्रह्मभावमुपागतम्।

आत्मसर्वस्वरूपेण प्रेमातिशययोगतः।75

परमात्मानमात्मस्थं चिंतयेतदवाप्तये।

इति वेदांतसिद्धांतं उपदिष्टोमयाऽनघ।

निवर्तेथामतोयस्मात् सिद्धातौ द्वावपि प्रभो।

ग्राहिओयोमयापूर्वं मोहनायसुरद्विषम्।

विवर्तारंभ कोवादो वादोऽन्यःकापिलस्तु यः।

तं विहाय महात्मानविदंज्ञानं मयोदितम्।

स्वीकुर्यतां विमोक्षाय नात्रकार्यविचारणा।

तावूचुः-

भगन्वासुदेवस्य शरीरंसमुदाहृतम्।

सर्वंयदिह वै किंचित् स्थूलसूक्ष्मस्वरूपतः।

तद्भावनाशक्तिमतां विभूतिं वद शंकर80।

केषुकेषु चभावेषु चिंत्योऽयं भगवान् हरिः।

श्रीरुद्र उवाच-

विष्णुस्त्रिविक्रमाख्यो यो ज्योतिषाम् रविरंशुमान्।

मरीचिश्चंद्रमानागो वामदेवोमहामुनिः।

शंकरःपावकः स्वच्छस्यानुवेदोब्रहस्पतिः।

स्कंदःकुबेरोमेरुश्च कामधेनुद्विजोत्तमः।

अकारःप्रणवोमन्त्ररत्नमष्टाक्षरोदयम्।

गायत्रीसागरोगङ्गा विरजासरयूस्तथा।

यमुनाचाथकावेरी नारदःकपिलोमुनिः।

उच्चैश्रवाहयोनाग ऐरावतैतिस्स्मृतः।

गरुडोनित्यमुक्ताश्च प्रह्लादध्रुव एव च।85

वरुणश्चाऽर्यमाश्चैव कामस्संकर्षणस्तथा।

कालोमृगेंद्रपनसो रामः परशुधारकः।

अवताराश्च मत्स्याद्याः पुण्याःभक्तास्तु सर्वशः।

गोवर्धनश्चत्रिकूटो नरनारायणाश्रमः।

वेंकटाद्रिःपुष्करश्च श्रीमद्बृंदावनं तथा।

सूकराख्यं महाक्षेत्रं नैमिशं च कुशस्थली।

काश्ययोध्यापुरी वत्स! नीलपर्वत एवच।

स्मृतिर्मेधाधृतिक्षांतिः व्यासोविष्णुर्जनाश्रयः।

स्वाचारवान् जनोयज्ञो राजोऽर्वामरुतस्सुतः।

वसंतोमार्गशीर्षश्च हरेरेत विभूतयः।90

असंख्याया मया राजन् द्विज वक्तुं न शक्यते।

प्रधानंवस्तुचैवोक्तं नांतोवर्षशतैरपि।

प्रातःप्रातर्विभूतीनां स्मरणं पापनाशनम्।

यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेववा।

तत्तदेवावगच्छेतं विष्णुतेजस्समुद्भवम्।92।

इति बृहद्बृह्मे चतुर्थे बृह्मविचारे परतत्वनिरूपणं नवमोऽध्यायः।

## अथ दशमोऽध्यायः

## बृह्मविचारे परतत्वनिरूपणं-3

राजोवाच-

भगवन् देवदेवेश यदुक्तं भवतावयोः

ज्ञानं बृह्मस्वरूपस्य वाक्यश्शोधकबोधकैः।

बृह्मद्वितीयं वैशिष्ट्यं कथंस्याद्वद विस्तरात्।

कुतोवैदृश्यतेद्वैतमद्वये परमात्मनि।

श्रीरुद्र उवाच-

यथापयसि राजेंद्र घृतमस्ति न  दृश्यते।

तद्विशिष्टं पयोयद्वदेकमेवावलोक्यते।

यथा शब्दमायीवीणा केवलैर्वावलोक्यते।

बीजमंकुरगर्भं वै वह्निगर्भाशमी यथा।

विश्वगर्भा यथाबुद्धिः पुण्यगर्भा यथा क्रियाः।

चिदचिद्गर्भमेवैकं विशिष्टं बृह्म पार्थिव।5

कार्यकारणभेदेनववस्था द्वयमुच्यते।

कारणेसूक्ष्मरूपेण द्वैतेनपरिबृह्मितम्।

स्थूलरूपेण कार्ये तु द्वैतेनासाधितं हि तत्।

निबध्यते परस्तस्मात् परं तस्मान्नविद्यते।

गुणिनस्तुगुणोयद्वत् गुणादपिगुणी यथा।

एवंविशिष्टाद्वैतं हि श्रुतिस्मृत्युदितं नृप।

राजोवाच-

कथं त्वाधारभूतोऽस्मिन् द्वयोर्भेधस्वरूपतः।

औपादिकःकथंभेधो वद मे वदतांवर।

श्रीरुद्र उवाच-

ज्ञानैकरूपोजीवोऽयमनेकोणुःप्रकीर्तितः।

व्याप्तोनित्योक्षरोग्राह्यो गृहीतस्यान्ययोरपि।

सच्चिदानंदरूपोऽसौ पारतंत्र्याश्रितोमतः।

परिणामांतराप्राप्तो ज्ञानव्याप्तो निरामयः।

नित्योमुक्तोश्चबद्धश्च त्रिविधोऽयंविशांपते।

नित्योमायामसंप्राप्तः कादाचित्कोविमोचितः।

अनयोरेकरूपत्वं स्वरूपाद्गुणतोपि वा।

समानालोकभोगेश प्रसादाश्च महामते।

एतावानेवमुक्तस्य हेदःपूर्वं न तादृशः।

औपादिकस्तुबद्धोयं संसारी जीव उच्यते।

दैवीमायाहरेर्यातु तयाबद्धोनिजैर्गुणैः।

स्वरूपान्मुच्यते बुध्या देहोऽहमिति बोधतः।15

ज्ञानप्रकाशसंकोचं संप्राप्तः प्राकृतोभवान्।

देहाधिकृतनानात्वो नानायोनिषु जायते।

ज्ञानैकाकारतानष्टा स्वातन्त्र्यं मन्यतेऽबुधः।

ईश्वरोहमहंभोगी सिद्धोऽहं बलवान् सुखी।

आड्योभिजनवानस्मि कोन्योऽस्ति सदृशो मया।

यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः।

भवंतिजीवा राजेंद्र मानोद्धतमनोरथाः।

स्वत ऐश्वर्यविभवैरधिकान्मनुजान् सुरान्।

सेवंते भगवद्बुद्ध्या लोभेनाक्रांतचेतसः।

तद्वेषधारिणोदानास्तदाज्ञा परिपालकाः।20

भुक्त्वाभोगान् पतंत्यंधे नरके घोरसंकटे।

तामसींयोनिमापन्ना नावर्ततेंह्यधोगताः।

एवं कर्मचितोलोकः क्षीयतेच पुनःपुनः।

तथैव क्षीयतेपुत्रपाकेपुण्यचितोपि हि।

यथा हिममयंवह्निमजानंतो व्रजंति हि।

पश्चात्तापेनपीड्यंते धारुणेसांतरात्मनि।

एवं दृष्टफलंकर्मकृत्वा ज्ञानविवर्जितम्।

परिणामे महद्दुःखं प्राप्नुवंति न संशयः।

स्वकार्यफलमुद्दिश्य स्वतंत्र फलदायकम्।

नारायणसमंमत्वात्वधिकं वा सुरासुरम्।25

यजंति श्रद्धयायुक्ता मूलज्ञान विवर्जिताः

अंदंतमोविशंत्येते संभूतीनां सममर्चनात्।

भवंति नानामतयस्स्वरूपज्ञानवर्जिताः।

गतयोपि तदीयास्स्यु स्त्रिविधामतयो जनाः।

सत्वंरजस्तम इति त्रिविधाःप्रकृतिर्गुणाः।

तैरेतत्रिविधंजातं जगतेतच्चराचरम्।

त्रिधालोकास्त्रिधाबोगा स्त्रिविधाभिरुचिर्नृणाम्।

त्रिविधंकर्मजीवानां ज्ञानं च त्रिविधं नृप।

त्रिविधानिपुराणानि त्रिविधास्मृतयस्तथा।

वासस्तुत्रिविधोज्ञेय स्त्रिविधापिरुचिर्नृणाम्।30

ध्यानं तु त्रिविधं राजन्! सुखं च त्रिविधं तथा।

लोकोपि त्रिविधोज्ञेया स्तिस्त्रोवस्ताःप्रकीर्तिताः।

वृत्तिस्तु त्रिविधोज्ञेया तिस्त्रोवस्थाःप्रकीर्तिताः।

आबृह्मस्तंबपर्यंतं सर्वं हि त्रिगुणात्मकम्।

प्राकृतेस्तुगुणैर्बद्धो निर्गुणःपुरुषोप्ययम्।

आकल्पंमुच्यतेनैव विना तु शरणागतिम्।

एवमौपाधिकोजीवा नानात्वं प्रतिपद्यते।

एकभावंसमाप्नोति यथाभवति निर्गुणः।

त्रिधाभिन्नश्चिदंशोऽयं स्वाधारे परमात्मनि।

प्राकारतां समापन्नस्तस्मिन्नेव च तिष्ठति।35

अचिदंशोभि राजेंद्र भगवत्यवतिष्ठति।

कदाचिच्छेतनं धृत्वा बहिरायाति भूपते।

कदाचित्कारणेविष्णौ सद्रूपेणैवतिष्ठति।

लयायमपिधानात्तु प्रागभावो न विद्यते।

अव्यक्तत्वेन संस्थानं लयोनाम महामते।

उद्गमस्थूलभावेन व्यष्टिरित्यबिधीयते।

स्थूलस्यनैकरूपत्वं मिथ्यात्वमुपवर्तते।

भ्रांत्या विवर्तभावोत्र विमूडाःप्रवदंति हि।

उभयोःपरतंत्रत्वादाहेयत्वान्महामते।

परात्माभिद्यते नूनं स्वतंत्रो धारकोयतः।40

चिदचिद्भ्यां विभिद्येत पुरुषप्रकृतिर्नृप।

भोक्तृभोग्यतया तात शरीरात्मतया तथा।

चिदचित्परमात्मानो विभिन्नालक्षणैस्स्वकैः।

अभिन्नानृपशार्धूल विशेषणतया हरौ।

राजोवाच-

कथं जीवोणुरूपोऽयं शरीरेसर्वगःप्रभो।

कदाऽस्यमयायोगोऽभूत्कदा मुक्तिर्भविष्यति।

श्रीरुद्र उवाच-

स्वरूपेणाणुरूपोपि प्रकाशेन शरीरगः।

एकदेशस्थितोवेत्ति हरिचंदनबिंदुवत्।

प्रभया भास्करोयद्वद्बृरह्माण्डं व्याप्यतिष्ठति।

एकदेशस्थितोदीपः कृत्स्नगेहः प्रकाशकृत्।45

कदाऽस्यमायायोगोऽयमिति प्रश्नो न सौख्यदः।

अनादिकालतो जिवो माययापरिवेष्टितः।

अनुग्रहाद्धरेरेव मुच्यतेनात्रसंशयः।

त्रिविधोऽनुग्रहोविष्णोः कर्मज्ञानमुपासनम्।

मुक्तिर्हित्वाऽन्यथारुपं स्वरूपेणव्यवस्थितिः।

हित्वा संकुचितावस्थां भेदं प्रकृतिसंभवम्।

संप्राप्तात्मस्वरूपोयं प्रेमातिशय योगतः।

प्राप्नोति परमात्मानं यतोनावर्तते पुनः।

मुनिश्च गौतमोराजा श्रुत्वेदं रुद्रभाषितम्।

सर्वतोमतिमाकृष्य भगत्येवमाददौ।50

निर्विद्यपुत्रदारेषु राजाकोशबलेषु च।

नारायणपदांभोजेऽनवच्छिन्नमनोगतिम्।

अखंडतैलधारावद्धार गतसाध्वसः।

अंतर्दधे महादेवः पार्षदःप्रवरैस्सह।

सिद्धांतं न्यायनिर्णीतं नानातर्क गणावृतम्।

हित्वा भागवतंधर्ममास्थीतो गौतमोमुनिः।

अंबरीषादिमुख्येभ्य स्तत्वमेतद्विधास्यति।

परमैकांतिकंधर्मं दुर्लभं मुनिसत्तमाः।

आस्थितोऽहं हरेर्ज्ञात्वा हरिसंतोषकारणम्।

अस्यां च मंदरद्रोण्यां वैष्णवं वेषमुद्वहन्।55

भवंतो मुनयस्सर्वे श्रीमन्नारायणोदिते।

सिद्धांते कृतसिद्धांताः प्रविशंतु विमुक्तिदे।

भवद्भिस्सहसंवादो मयायूयं प्रकीर्तितः।

संहितेयं समाख्याता भविष्यति हिताय वै।

सिद्धांते मामके विप्रा रहस्यं प्रवदामि वः।

नाभक्तायप्रवक्तव्यं नास्तिकाय शठायच।

विष्णुभक्तायशांतायदातव्यं मुनिसत्तमाः।

सिध्यंति हरिसंबंधात्तीर्थानि नियमोयमाः।

कर्मिणां दानयज्ञाश्च स्वाध्यायोयोग एव च।

हरिंविना न सिध्यंति कांयान्यपि मुनीश्वराः।60

तस्यैवशरणे भूत्वा हित्वाऽन्यत्साधनान्तरम्।

भावयेच्चेतसा तस्यसंबंधं परमात्मनः।

प्रपद्येशरणं श्रीमन्नारायणपदांबुजे।

इत्येकातित्वमालंब्य चेतसा भावयेन्मुहुः।

लोकयात्रांच न स्वामी करिष्यत्वेव सर्वदा।

इति विश्वासमालंब्य भरन्यासं प्रवर्तयेत्।

साष्टाङ्गंप्रणतौ सर्वकर्मणी परिभावयेत्।

श्रीमत्प्रसाददेहं च भावयेत्सर्वभोजनम्।65

सर्वतीर्थाभिगमनं पादतीर्थाभिषेचनम्।

आचार्यसन्निधिं तावद्भावयेच्चामृतांबुधिं।

संसारतापशन्त्यर्थं महाविश्वास पूर्वकम्।

प्रतिकूलजनावासं दावाग्निमिव संत्यजेत्।

इत्येवंगुह्यसंदेशः कथितो मुनिसत्तमः।

एतदर्थमिहागत्य धृतंमौनव्रतं मया।

कृष्णात्रिगोत्र प्रभवोद्धितःकश्चिदतंद्रितः।

ग्राहयिष्यति शिष्येभ्यः संहितां च महीतले।

कृष्णात्रेयातिविख्याता भविता बृह्मसंहिता।

बृहत्पूर्वमहाभागा यस्यापि धर्मस्सनातनः।70

य इमां संहितांपुण्यां सर्वं वेदार्थगर्भितम्।

श्रद्धयापरयोपेता भविष्यंति समाहिताः।

तेषामेकांतिकीभक्तिं रचिरात्संभविष्यति।

श्रोष्यंतिपुण्यकालेषु तेषां नैवास्तिपातकम्।

सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम्।

तत्फलं समवाप्नोति श्रुत्वेमां बृह्मसंहिताम्।

अधीत्य मुनयस्सर्वे प्रणिपत्य पितामहम्।

गृहीत्वा वैष्णवींदीक्षां प्रजग्मुस्सर्वतोदिशम्।

हारीताद्याश्चमुनयः श्रुत्वेदंबृह्मभाषितम्।

प्रवर्तयामासुरिमे स्मृतिरेकांतिनां प्रियः।75

यस्मिन्नित्यसदेकधाम्नि भगवत्याम्नाय गीतोदये।

स्थूलंसूक्ष्ममिदंजगच्च सकलं सन्नामकंचाभवत्।

यस्मादेव पुनःपुरोहितजगद्बीजाद्यथैवांकुरम्।

तस्मै श्रीपुरुषोत्तमाय हरये नित्यं नमःकुर्महे।

यो विष्णुर्भजतामभीष्टगतिदो गीतोपनीतोभवत्-

अग्रेव्यग्रकरःकरींद्रकरुणारावे विराजं विना

आयात्युन्मदमानराजमथने यस्सापराधे जने

नत्यैवाऽभिमुखःप्रयच्छतुरतिं लक्ष्मीधरावल्लभः।

इति श्रीबृहद्बृह्मसंहितायां चतुर्थः पादः

रुद्रगीता बृह्मविचारे परतत्वनिरूपणं नाम दशमोऽद्यायः ।

# श्रीबृहद्बृह्मसंहिता सम्पूर्णम्

## सर्वं श्रीकृष्णार्पणमस्तु

श्रीजयंतिदिने तिरुनारायणपुरे आनंदाश्रमे सम्पूर्णम्।

29-8-20013

ஸ்ரீ:
ஸ்ரீமதேராமானுஜாய நம:

# இதுவரையில் க்ரியாஸாகரம் மூலம் வெளிவந்துள்ள (வரப்போகிற) விலைமதிப்பற்ற புஸ்தகங்களின் பட்டியல்

1 திருவாராதநம், அக்னிகார்யம், வாஸுதேவ புண்யாஹவாசநம், மஹோத்ஸவவிதி.( sans & tamil)
2 பகவத்ப்ரதிஷ்டாவிதி - sans
3 வசநஸாரம் -(நித்யாராதனம், அக்னிகார்யவிஷயங்களின் பற்பல ஸம்ஹிதைகளிலிருந்து ப்ரமாணத்திரட்டுகள்) sans
4 வசநஸாரம்-மஹோத்ஸவம் & மற்றைய உத்ஸவங்களுக்கு பற்பல ஸம்ஹிதைகளிலிருந்து ப்ரமாணத்திரட்டுகள் sans
5 அர்ச்சநாவளி பற்பலதிவ்யதேசங்களின் எம்பெருமான் பிராட்டியார்களின் நாமாவளிகள்-( sans & tamil)
6 த்யாநஸ்லோக ரத்னாவளி. பற்பல எம்பெருமான்களின் ரூப த்யானங்கள். பற்பல ஸம்ஹிதைகளில் சொல்லப்பட்டவை sans
7 க்ரியாகைரவ சந்த்ரிகை பாகம்-1 பூபரீக்ஷைமுதல் க்ருஹார்ச்சா ப்ரதிஷ்ட்டைவரை sans & tamil
8 க்ரியாகைரவ சந்த்ரிகா-பாகம்-2 நித்யாராதநம், பவித்ரோத்ஸவம் sans & tamil
9 ஸ்நபநவிதிகள் ப்ரமாணங்கள்-(படங்களுடன்.)

<u>ஸம்ஹிதா விஷயங்கள்</u>

10 பரமபுருஷ ஸம் ஹிதா-
11 ஸ்ரீ ப்ருஹத்ப்ரும்ம ஸம்ஹிதா- sans & granthaaksharam

<u>புராணங்கள் வரிசையில்</u>

12 ஸ்ரீரங்கமாஹாத்மியம்-( part)-1)ப்ரும்மாண்டபுராணத்தில் கூறப்பட்டுள்ள- தசாத்யாயி மற்றவை sans & tamil

13 part 2 - கருடபுராணத்தில் கூறப்பட்டுள்ள ஸ்ரீரங்கமாஹாத்மியம். 108 அத்யாயங்கள் sans & tamil

14 பாஞ்சராத்ர பஞ்சாம்ருதம் (பவிஷ்யோத்தரபுராணத்தில் கூறிய திருக்குடந்தைவைபவம்) sans & tamil

15 துலாகாவேரி மாஹாத்மியம்(அச்சில்)
16 ஆகமோக்த ஆன்னிகம்-(அச்சில்)

பற்பல கட்டுரைகளின் தொகுப்புகள்



Therazhundur Sri Amaruviappan and Senkamala thayar

By:
Sri Pancharatra Agama Vidvan
Therazhundur K.Sriraman Battacharyar,
Sri Pancharatra Agama Samrakshana Sabha,
CG1-214, East Adayavalanjan St,
Srirangam, Trichy - 620-006.
97917-02035
sriramanbattachar@gmail.com
www.kriyasagaram.in